स्वानुसारतः॥७०॥अत्रघोरतपस्तप्तंमामुद्दिश्यजडाकर मोक्षदानेनशक्तोहंससंसयंनसंशयः॥७१॥मोक्षप्रदाताभगवान्देवदेवोत्तमः शिवः नशिवान्योमोक्षदातासंसयंनसंशयः॥७२॥स्वर्गापवर्गदातारंस्थितिस्थितकारणं मोक्षार्थमतियानेनशरणंव्रजशंकरं॥७३॥ईश्वरत्वन्नमेणेवमहादेवेनवंचिताः मामर्थयंतिवहवःशिवमायाविमोहिताः॥७४॥मुक्तिरजंतवेनज्ञाताकिंरजतायते तथाहमीश्वरत्वेनज्ञातश्चेदीश्वरोस्मिकं॥७५॥ईश्वरःसर्वविघानानिसाधेरीश्वरःशिवःविज्ञातोनतदन्यस्तवस्तुतस्त्विश्वरोध्रुवं॥७६॥महादेवः इतिविप्रुवचःश्रुत्वाबभावेवचनंहिजः ममदेकुंठवासोवादेयइत्यभिमयंतं॥७७॥ततोविप्रुरुवाचेदंवचनंसुरसन्निधौ विप्रवैकुंठवासोपिमयादातुंनशक्यते॥७८॥धिकारेमयाप्राप्तोवैकुंठस्यशिवार्चनात् पथेछमधिकारोपिममनास्त्यधुवं॥७९॥तुभ्यंवैकुंठवासोपिमयादातुंनशक्यते शिवपूजांविनातत्रवासस्त्वतिदुर्लभः॥८०॥क्षणार्द्धमपियद्वासान्महत्सुखमवाप्यते तत्सुखं

दुर्लभंविप्रविनाशंकरपूजया॥८१॥स्वतंत्रः पार्वतीनाथः सर्वदेवशिखामणिः ससमाराधितोभीवंप्रयछतिनसंशयः॥८२॥अस्तुतावयंसर्वेब्रह्माद्यानात्रसंशयः अतोस्माकंनभीत्यर्थदानेसामर्थ्यमेवन॥८३॥मामुद्दिश्यतपश्चर्यायाकृतासिद्ध्यर्थदेवदेवोत्तमंशिवं॥८५॥शिवंपंजस्वयत्नेनत्यक्त्वान्याशामहर्निशं प्रयछतिमहादेवः पूजितोभीघमर्दनः॥८६॥संतुष्टश्चेन्महादेवस्तत्पादेयंनदृश्यते ददातिमोक्षपर्यंतंपूजितःपार्वतीपतिः॥८७॥अनभ्यर्च्यमहादेवंयः सुखंप्राप्तुमिछति समुद्रंइतिविज्ञेयस्तत्वज्ञैःसत्यमुच्यते॥८८॥मयाविचार्यदेवेभ्यःसर्वेभ्यस्तत्वमादरात् शिवसंपूज्यतेनित्यंसंसयंनसंशयः॥८९॥पशुपाशविमुक्तिंचागंरुद्राक्षभस्मान्वितं लिंगपूजापरंनित्यंशिवंमंत्रजपोत्सुकं॥९०॥पशुव्रह्मादिकानदेवान्शिवनामजपोत्सुकान् भस्मोद्धूलितसर्वांगान्लिंगपूजापुरायणान्॥९१॥देवर्षिपक्षगंधर्वकिन्नरेस्वरगैरपि पूजनीयःप्रयत्नेनशिवएवेहसिद्धये॥९२॥शिवपू

Indira Gandhi National Centre for the Arts

जैवसर्वेषामभीष्टफलदायिनी तत्तस्त्वमतियत्नेनकुरुशंकरंपूजनं॥९३॥शिवपूजनमात्रेणात्व
यामोक्षश्चलभ्यते किमर्थमन्यपूजार्थंयत्नोपिवृदंस्वनो॥९४॥त्रिपुंड्रधारणंकृत्वाभस्मोद्धूलन
नपूर्वकं रुद्राक्षधारणंकृत्वायजदेवोत्तमंशिवं॥९५॥विभूतिधारणंयत्नात्कृत्वारुद्राक्षधा
रणं मामापूजयविश्वेशशिवलिंगस्वरूपिणं॥९६॥ शिवः इत्युक्तेरुद्रादिभिः साकंविघ्नविघ्न
विधिसमन्वितः वैकुंठंप्रायविमलमारुचगरुडंमुदा॥९७॥अतोमदर्चमादेवमोक्षः संप्राप्यतेशि
वे विनामदर्चनंदेविमोक्षोनभवतिध्रुवं॥९८॥पूजितोहंमहादेवोयस्ययद्भोप्सितं त
तत्तद्दास्यामिसुभगेसत्यंसत्यंनसंशयः॥९९॥देवतासर्वभोगोहंभुक्तिमुक्तिप्रदायकः सत्य
मेतत्पुनःसत्यमुद्धृत्यभुजमुच्यते॥५००॥सर्वाधारस्सर्वलोकैकबंधुस्सर्वाशास्संसर्ववेदांतवे
द्यंसर्वातीतंसर्वमोक्षैकहेतुंविज्ञायेशंमामनन्यांभजंति॥५०१॥ इतिश्रीशिवरहस्येसप्तमां श्रीराम
शेशिवगौरीसंवादेषोडशोध्यायः॥१६॥शिवापरामस्फ शिवऊवाच अथातःसंप्रवक्ष्या २३०

मिपूजोपकरणंशिवे अधिकार्यपिपूजयामुच्यतेश्रृणुसादरं॥१॥ब्रह्मक्षत्रियविट्शू
द्रदेवगंधर्वमानवाः यक्षादयोपिसंसिद्धामांशंपूजयंतिहि॥२॥ब्राह्मणोदेवमुनिभिदे
वेश्वाहरहः शिवे वेदमंत्रैरहंपूज्यस्तंदन्येतंत्रमार्गतः॥३॥आदौमज्जनासर्वयत्कर्त्त
व्यंतदुच्यते कर्त्तव्यकरणाभावेनाधिकारीभविष्यति॥४॥प्रातः शौचादिकंकृत्वास्नानंका
र्यंप्रयत्नतः रुद्रस्नैर्मार्जनंचकर्त्तव्यंस्नानतत्परैः॥५॥जलेनिमज्यमामीशंध्यात्वासांबं
महेश्वरं महादेवेतिमंत्रोपंजपनीयौषधाशिवे॥६॥ततः प्रयातीदेविकर्त्तव्यंजलतर्पणं
परिधानंततः कार्यंवस्त्रचीर्वादिभिशिवे॥७॥तदनंतरमात्मन्यभस्मग्राह्यंप्रयत्नतः सद्योजा
तादिभिर्मंत्रैस्ततः समभिमंत्रयेत्॥८॥ततःशरीरंसर्वांगंभस्मनोद्धूलयेत्ततः त्रिपुंड्रधा
रणंकार्यंजाबालोपनिषात्क्रमात् रुद्राक्षधारणंकार्यंततोंगेषुयथाक्रमं ततःसंध्यांप्रय
त्नेनकर्त्तव्यासकुशाततः॥१०॥ गोमयेनभुवंसम्यगनुलिप्योक्षिपेज्जलं ततोपविश्यसकु

रोत्वासनेजलशोधिते॥११॥पंजोपकरणंद्रव्यंसर्वंस्वीकार्यमादरात् अष्टोपात्राणिसंग्राह्याणि
र्घ्यार्थंमतिशोभने॥१२॥तानिसंप्रोक्ष्यसकुशंजलंतेषुप्रदापयेत् पूरयित्वाततोमंत्रंमुद्रांचैव
जपेन्ततः॥१३॥सौवर्णंराजतंताम्रंमथवामन्मयंशिवे शिवलिंगाभिषेकार्थंपात्रंग्राह्यंप्रय
यत्नतः॥१४॥विल्वपत्राणितस्यात्रेस्थापनीयानिपंडितः तेदुपर्येवसंस्थाप्यशिवलिंगंप्रय
त्नतः॥१५॥ततोरौद्रेणमंत्रेणसंप्रोक्ष्यार्चनसाधनं भस्मनांगानिसंमृज्यसंकल्पंचसमा
चरेत्॥१६॥ततःकुंदेंदुधवलमुद्धृत्यसर्वत्रशिवपंचाक्षरंमारभेणशिवं ध्यात्वानमःशिवा
येतिमंत्रेणसम्पूजयेत्॥१७॥जलकुंभमस्मपूतंस्यद्धूम्रलमनुपठेत् मूलमंत्रस्तु
सर्वत्रशिवपंचाक्षरःस्मृतः॥१८॥पठनीयोन्यमंत्रांतेमूलमंत्रस्तुसर्वतः मूलमंत्रोपमंत्रा
स्तुसर्वेमंत्रायतःस्मृताः॥१९॥सुगंधंतुलमीशानपवित्रकलशाहृतं अभिषेकार्थममलंसु
द्धार्थंचमहेश्वर॥२०॥इतुक्त्वाशंकरंध्यात्वासर्वदेवशिवांमणिं पंचाक्षरजपः कार्यो

दशवारंप्रपूजितः॥२१॥ततोघमर्ज्यमेत्यमर्घ्यांपपिनिवेदयेत् अर्घ्यमंत्राश्चविध्यस्तेषु
प्यंतेसयाधुना॥२२॥पृथिवीरूपविश्वेशपृथिवीजनकप्रभोगृहाणार्घ्यमिदंशंभोप्रसीदसुर
सत्तम॥२३॥जलरूपमहादेवजलप्रभवकारणा गृहार्घ्यं०॥२४॥तेजोरूपमहेशानतेजो
जनकशंकरगृहाणार्घ्यं०॥२५॥वायुस्वरूपसोमात्मन्वायुप्रभवकारणा गृहाणार्घ्यं०॥२६॥
आकाशरूपसर्वेशआकाशजनकप्रभो गृहा०॥२७॥सूर्यस्वरूपसूर्येशशिवस्सर्वैकका
रणा गृहा०॥२८॥चंद्रस्वरूपचंद्रौलिन्चंद्रशेखरसर्वग गृहाणार्घ्य॥२९॥यज्वमूर्तेजग
न्मूर्तेपुष्पकंफलप्रद गृहाणार्घ्यमिदंशंभोप्रसीदसुरसत्तम॥३०॥अर्घावर्घ्यादेयानि
मंत्रैरेतैर्यथाक्रमं श्वेतशोल्यक्षतांश्चैवबिल्वपत्रैर्युतैर्जलैः॥३१॥ततः॥३१॥ततःपंचाम
तैःस्नुद्धाभिषेकंसमाचरेत् पंचामृतैस्नानमध्येजलस्नानंसमाचरेत्॥३२॥क्षीरंगव्यमि
दंस्नुद्धजलसंयुतमीश्वर अभिषेकार्थमानीतंगृहाणोमामहेश्वर॥३३॥दधिगव्यमिदं

Indira Gandhi National Centre for the Arts

प्रुद्धंपरिप्लुतमुमायते अभिषेकार्थं॰॥३४॥घृतमेतन्महादेवस्नुगंधंगव्यमुत्तमं अभिः॥३५॥न
वंमधुसमानीतमिदंकोटाघदूषितं अभि॰॥३६॥शर्करेयंसुतानीतासिताकोटाघदूषिता अभि॰
॥३७॥एवंपंचामृतैरीशमभिषिच्याततः परं सांगेननमकेनेशंसावंमामभिषेचयेत्॥३८॥
जलधारालविछिन्नासंपाद्यामविभक्तितः साधारामृतधारासामुक्तिधारामवाप्नुया॥३९॥
ततःपरंकल्पनोपंबिल्वबिल्वपत्रोत्तरासनं हेमादिनिर्मितंमस्यंमूलमंत्रेणाभक्तितः
॥४०॥ततोनवेनप्रुद्धेनवस्त्रेणापरिवेष्ट्यमांसितेनभस्मनासम्यगर्चयेन्मूलमंत्रतः॥४१॥
चंदनेनसुगंधेममूलमंत्रेणार्चयेत्ममप्रेत्वेकेकपूजातेदेपमाचमनंमम॥४२॥ततः
शालपक्षतैश्चेतैरर्चयेन्मातिलान्वितैः ततोदल्वदलैःप्रुद्धैरर्चयेदघनाशकैः॥४३॥बिल्व
पत्रंगृहाणशिवबिल्वपत्रप्रिवप्रभो प्रसीदभगवन्शंभोपातकान्निहरस्वमे॥४४॥अमुकं
त्रंसमुच्चार्यमूलमंत्रमधिये बिल्वपत्रैःसमभ्यर्चपुष्पैरपिसमर्चयेत्॥४५॥साज्ये

मागरुसारेणासुगंधेनमनोहरः धूपस्ततःकल्पनीयोमूलंयत्नपरःसदा॥४६॥धूपग्रहा
णदेवेशसुगंधंसघृतंशिव पातकान्निहरस्वेशधूपदानेनमादरं॥४७॥दीपंगृहाणदेवेश
पातकध्वांतनाशकं प्रसीदपार्वतीनाथदीनबंधोदयानिधो॥४८॥इतिदत्वाधूपदीपौनवेद्य
परिकल्पयेत् ततःपरंकल्पनीयंकरोद्वर्तनमादरात्॥४९॥ततःपरंधूपमेशानतांबूलमि
दमुज्ज्वलं एलालवंगकर्पूरयुक्तमुमापते॥५०॥ततःप्रदक्षिणाःकार्याद्वादशैकादश
शाथवा ततःप्रणामाःकर्त्तव्याएकविंशतिसंख्यया॥५१॥नृत्तंचततःकार्यंसांवध्या
तपुरस्सरं शिवपंचाक्षरःप्रुद्धोजपनीयःप्रयत्नतः॥५२॥अष्टोत्तरसहस्रंतुन्यासध्यान
पुरःसरं शिवपंचाक्षरीजप्यंहृन्यासादिकंविना॥५३॥ततःपरंविल्वपत्रैःपुष्पैर्नो
नाविधैरविधैरवि पुनःपूजाप्रयत्नेनकर्त्तव्यातिप्रयत्नतः ततःछत्रंचामरंचदर्पणंच
निवेदयेत्॥५६॥पुर्ननैत्वाक्षमस्वेतिसंस्पृशेद्ध्यानपूर्वकं स्पर्शंकृत्वापुनर्मंत्रममुमेव

Indira Gandhi National
Centre for the Arts

पठेच्छिवे॥५७॥अयंमइतिमंत्रेणास्यघ्राहस्ततलेनमां अघोरास्त्रार्तमंत्रोजयनीयः षडक्षरः
॥५८॥एवंपूजान्वहंकार्यात्रिषुकालेषुसादरं निसापूजेयमलेभुक्तिमुक्तिफलप्रदा॥५९॥प्रा
तःसंध्याविधायादौपूजनीयोन्वहंशिवः कार्यमन्यन्नकर्तव्यमामनभ्यर्च्यसर्वथा॥६०॥एवंप्रय
लतः कार्यरात्रौनेमंमपूजनं पृथाकथंचित्कर्तव्यमरात्रौनापिसर्वथा॥६१॥नपेयंजलमप्यादौमा
मनभ्यर्च्यसर्वथा पिबेद्यादप्रमादेनरतःपापीभविष्यति॥६२॥असत्कुलप्रसूतानामभाग्यानांदुरा
त्मनां निसंमर्चनेश्रद्धाकलौनउपभविष्यति॥६३॥अन्यकर्मरतादुष्टावेदमार्गविवर्जिताः द्विजाःक
लौभविष्यंतिशिवपूजापराङ्मुखाः॥६४॥अर्च्यंशिवमनर्च्यादावनर्च्यार्चनतत्पराः द्विजाः कलौभ
विष्यंतिशिवपूजापराङ्मुखाः॥६५॥शिवमर्च्यमनर्च्यान्यमनर्चंयोर्चयिष्यति सजारजइतिज्ञेयो
वेदमार्गबहिष्कृतः॥६६॥मदर्चनपरोनित्यंत्रिकालंभविष्यति तमूर्ध्वनेउनिशंमित्रतिज्ञेयंम
मप्रियं॥६८॥स्नोद्भूतनसंसक्तोपत्रिकालंभविष्यति तमूर्ध्वनेउ०॥६९॥त्रिपुंड्रधारणासक्तो

पत्रिकालंभविष्यति तम०॥७०॥पंचाक्षरजपासक्तोपत्रिकालंभविष्यति॥७१॥मदेकशर
णोनित्यंयोमांसंभ्यर्चयिष्यति तम०॥७२॥मत्कथाश्रवणासक्तोमन्मनोयोभविष्यति तम०॥७३॥
मद्दत्तयासततंयुक्तोयोमद्याजीभविष्यति तम०॥७४॥मामेवसततंध्यायायःप्रद्वेषोभविष्यति
तम०॥७५॥रुद्राध्यायेनसततंयोमांसंस्नापयिष्यति तम०॥७६॥बिल्वपत्रैस्त्रिशार्वेमांनित्यं
पूजयिष्यति तम०॥७७॥अर्चयिष्यतियोनित्यमखंडैःशालितंडुलैः तम०॥७८॥पक्वान्नित्यंतिलैः
कृष्णैःश्वेतैर्वापूजयिष्यति॥७९॥असितैर्वासितैर्वामांसिद्धार्थैर्योर्चयिष्यति तम०॥८०॥नीवारतं
डुलैः साग्रैर्योमानर्चयिष्यति तमः॥८३॥शामकतंदुलैर्नित्यंयोमभ्यर्चयिष्यति तम०॥८६॥
नित्यंस्तुवर्णपुष्पैर्मांयोर्चयिष्यतिभक्तितः तम०॥८७॥नित्यंचंपकपुष्पैर्मांर्चयिष्यतिसा
दरं तम०॥८८॥नित्यंकुरुयेर्मांयः शिवमभ्यर्चयिष्यति तम०॥८९॥कमलैरमलैरम
लैर्भक्त्यायोमामभ्यर्चयिष्यति तम०॥९०॥नीलोत्पलैःपुंडरीकैर्योमांमभ्यर्चयिष्यति तम०॥९१॥

Indira Gandhi National
Centre for the Arts

कल्हारैः परयाभक्त्यायोमामभ्यर्चयिति तम०॥९२॥पुन्नागैः सततंभक्त्यायोमामर्चयि तम०॥९३॥शात
पत्रैरनर्घैर्नायोमामभ्यर्चयिष्यति तम०॥९४॥कदंवपुष्पैरमलैर्योर्चयिष्यतिसादरं तम०॥९५॥ना
गचंपकपुष्पोर्नायोर्चयिष्यतिभक्तितः तम०॥९६॥सितासितैः पारिजातैर्योर्चयिष्यतिनांशिवं तम०॥९७॥
अर्चयिष्यतिमायक्तकरवीरैः सितासितैः तम०॥९८॥विविधैर्मल्लिकापुष्पैर्योमामभ्यर्चयिष्यति
तम०॥९९॥धत्तूरकुसुमैः प्रदैर्योर्चयिष्यतिमांप्रभुं तम०॥१००॥विविधैरर्कपुष्पैर्नायोर्चयि
ष्यतिभक्तितः तम०॥१॥द्रोणपुष्पैः शमीपुष्पैर्योर्चयिष्यतिमांप्रभुं तम०॥२॥योक्तदाडिमिपु
ष्पैर्नांसावमभ्यर्चतिं तम०॥३॥निलमर्जुनपुष्पैर्नायोर्चयिष्यतिसादरं तम०॥४॥पक्तकंदलपु
ष्पैर्नांनिलमभ्यर्चयिष्यतितम०॥५॥योविल्वपत्रांतकुसुमैर्निलमभ्यर्चयिष्यति तम०॥६॥यो
निलंबहतीपुष्पैर्नामीशंपूजयिष्यति तम०॥७॥जंबूपुष्पैराम्रपुष्पैर्योमामभ्यर्चयिष्य
ति तम०॥८॥पक्तवेतसपुष्पैर्नांसादरंपूजयिष्यति तम०॥९॥कुशापुष्पैःकाशापुष्पै

र्योमामभ्यर्चयिष्यति तम०॥१०॥बंधूकपुष्पैरमलैर्योर्चयिष्यतिमामजं॥११॥पलाशपुष्पै
रमलैर्योर्चयिष्यतिमामजं तम०॥१२॥लोध्रपुष्पैरतिश्वेतैः सांबंमामर्चयिष्यति तम०॥१३॥जपाप्र
सूनतुलसीपत्रैर्योर्चयिष्यतिमानवः तम०॥१४॥पूजयिष्यतियोमभक्त्यानियंदमनकैनमां तम०॥१५॥
पूजयिष्यतिमायक्तजंबीन्नबदरीफलैः तम०॥१६॥योमांद्राक्षाफलैरीशमभ्यर्चयतिसादरं
तम०॥१७॥नारिकेलफलैर्यक्तमामर्चयतिसादरं तम०॥२०॥दूर्वायामार्गदमैर्मांभक्त्यार्पा
भ्यर्चयिष्यति तम०॥२१॥भृंगराजरामीपत्रैर्योमामभ्यर्चयिष्यति तम०॥२२॥दध्यन्ने
नाज्यपुक्तेनयोमामभ्यर्चयिष्यतिमांमभ्यर्चयिष्यति तम०॥२३॥क्षीरान्नेनाज्यपुक्तेनयोमा
मभ्यर्चयिष्यति तम०॥२४॥शर्करघृतथ्वान्तैर्योमामभ्यर्चयिष्यति तम०॥२५॥मदालयेदीप
मालांयक्तनियंकरिष्यति तम०॥२६॥कर्पूरदीपदीपांक्तमत्यभक्त्याकरिष्यति तम०॥२७॥
साज्यगुग्गुलधूपेनयोमांसंपूजयिष्यति तम०॥२८॥यः साज्यागुरुधूपेननियंमांधूपयिष्य

Indira Gandhi National
Centre for the Arts

ति तम्॥२९॥आर्यावर्तेऽथाकश्चित्ब्राह्मणोवेदवित्रमः भसितोद्धूलितवपुस्त्रिपुंड्रांकितमस्तकः
॥३०॥रुद्राक्षमालाभरणः सांबमामजमीश्वरं संपूज्यबिल्वपत्रैराललोकमुदितःस्थितः॥३१॥तदा
नीमागतःकश्चिन्मदंत्यसुरपूजकः दृष्ट्वातल्ललाटोगोम्रांतोब्राह्मणंवराजः॥३२॥सदेववि
न्मोवित्तंदृष्ट्वामठचैतसंधेर्यंकृत्वाकियत्कालंतरंपरिणम्यवचनं॥३३॥ब्राह्मणः मन्तिदित्व.
ललाटंगगद्गदमुखदूरतः मादर्शयमुखमत्यशिववाचितदुर्भगा॥३४॥भस्मालयानित्रिप्रोक्ता
ललाटंवदविप्रमेः तद्भस्मलेपनायाहुस्तत्कथंनिश्चितंमहा ३५ त्रिपुंड्रंभस्मनेत्याहुश्रुतिभिर्भस्म
धारणंश्रावश्यकमितिप्रोक्तंकथंनहतेत्वया ३६ त्वयावेदमनर्थ्यंनिश्चितंनेस्मर्यतेकथं सत्यवद
त्यादिधर्मान्सावधानेनसंस्मर ३७ अनुस्मिष्यसेभोस्त्वंयथापमुपार्जनं भ्रमेणापिकृतंकर्मपापस
पारंध्रुवं ३८ उद्धूलनंत्रिपुंड्रंवाणमात्रमपिहिद्विजैः नत्याज्यमेवनत्याज्यंनत्याज्यंसत्समुच्यते ३९ उद्
धूलनंत्रिपुंड्रंवब्राह्मणोयदिसंत्यजेत् प्रमादात्स्ववामोहात्सयानरंध्रुवं ४० संध्यात्यागेनविप्राणांब्रा

ह्मणप्रच्यवोयथा तथैवभस्मत्यागेनब्राह्मणप्रच्यवोध्रुवं॥ ४१॥यज्ञोपवीतत्यागेनब्राह्मणप्रच्यवो
पथा तथैवभस्मत्यागेनब्राह्मणप्रच्यवोध्रुवं॥४२॥स्वाध्यायाध्ययनाभावेब्राह्मणप्रच्यवोयथातथैव
भस्मत्यागेनब्राह्मणप्रच्यवोध्रुवं॥४३॥नादर्शयमुखमत्यमूर्ध्वपुंड्रविनिर्दितं स्वयंनहोन्य
नाथार्थमुद्योगंकुरुवेकर्यं॥४४॥त्रिपुंड्रधारणंकृत्वाप्रातःकार्यंशिवार्चनं ताद्विहायक
यंत्रांसास्त्वारःक्रियतेत्वया॥४५॥प्रातःशिवार्चनंकार्यंभस्मधारणपूर्वकं तस्मान्नप्रमदोभमादि
तिवेदःस्मृतोनकिं॥४६॥त्रिसंध्यमपिसंपूज्यशिवलिंगमितिश्रुतिः कथंनस्मर्यतेमूढमं
त्रोज्ञातःकथंवदा॥४७॥शिवउवाच इत्युक्तमादोवचनंविप्रस्त्वाततः परं तंप्रणम्यज
गादेवंकृतांजलिपुटः शिवं॥४८॥द्विजउवाच द्विजानेनमयाभालंमदा म्नायाघदूषितं
पापश्चित्तंकथंस्यान्नवदस्वबालत्वोदितं॥४९॥शिवः इत्युक्तोद्विजंसम्यक्प्रणम्यचपुनः
पुनःस्तुत्वाचकारविधिवत्प्रायश्चित्तमतंद्रितः॥५०॥ततोमस्तोद्धूलनादीनिनिसर्गकुर्वन्ततोद्रितः॥५१॥

Indira Gandhi National
Centre for the Arts

ततःप्रयातेतः कार्यविघ्नेरुद्भवादिकं तत्यागेसर्वथाविघ्नंषाब्रह्मन्नपतःशिवे॥५३॥धर्मार्थकाममो
क्षेषायेमांतुसर्वथा मदर्चनंप्रयातेनकर्त्तव्यंविधिपूर्वकं॥५४॥मदाराधनसंसक्तांयेमदेकप
रायणाः तेषांतुनरकावासोनभविष्यतिसर्वथा॥५५॥पुरायमभटाः क्रूरायमशासनकारिणाः स
चरंतोवनोपवेसोत्साहंसंस्थिताः शिवे॥५६॥तदाकश्चित्द्विजवरोमदर्चनपरायणाः उद्दालब
त्रिपुंड्राभ्यांरुद्राक्षैश्चविभूषितः॥५७॥पंचाक्षरजपासक्तोमत्पूजानिरतः सदा उवासविल्व
छायायांचिल्वपत्राब्रनाश्रयः॥५८॥ब्राह्मणाः द्विजोत्तमयापूर्वंपातकंबहुभक्तं इदा
नोमपिपापप्रोतनिहत्तमनोममा॥५९॥किंचिद्दूनशतंजातंवत्सराणामपिद्विजस्वर्थार्थंस्वर्ग
स्थोवामरणंमेभविष्यति॥६०॥तदातंद्विजमालोक्यब्राह्मणाः कश्चिदागतः ततस्तंमनिवाघद
वेभावेवचनंद्विजः॥६१॥किंचत्वन्नोपिजानासिकश्चित्पूर्वदिनेद्विजे तद्दृष्टंस्वप्नवत्तातस्मरा
मस्यद्विजोत्तम॥६२॥नीलाद्रिसान्निभादायमद्दनाभायानका अतःपरंद्विजाधीशकिं

कर्त्तव्यंवदस्वमे॥६३॥यदुक्तंतद्वचःश्रुत्वातमुवाचद्विजोत्तमः परदुःखप्रहारेणुस्तवज्ञाःशि
वचिंतकाः॥६४॥द्विजातेयदिमोक्षेछातदायत्नेनसादरं कुरुदेवाधिदेवस्यमहादेवस्यपूजं
नं॥६५॥महादेवार्चनात्पुंसांविनश्यंत्यघकोटयः सत्यंसत्यंपुनःसत्यमुद्धृत्यभुजमुच्यते
॥६६॥शंकरस्मरणादेवविनश्यंत्यघकोटयः यत्पूजनाद्धिनश्यंतिपापानीत्रनास्तुत
॥६७॥शिवपूजनमात्रेणमुच्यतेदुःखसागरात् सत्यमित्यादिवाक्यानिसंतिवेदेषुभू
रिशः॥६८॥वेदाःप्रमाणमस्माकं ब्राह्मणानांनसंशयः॥६९॥शिवपूजाविनामोक्षोनभविष्यतिसर्वथा सत्यमित्यादिवाक्यानिस
तिवेदेषुभूरिशः॥७०॥वत्सरादूरणान्मोक्षोनयागोर्विविधैरपि किंतुमोक्षोमहादेव
पूजयैवेतिहिश्रुतिः॥७१॥धर्मार्थकाममोक्षस्तुशिवपूजाविधेःफलंसत्यमित्यादिवाक्या
निसंतिवेदेषुभूरिशः॥७२॥ततःपूजयदंशंमहादेवसुमापतिं उद्दालनादिकंकृत्वा

Indira Gandhi National
Centre for the Arts

जाबालोक्तविधानतः ॥७३॥ इतितद्वचनंश्रुत्वाविश्वस्यद्विजपुंगवः स्वात्वाद्भुतोद्भूतादिवकाराशिवपूजनं ॥७४॥ततोनत्वामहादेवंसम्यक्स्तुत्वाचनर्तनं ॥७५॥ततः सद्भः स्वान्यपिलान्यपास्यनदनुग्रहात् मदूपमगमद्दिव्यंतन्मस्जाविस्मयान्वितः फलं ॥७६॥तदानीद्विज संवादंश्रुत्वातेयमकिंकराःतत्पुरुषंचपतितंविलोक्यतमुपायपुः ॥७७॥ततस्तेदूतोन. त्वाविल्वार्जुनपदद्विजं किंनपंपुरुषोमुक्तइतियप्रछुरादरात् ॥७८॥मुक्तएवेतिद्वाभ्रुत्वातमभिपूज्यते यपुरंतवेगेनयमस्यैवनिकेतनं ॥७९॥ततस्तेयममालाकसभासन्दिरुपासितं दंडनिवेद्यकालायतस्थुरिवन्नमुखाभटाः ॥८०॥यमः खिन्नमुखान्दूतान्विलोक्यासंतदुःखितः किमासीदितिपप्रछुतेचतांतंन्यवेदयन् ॥८१॥ततस्तद्वचनंश्रुत्वाप्रहस्यमुदितानतः यमोवचनंचरुपमहतहितावहं ॥८२॥यमउवाच महादेवाराधनंश्रुत्वाप्रहस्यमुदितानतः यमोवचनंचरुपमहतहितावहं ॥८३॥प्राप्यते

सर्वथामुक्तिः शिवपूजकपूजकैः मुक्तिर्नलभ्यतेकिंतैः साक्षाच्छंकरपूजकैः ॥८४॥शिवलिंगार्चनंकृत्वाशिवलिंगस्यसन्निधौ येनपंक्तातनुंत्यजेनमुक्तिः प्राप्तेवसर्वथा ॥८५॥भस्मधारणमात्रेणमुक्तिःसंप्राप्यतेनरैः ततः कथंनसंप्राप्यामुक्तिः शंकरपूजया ॥८६॥शिवपूजनरतदृष्ट्वाभस्मधारणतत्पराः कीकटेपितनुत्सृज्यशिवरुपंव्रजंतिहि ॥८७॥शिवपूजमहात्म्यंशिवेनज्ञायतेध्रुवं तदन्येस्तत्कथंज्ञेयंतत्वतोस्माभिरादरैः ॥८८॥रावणस्यपुजानंतिसम्यग्रात्नपरीक्षकाः तथाशिवार्चनस्यापिमहात्म्यंवेदशंकरः ॥८९॥अतःपरंहितंवक्ष्येश्रुत्वैवंतयलतः कर्तव्यमपिवक्ष्येहमंत्रमादेनसादरं ॥९०॥त्रिपुंड्रमात्रयभालेभासते भस्मनाकृतं तानुदक्षाप्रियमेधासः प्राप्यंताघ्यादिसाधनैः ॥९१॥अतःपरंहितंवक्ष्येश्रुत्वैवंतयलतः कर्तव्यमपिवक्ष्येहमंत्रमादेनसादरं ॥९२॥त्रिपुंड्रंरुद्राक्षधरःशिवपूजोपरायणः शिवएवतिविज्ञेयोभवाब्दिःसर्वथाभटाः ॥९३॥भासतेभालमनिशंयस्यकेवलभस्म

Indira Gandhi National Centre for the Arts

नातस्पमालाक्षतामालेलिखितेवनसंशयः॥९३॥भस्मरेखात्रयंस्पृष्टंतन्मालाक्षत्रयं मालाक्ष
इतिसंज्ञायितदाकारैर्लिखति॥९४॥मालयदेभस्मरेखांस्वरूपैस्त्रिभिरक्षरैःमालाक्षतामा
विनीतिमालाक्षाक्षरलेखनं॥९५॥अतः केवलभस्माकाः शिवपूजापरायणाः शिवाका
राईतिज्ञेयाःसर्वसंपत्तेनसंशयः॥९६॥भस्मोद्धूलितसर्वांगान्दृष्ट्वात्सोत्साहमन्वहं पूजय
त्वंतियात्तेनमंत्रमालस्पराङ्मुखाः॥९७॥रुद्राक्षमालाभरणान्भस्मधारणापूर्वकं पूजय
त्व०॥९८॥शिवलिंगार्चनासक्तान्भस्मधारणापूर्वकं पूजयंत्व०॥९९॥शिवनामजपसक्तान्
भस्मधारणापूर्वकं पूज०॥१००॥शिवप्रदक्षिणासक्तान्भस्मधारणापूर्वकं पूज०॥१॥शि
वाभिवादनासक्तान्भस्मधारणापूर्वकं पूज०॥२॥शिवाग्रेनर्तनासक्तान्भस्मधारणा
पूर्वकं पूज०॥३॥धूपदान्रशंकरस्यानेभस्मधारणापूर्वकं॥४॥दीपदानशंकरस्यानेभ
स्मधारणापूर्वकं पूज०॥५॥सोमवारव्रतपरान्भस्मोद्धूलनपूर्वकं पूज०॥६॥प्रदोष

पूजनासक्तान्भस्मोद्धूलनपूर्वकं पूज०॥७॥निसंशिवकथासक्तान्भस्मोद्धूलनपू
र्वकं पूज०॥८॥भस्मार्द्रनीव्रतपरान्भस्मोद्धूलपूर्वकं पूज०॥९॥त्रयोदशीव्रतपरानभ
स्मोद्धूलनपूर्वकं पूजयं० रुद्राध्यायजपासक्तान् भस्मोद्धूलनपूर्वकंपूज०॥११॥रुद्रा
भिषेकसंसक्तान्भस्मोद्धूलनपूर्वकपूजयं०॥१२॥शिवध्यानरतान्निसंभस्मोद्धूलनपूर्व
कं पूजयं०॥१३॥शिवभक्तार्चनपरान्भस्मोद्धूलनपूर्वकं पूजयं०॥१४॥बिल्वपत्रार्ज
नरतान्भस्मोद्धूलनपूर्वकं पूज०॥१५॥बिल्वपोद्यानसंसक्तान्भस्मोद्धूलनपूर्व
कं पूजयं०॥१६॥बिल्वारोपणासंसक्तान्भस्मोद्धूलनपूर्वकं पूज०॥१७॥बिल्वस्थां
नसंसक्तांभस्मोद्धूलननपूर्वकं पूजयं०॥१८॥बिल्वपूजनसंसक्तान्भस्मोद्धूलनपूर्वकं पूजयं०
॥१९॥बिल्वदर्शनसंसक्तान्भस्मोद्धूलनपूर्वकं पूजय०॥२१॥बिल्वाभिवादनासक्तान्भ
स्मोद्धूलनपूर्वकं पूजयं०॥२२॥शिवहरभवभर्गभीमशंभोत्रिनयनशंकरशर्वचं

Indira Gandhi National Centre for the Arts

द्रमौले भवशरणमितीरयंतयेतान्भजंत मुदविनयेनपूजयध्वं॥२३॥पुरहरसुनाथमन्म
थारेहरिनयनामलयज्ञपतिताघ्र भवशरणं०॥२४॥निरुपमकरुणासुधैकसिंधोगिरिश
महेश्वरपावंतीराशंभो भवशरणं०॥२५॥धृतभसितभुजंगराजराजत्रियहरिब्रह्ममहि
व्यनीलकंठ भवशरणं०॥२६॥विनिहतनरसिंहचर्मवस्त्रासुरदुष्कंधराग्निमस्तंभव०॥२७॥
विहितविनोदितभास्वराघ्रमस्तंभवशरणं०॥२८॥शरणादशिविद्विषत्कालकालत्रिदशा
वरामरसविताघ्रिपीठ भव०॥३०॥येभस्मधारणात्सत्कोहोमकुर्वंतिमानवाः तान्पातय
ंतुनरकेघेतिघोरेषुपातनेषु॥३१॥येभस्मधारणात्सत्कोहोमकुर्वंतिमानवाः तान्० ये
भस्मधारणात्सत्कोपिबंतिजलमादरात् तान्०॥३३॥येभस्मधारणाधारणाधारणात्सत्को
भक्षयंतिफलादिकं तान्०॥३४॥येभस्मधारणात्सत्कास्त्वेषंकुर्वंतिभोजनं तान्०॥३५॥
येरुद्राक्षानधत्वेवसंध्याकुर्वंतिमानवाः तान्०॥३६॥येरुद्राक्षाधनधत्वेवहोमकु

र्वंतिमानवाः तान्०॥३७॥येरुद्राक्षानधत्वेवपिबंतिजलमादरात् तान्०॥३८॥येरुद्राक्षा
नधत्वेवभक्षयंतिफलादिकं तान्०॥३९॥येरुद्राक्षानधत्वेवस्त्वेषंकुर्वंतिभोजनं तान्०
॥४०॥येशिवाराधनंसत्कापिबंतिजलमादरात् तान्०॥४१॥येशिवाराधनं सत्कास्त्वेष
कुर्वंतिभोजनं तान्०॥४३॥ येश्रीरुद्रजपंसत्कापिबंतिजलमादरात् तान्०॥४४॥येश्रीरु
द्रजपंसत्काभक्षयंति फलादिकं तान्०॥४५॥येश्रीरुद्रजपंसत्कास्त्वेषंकुर्वंभोजनं तान्०
॥४६॥पंचाक्षरजपंसत्कायेपिबंतिजलंजनाः तान्०॥४७॥पंचाक्षरजपंसत्कायेफ
लादिचभक्षितं तान्०॥४८॥पंचाक्षरजपंसत्काभुक्तंयेरादराज्जनैः तान्०॥४९॥
रुद्राभिषेकंपानीयंनपिबंतिसुन्यहंचये तान्०॥५०॥येनकुर्वंत्यहरहः प्रणामान्शूल
पाणये तान्॥५१॥येनकुर्वंत्यहरहर्बिल्वपत्रैः शिवार्चनं तान्०॥५२॥येनकुर्वंत्यहर
हः शिवाग्रेनर्त्तनंमुदातान्॥५३॥ येनकुर्वंत्यहरहः त्रिकालेशंकरार्चनं तान्०॥५४॥

Indira Gandhi National Centre for the Arts

येनकुर्वंत्यहरहर्भस्मोद्धूलनमादरात् तान्०॥५५॥येनकुर्वंत्यहरहस्त्रिकालंभस्मधारणं तान्०
॥५६॥येनकुर्वंत्यहरहः पंचाक्षरजपंद्विजात्०॥५७॥येनकुर्वंत्यहरहःश्रीनंदुद्रुजपंद्विजाः
तान्०॥५८॥येसोमवासरेस्वेष्टंदिवाकुर्वंतिभोजनंतान्॥५९॥शिवरात्रिव्रतंपुण्यंयेनकु
र्वंतिदुर्द्धियः तान्०॥६०॥येवांशिवकथालापेघश्रद्धादुःखनाशनं तान्०॥६१॥येनकुर्वंतिस
ततंस्वशक्त्याशिवपूजनं तान्०॥६२॥येनकुर्वंतिसततंस्वशक्त्याशिवदर्शनं तान्०
॥६३॥येकुर्वंतिमंत्रनेत्रंपिशिवानंदामघास्त्रेया तान्॥६४॥सुरायानादेसंस्पृष्टायेपापंघान्त्र
राधमाः तान्०॥६५॥येचसंतिद्विजाभस्मोशिवपूजापराङ्मुखाः तेभ्यःस्वाहानिरकाण्येतान्यत्र
यामटाः॥६६॥येभस्मधारणंसत्काजलाघाहारतत्पराः तेभ्यः॥६७॥चकारभोजनंमत्तस्त्काप्रभ
स्मधारणा अतोयमग्निकुंडेस्मिन्पतितः परिवर्त्तते॥७०॥प्रज्वलच्छस्त्रकुंडेषुपतिष्यत्यघमोहनाः
ततःसंतप्तरुधिरेपतिष्यत्यघमोहनाः॥७१॥सार्द्धंवर्षसहस्रेषुनरकेघवंस्थित्वाततःपरं चंडाल

योनिष्वेवायंमनुष्यत्वंनिमेष्यति॥७२॥एकैकनरकावासः कल्पैःशतयुगावधिः तावत्पर्यंतमनिश
मतिदुःखंभविष्यति॥७३॥येभस्मधारणंसत्काश्वेष्टंकुर्वंतिभोजनं तेषामेतादृशीघोरायातनात्रहि
जायते॥७४॥येशिवाराधनंसत्काश्वेष्टंकुर्वंतिभोजनं तेषामेतच्छाङ्गुणायातनात्रभविष्यति॥७५॥शि
वार्चनंशिवध्यानंमंतकालीनमाप्तियात् तद्धराकृत्यदुरितंमोक्षंदास्यतिसंशयः॥७६॥नाहापातकि
नोपंतेशिवपूजांविधायते प्राणांस्त्यजंति तेषांन्यायातनानभविष्यंति॥७७॥दुर्लभंदुर्लभंपुंसा
मंतकालेशिवार्चनं सप्तसप्तमिदंसत्यमुद्धृत्यभुजमुच्यते॥७८॥राकारान्ग्रहजातंकुर्वंतंशि
वार्चनं तेनसद्योभवंत्येकजन्मनिधूतकल्मषाः॥७९॥शिवार्चनेननश्यंतुपापेषुविविधेष्वपि ततः
संप्राप्नुवंत्येवशिवमकल्मषाः॥८०॥शिवार्चनंविनाप्तिपापनाशस्तथासति शिवार्चनेननश्यंति
पापानिविधान्यपि॥८१॥शिवार्चनपरःपापान्नबिभेतिकदाचन कृतशिवार्चनेपापान्यस्तंयांति
वसर्चया॥८२॥यथादावानलेशीघ्रंनश्यंतितृणभादयः तथाशिवार्चनेवनश्यंत्यघकृतक्षणा
त्॥८३॥यःशकरार्चनपरोभस्मोद्धूलनपूर्वकं अनन्यशरणोनित्यंसपापंनैवाबिभेतिक

Indira Gandhi National
Centre for the Arts

दाचन कृतेशिवार्चनेपापान्यस्तंयांत्येवसर्वथा॥८३॥यथादावानलेशीघ्रंनश्यंतिशलभादयः तथाशिवार्चनेनैवनश्यत्यघकुलक्षणात॥८३॥यःशंकरार्चनपरोभस्मोद्धूलनपूर्वकं अनन्यशरणोनित्यंसपापैर्नैवलिप्यते॥८४॥अनन्यशरणानित्यंशंकरार्चनतत्परः तएवधन्याःपूज्याश्चप्रयातेनान्यवासरं॥८६॥त्रिपुंड्रधारणप्रीतियेषांस्वाभाविकीभवेत् तएवधन्य॥८७॥शिवलिंगार्चनप्रीतियेषांस्वाभाविकीभवेत् तएव॥८८॥रुद्राक्षधारणप्रीतियेषांस्वाभाविकीभवेत् तएव॥८९॥रुद्राध्यायजपेप्रीतियेषांस्वाभाविकीभवेत् तएव॥९०॥पंचाक्षरजपेप्रीतियेषांस्वाभाविकीभवेत् तएव॥९१॥शिवार्चनपराःसर्वेचतुर्वर्गफलाश्रयाः ततःशिवार्चनपरैरप्राप्यनास्तिसर्वथा॥९२॥येयजंतिमहादेवमुपचारैःकृतषोडशैः तेसर्वैर्भाग्यमतुलयाभविष्यंतिनसंशयः॥९३॥यस्यस्मरणमात्रेणसंप्राप्यतेजनैः तस्यार्चनेनसौभाग्यमवश्यंप्राप्यतेजनैः॥९४॥मुक्तिमुक्तिप्रदन्येषांमहादेवस्यपूजनं सत्यंसत्यंपुनःसत्यमुद्धृत्यभुजमुच्यते॥९५॥शिवपूजाविहापान्यन्नाभीष्टफलदायकं सत्यंसत्यं॥९६॥वैकुंठलोकंसंप्राप्यविष्णुःशंकरपूजया सत्यं॥९७॥सत्यलोकंविधिःप्रापशंकरस्यैवपूजया सत्यं॥९८॥शंकरार्चनादेवस्वर्गंप्रापशचीपतिः सत्यं॥९९॥किंचकिंवदुनोक्तेनसत्यंत्वेकंचवोमय अशेषानर्थहत्रशेषांस्तुनकदाचना॥३००॥शेषास्तेयेमहादेवमनन्यशरणाःसदा पूजयंतियतस्तेनतेसंपूज्यामध्रुवं॥१॥शेषास्तेयेमहादेवमनन्यशरणाः सदा पूजःयंभस्मछन्नसर्वांगास्त्रिपुंड्राकिंतमस्तकाः तेशेषाः॥शंकरासक्तास्तुदृज्यानमध्रुवं॥२॥येकंठार्पितसंशयं॥४॥येषांभस्मनिरुद्राक्षेभक्तिरव्यभिचारिणी तेषां॥५॥येकुर्वंतिशिवध्यानमप्रमादेनसर्वदा तेषां॥६॥येचकुर्वंतिपत्तेनसोमचारुव्रतेजनाः तेषांः तेषां॥७॥येकुर्वंतिशिवस्थानेधर्मदानप्रयत्नतः तेषां॥८॥येकुर्वंतिशिवस्थानेदीपमालांप्रयत्नतः तेषां॥९॥येकुर्वंतिप्रयत्नेनबिल्वपत्रैःशिवार्चनं तेषां॥१०॥येकुर्वंतिप्रयत्नेनभस्मरुद्राक्षधारणं तेषां॥११॥येकुर्वंत्यतियत्नेनरुद्राध्यायजपंमुदा तेषां॥१२॥येकुर्वंतिप्रयत्नेनपंचाक्षरजपंमुदा तेषांमुक्तिर्भवत्येवमाकुर्वंत्वत्रसंशयं॥१३॥शेषास्तुरुद्रारु

Indira Gandhi National Centre for the Arts

द्राक्षभो गिभोगविभूषणाः त्रिपुंड्रचंद्रार्द्धधरानिसंशंकरकिंकराः॥१४॥कुःसमीक्षापितुरांतकोम्यकिं
करकिंकरान् यैरिंद्रोपेंद्रचंद्राद्याःसुरार्चासमुपेक्षिताः॥१५॥इंद्रोपेंद्रादयोदेवीः शेचानंदघ्रातियात
तः अम्युक्षायार्घ्यपाद्यैः पूजांकुर्वंतिसादरं॥१६॥भरिभाग्यप्रभावेनशैवान् पूजयतेनन्वस
क्रितः॥१८॥रुद्राक्षभस्मभरणाः शिवैकपरदेवताः पूज्याभवंतियत्नेनब्रह्मनारायणादिभिः॥१९॥
मागछंतुभ्रमुरणापि पूयेरोवग्रहान्प्रति भवद्रूपसमालोकतेषांपीडाभविष्यति॥२०॥भवत्कृतंय
दिभवेत्तेषांदुरंतदामया साज्याभनंतःसर्वोपिशिक्षरणीयाश्चयत्नतः॥२१॥भवद्भिःशिवपूजा
र्थंगम्यतेयदिसादरं सोम्यरूपधरैरेवगंतव्यंपुष्पपाणिभिः॥२२॥पृथाशिवार्चनेप्रीतिस्तथाशै
वजनार्चने प्रीतिः कार्यातयाप्रीसाप्रीतोभवतिशंकरः॥२३॥पुराविष्णुप्रभृतिभिः कदाविभ्रुतले
गतं तदाहिपालयंप्रातेददृशुः शिवपूजकं॥२४॥भस्मोद्धूलितसर्वांगात्रिपुंड्रांकितमस्तकं रुद्रा
क्षमालाभरणंपचाक्षरपरायणं॥२५॥एतादृशंविलोक्येतेरोमांचांचितविग्रहाः शिवंसपू

ज्यनत्वातंप्रणम्यरतिभक्तितः॥२७॥ततः कृतांजलिपुटाविद्म्वा घास्तत्रसंस्थिताः शैवः सना
पूजांताविम्वादीनवलोकयत्॥२८॥कृतांजलिपुटानदेवानदृष्ट्वासंतुष्टमानसः प्रणम्यरो
वद्भ्यातानकुशलंपर्यपृछत॥२९॥ततः प्रसन्नवदनेविष्णुः शिवपरायणः उचाचचचनंचा
रुश्रद्धाभक्तिपुरःसरं॥३०॥यद्भवद्भिर्नजातेतत्तुपुरायेनभूयसा अतः परंतुकुशलमस्माकंभावि
सर्वदा॥३१॥शिवैकरारणास्पाघदंत्वत्पादपंकजं अतः परंतुकल्यारणमस्माकंभाविसर्वथा॥३२॥
शिवभक्तस्यसंसर्गः कल्यारणंतनुतेनृणांकिंशिवपूजापरैः शैवैर्वहवः पूर्वमुद्धृताः॥३३॥यस्यांगे
भस्मितं भातिभवरोगभयापहं तद्दर्शनंभाबुकानिभयंसंजननिष्यति॥३४॥यस्यास्तिरुद्रा
क्षनित्यभक्तिरव्यभिचारिणी तद्दर्शनेनपापानिनश्यंतिबहून्यपि॥३५॥त्रिपुंड्रंबालचंद्रांकरुद्रा
क्षफणिभूषणाः शैवाः शिवैकरारणाः शिवस्यापरविग्रहाः॥३६॥शिवनामामृतास्वादमोदमाना
मनीषिणः भवरिपुरूपप्रभावेनदृश्यंतेवत्सशंकराः॥३७॥इदृशीशांकरीनिष्ठाकिंनानंततपःफ

Indira Gandhi National
Centre for the Arts

लंधन्योसिवयमप्येतेधन्याःस्मस्तवदर्शनात्॥३८॥शांकरांणांदर्शनेनधन्याजाताःपुरायतः अतोवु
येचधन्याः स्मस्तवशांकरदर्शनात्॥३९॥इत्युरीदीतमाकर्ण्यविष्णुवाक्यंसशांकरः कृतांजलिपुटो
भूत्वाविष्णुंप्रत्याह शांकरः॥४०॥भस्मभासितभालायरुद्राक्षाभरणायते चंद्रचूडकिरीटायनमः
शैवायविष्णवे॥४१॥शैवोत्तमस्त्वमेवासिविष्णोधन्योसिसर्वथा ज्ञातंयत्तत्त्वयातत्वंशैवःसम्प
गसंशयः॥४२॥सएवधन्यःपूज्यश्चयस्तत्ववेदशांकरं अतःशांकरतत्वज्ञैः पूजनीयोभवान्म
या॥४३॥विष्णुर्वत्सप्रसादेनत्वयाप्रश्नसंशांकरःशांकरोनुसदानुष्यशिवैकशरणोभच॥४४॥
पमऊवाच इत्युक्तंतद्वचः श्रुत्वाविष्णुरानंदपूरितः प्रणम्याभ्यर्च्यतंशैवंजगामचतदाज्ञ
या॥४५॥अतःशैवाः पूजनीयाः प्रयत्नेनस्वशक्तितः शैवाः शिवैकशरणाःपतःशांकरविग्रहा
;॥४६॥स्वप्नेपिशैवाधिक्कारोनकर्त्तव्यः सुभस्मुनिःसत्यमेतत्सत्यमेतद्धुवमुजमुच्यते॥४७॥
शैवद्रोहोन्यमेणापिनकर्त्तव्यः इतीयंतेकदापिनैवकर्त्तव्यायांचैवंविफलाममा॥४८॥क्रियतेय

दिमोहेचभवद्भिः शैवपीडनं तदानुनरकावासोभविष्यतिमध्रुवं॥४९॥ममैवनरकावासोन
किंतुभवतामपि भविष्यतिनसंदेहः सत्यमेवोच्यतेमया॥५०॥भूयोभूयोतियत्नेनयाचेयंक्रियते
मया ततोभवंतः शैवानांपूजयंतुपदांबुजं॥५१॥सदेशोयानतस्त्याज्योयत्रास्तिशांकरः भवद्भिः
क्रूररूपैश्चतत्रगंतव्यमेवन॥५२॥किमुक्तेनात्रबहुनासारंवचनमुच्यते शैवाः पूज्याःप्रयत्ते
नभवद्भिःसाधुसाधनैः॥५३॥शिवः इत्युक्तास्तेभटाः सर्वेयत्नेनविनयान्विताः दुःखंविहाय
तेकालंप्रणेमुर्भक्तिपूर्वकं॥५४॥एतस्मिन्नंतरेदेविदुंदुभिध्वनिपूर्वकं नंदिध्वजसमाकीर्णंवि
मानंदृश्यदिवि॥५५॥तद्विमानस्थमालोक्यतेज्यः पूजमथंद्विजं पमःसंतुष्टहृदयश्चित्रगुप्तमु
वाचच॥५६॥चित्रगुप्तविमानस्थःकोयंयातिवदस्वमे किमनेनकृतंपुरापंविचार्यादरपूर्वकं
॥५७॥चित्रगुप्तउवच किंवक्तव्यमघाकालकालकालस्यकीर्तनात् पापिनोपिप्रयास्यंतेकैलासंनि
लयालयं॥५८॥ब्राह्मणोप्यपमाचारंसंत्यजापिसंगमात् स्वकुलाचारसंगस्तक्तएवदुरा

Indira Gandhi National
Centre for the Arts

म्मना॥५८॥अनेनवहवहवः शिष्टाब्राह्मणाएवंसंहताः एवंसंहताः एताः एतद्धतद्धत
ब्राह्मणानांसंख्यांकर्तुंनशक्यते॥६०॥यावोहताब्रह्मणानामनेनैवचक्रेटिशाः वित्तापहारोव
दुधाब्राह्मणानांहतोमुना॥६१॥बहुधानेनभुक्तोहिपुत्रपौत्राब्राह्मणास्त्रियः मधुनासपु
त्रोवंभुक्ताश्चान्याःपरास्त्रियः॥६२॥कदाचिद्धुवनेदक्षास्वकन्यामतिसुंदरी नामाकार्यप्रयाते
नरेमेरौतिविशारदः॥६३॥तस्यामुत्पादयामासकन्यकाद्वयमुत्तमं कालेनयौवनंप्राप्यस्थितंतत्क
न्यकाद्वयं॥६४॥ततः कामातुरोमेरुसुंदरंकन्यकाद्वयं तत्रापिजनयामासपुत्रान्दुःसंगमद्भियान्
॥६५॥एवमन्यानिपापानिकृत्वापंसंस्थितःपुराएवंस्थितोवनंप्रापकदाचिदथसंहतः॥६६॥त
त्रापश्यद्द्विजान्मार्गेदशवित्तकरान्मुदा ततस्तान्हंतुमुद्युक्तः शस्त्रंजग्राहपाणिना॥६७॥त
तोजघानतेषांद्वौद्विजानमितविक्रमान् ततस्तान्हंतुंदक्षोविप्रोदुःखमगातो॥६८॥ततस्त
तादृशंदशंदृष्ट्वाविप्राद्वौवारितावुभौ तमेवहंतुमुद्युक्तौद्रव्यलोभवशीकृतौ॥६९॥ततस्त

च्छस्त्रमादायद्विजौतौनंनिजघ्नतुः ताभ्यांहतस्सपापिष्ठःपपातपृथिवीतले॥७०॥त
दावनेनरःकश्चिच्छस्त्रपाणिरुपाययौ तंविलोक्यजगादेवपतितोप्यवनीतले॥७१॥आ
हरास्त्रंसहरेतीहराधुना इत्युक्तासजहौप्राणान्शास्त्रघातनिपीडितः॥७२॥ततस्तद्वचना
देवहंतौतौविप्रसत्तमौ ततीग्रहीतादंडंसयमोविप्रघातकः॥७३॥प्रहृष्टवदनोभिक्षो
विप्रौनिक्षिप्यभूतले तावाशाघमदास्यत्तेरुपलेश्रमहत्तरैः॥७४॥अहरेतादितद्वा
क्यंसर्वसाक्षीसदाशिवःश्रुत्वापार्श्वंस्थितान्सर्पान्प्राहगणान्प्रतिकृपानिधिः॥७५॥महा
देवः रेरेभोभ्यगणाएहिप्रणतौतद्वचः पश्चुत्वामवतश्चेतःप्रसादमुपगच्छ
ति॥७६॥अकश्चिन्महापापीमतोव्रह्मवधक्रियः तत्कृतानांतुपापानां संख्यानास्त्येवसर्वथा॥७७॥तिनैवोक्तमिदंवाक्यंश्रुतंतद्दृश्यतेमया आहारास्त्रंसहरेतो

Indira Gandhi National Centre for the Arts

प्रहरप्रहराधुना॥७८॥इत्युक्त्वासर्मितःपापीकृतघ्नस्यवधःखलः तत्पातकानिनश्यन्तिद्वा
क्योच्चारणात्तदा॥७९॥आहरेत्यादिवाक्यस्यहरनामंघनाशकंजातंहिमतकालीनंसर्वया
पविनाशकं॥८०॥अतःपरंसंहरेतिवाक्यस्यहरनामतः तस्मैविनष्टपापायमोक्षंदास्याम्यस
शयं॥८१॥प्रहरप्रहरत्यत्रयन्नामहयमास्तितत् मत्प्राप्त्यर्थमभूत्समुच्चयमुजमुच्यते
॥८२॥आहरेत्यादिवाक्यस्यहरंनामचतुष्टयं सर्वाघप्रदंसत्समुपसर्गविनाकृतं॥८३॥
अबुद्धिपूर्वकंवक्त्रबुद्धिपूर्वकमेववा मन्नामोच्चारणंपुंसांसर्वपापप्रणाशनं॥८४॥मृतिका
लीनमन्नामस्मरणान्मोक्षमाप्नुहं दास्यामिसत्यमेवेतिप्रतिज्ञेयंमयाकृता॥८५॥आहरेत्या
दिवाक्यस्यान्वयसंगन्विहायत्र राजतेमुक्तिदंदृढात्तन्मेनामचतुष्टयं॥८६॥महापातकि
नाप्युक्तंमन्नाममृतिकालिकंतस्मैमोक्षंददाम्येवनात्रहि॥८८॥मृतिकालिकमन्नामस्म
रणाद्दुष्कृतिःपुरा मोक्षःप्राप्तःकिमस्यत्रचित्रंनामैवेतादृशं॥८९॥हरेनामहरत्येवया

तकानिबहून्यपि यातःपापहरत्वेनप्रसिद्धंनामतादृशं॥९०॥सद्यःकृतमहापापोप्यंतकालशि
वस्मृतेः मोक्षंप्राप्नोत्यतः सोमंतमिहानयसत्वरं॥९१॥इत्युक्तः समहेशेनतमेवानयतिद्विजं अतःप
रंनतस्यास्तिदुःखलेशोपसर्वथा॥९२॥इत्युक्तंतद्वचःश्रुत्वायमः संरुषमानसः श्रुतंकिंचित्रगुह्यो
क्तमितिहतान्ववावसः॥९३॥ततःसाधुःसंत्रापमानवसरपुंगवं सोपिमाप्रापसुभीयमेन
परिएजितः॥९४॥अतएवातिपातेनमदचेनपराः निः॥श्रमसंप्राप्नुवंतिस्वभेनवरानने॥
९५॥देवानासार्वभौमोहंमदेकशरणात्मनां मोक्षंदास्यामिसुभगेसत्यंसत्यंनसंशयः॥९६॥रुद्राक्षा
गदकंकणाः सितलसद्भस्मांगागाः सदा रामोशंकरचंद्रशेखरमहादेवेतिसंवादिः॥९७॥मन्ना
मैकसुधासमुद्रलहरीकल्लोलंलोलं ग्लसज्जिह्वाजिह्मविवर्जितामहिताः सत्यंब्रवीमिप्रियो॥९८॥
इतिश्रीशिवरहस्येसप्तमांशेशिवगौरीसंवादेनामसप्तदशोध्यायः॥१७॥शिवउवाच शृणुदे
विकथामन्यामृतिसंतोषदामिसां यत्कथाश्रवणादेवदृढचित्तामविष्यसि॥१॥पुरासर्गेशचौ

Indira Gandhi National Centre for the Arts

ता यंदृष्ट्वागुरुरतिप्रियंउवाचवचनंवाग्मीसास्मितंप्रीतिपूर्वकं भक्तलोकातीर्थसेवार्थमयागतमने
कधा दृष्टानिशिवातीर्थानिवेदोक्तान्येवसादरं॥३॥तीर्थेषुबहवोदृष्टाः शैवाएवशिवार्चकाः तेषां
तुदर्शनादेवसंतोषोवर्द्धतेमहान्॥४॥भस्मोद्धूलितसर्वांगादृश्यंत भाग्यातोयदा तदासाम
तिसंतोषोभवत्येवनसंशयः॥५॥दृश्यतेपत्रेवमस्माकंद्राक्षमक्षाणाः तत्रतत्रतदातेषुशिवबु
द्धिः प्रजायते॥६॥तत्संगतिंविहायात्रेवलादागम्यतेमया तासंगतिपरित्यागः कार्यएवनशं
सतो॥७॥यथातत्रसुखंभूरितथानात्रमनध्रुवं शैवानामेवसंगेनस्थातव्यमितिधीमता॥८॥
शैवाः शंकरतत्त्वज्ञाबहवः संतिभूतले तेषांदर्शनमात्रेणानश्यत्यघकुलक्षणात्॥९॥यु
दातेबिल्वपत्रैश्चयंतिमहेश्वरं तदातद्दर्शनंसम्यगदृष्टंस्यायतेमया॥१०॥तद्दर्शने
नसंतोषोजायतेयादृशात्तदा तादृशात्त्वत्रसंतोषः कदापिनभविष्यति॥११॥शिवलिंगार्चं
नंकृत्वाभक्तिश्रद्धापुरःसरं प्रणाम्यनतंनकृत्वाकृतिविविधैस्तवैः॥१२॥शिवनामामृतं

पीत्वासंतुष्टाः संतिसर्वदा तद्दासाकस्यनोत्सा होनकेनाप्यनुभूयते॥१३॥तेषांशिवार्चनंसत्काका
र्यमत्यन्तविघ्नप्रदक्षिणाविनान्यत्रसंचारोपिनदृश्यते॥१४॥शिवोत्कर्षप्रधानैवकथासंश्रूयते
हितैः वेदार्थएवसततंविचार्यस्थाप्यतेमुदा॥१५॥वहिष्कृतेषांगमनंबिल्वपत्रार्थमेवहि तदा
न्यार्थंतुगमनंनतेषांनेवदृश्यते॥१६॥एतादृशाशिवाचारनिरताः शिवपूजकाः बहवः संतिभू
लोकेशिवपारिषदाइव॥१८॥काश्चिद्बिल्वदलैरीशंसंपूज्यातिप्रयत्नतः स्तोत्रैरनेकधास्तुत्वादृष्टचे
तोबभूवस॥१९॥तदाकश्चिद्द्विजस्तत्रसमागत्यतमब्रवीत् एनमेवातियत्नेनकिमर्थंपूजयत्ययं
॥२०॥यथापमेवमेवान्याः पूज्यास्तिष्ठंतिदेवताः ताविहायातियत्नेनमेवकिं॥२१॥देवाः सर्वेसमा
एवतथावैनंविशेषतः एकमेवात्रसंपूज्यमोहेनायंतिष्ठति॥२२॥इत्युक्तंतद्वचः श्रुत्वासशै
वः शिवपूजनं शीघ्रंसमाप्यपप्रच्छेनानिर्यशैशिवमंडपात्॥२३॥ततोजग्राहतंविप्रंशिवान्कं
र्वादिनं गृहीत्वातस्यरसनांमुत्वायसज्ञघानतं॥२४॥विप्रान्डलिप्तारसनांमुखेतस्यततः

Indira Gandhi National
Centre for the Arts

परं प्रक्षिप्यविचक्षाएवंमुखंतस्यचक्रमंक्रोधसंकुलः ततःपरंसुखंप्रायस्तशिवाराधनंप्रियः॥
॥२७॥एतादृशःसशैवेंद्रःशिवाद्वेषकवादिनं हत्वैवचंडचंडालगृहमध्येविनिक्षिपत्॥२८॥त
तःपरंस्वचंडालैर्गृहमध्येनिपातितः एवंबहुविधंदुःखंप्रायशंकरदूषकः॥२९॥तरीवेंद्रदु
तंहत्वाप्रापानंदमखंडितं ततःपरंयमभटैःसनीतोरुद्रिजौधुना॥३०॥तस्यकिंशासनंभा
वितद्रक्ष्यप्रयांततः वक्तुंवार्तामिमामिंद्रंसंप्राप्तोस्मितवांतिकं॥३१॥क्षमप्यपाहिदेवेंद्रसत्व
रं सानुगोधुना द्रक्ष्यंकालस्यदनमशेवभयदंसदा॥३२॥इतितद्वचनंश्रुत्वादेवेंद्रोगुरु
णासह पयाचत्संत्वरेणयमदर्शनुकांक्षया॥३३॥ततस्तंनागतंदृष्ट्वायमोदेवेंद्रमादरात्
पूजयित्वासगुरुमुपवेश्यासनेशुभे॥३४॥तदानीमेवयामीयाःशिवाद्वेषकवादिनं क्रोध
पिंगैवश्मश्रुलाग्रेतं मानीयविचिक्षिपुः॥३५॥ततपरंचित्रगुप्तंविलोक्सयमस्तदा ब्रूयास्ति
स्माहविनयान्चित्रगुप्तोथपिंगैवश्मश्रुलाग्रेतमानीयविचिक्षिपुः॥३५॥ततपरंचित्रगुप्तंविलो

क्सयमस्तदा ब्रूयामित्याहविनयान्चित्रगुप्तोप्युवाचतं॥३६॥यमायब्रास्मणोनेनक्रू
तंशंकरद्वेषणंशिवायदुःखंदत्तंवमहादेवस्यनिंदया॥३७॥देवाधिदेवमजरमनन्यदृशं
शिवं अन्यदेवसमत्वेनज्ञात्वामोहात्मब्रवीत्॥३८॥इत्युक्तोचित्रगुप्तोक्तं श्रुत्वाकालो
तिभीषणाः क्रोधाविष्टोब्रवीद्दूतान्द्विजमात्रानयेति॥३९॥ततःपरंसनिक्षिप्रोयमदूतैर्मया
कुलैः ततःमलमतिक्रूरोगृहीत्वातंताडयत्॥४०॥ततघ्नीमादायकालस्तीक्ष्णशासनः ताडया
मासवेगेनक्रोधसंकलितेक्षणः॥४१॥संतप्तायसपिंडेनतंताडयदुद्धतं ततोविधसंतप्त
शस्त्रेश्चतंताडयत्॥४२॥ततःपरंप्रयत्नेनसंतप्तायगिरिसन्निभांशतघ्नीसमुपादायतंपा
ताडयद्विजं॥४३॥ततस्तमायसस्तंभेसंतप्तेवाहिप्रवलैः प्रध्यातंसतिवेगेनबद्धंक्रूरशा
सनः॥४४॥ततस्तंताडनायायदूतान्यमयुतंयमः प्रेरयामासप्रलयाग्नेस्ताडयंतिसत्वरं॥
४५॥एवमादिश्यकालोयंसंहृत्याधरपल्लवं निश्वासवायुन्विसन्नन्नुवासक्रूरशासनः॥४६॥

Indira Gandhi National
Centre for the Arts

वचनंनिनयान्नयकोविदः॥४६॥देवेंद्रउवाच यमास्यउशिवाज्ञाकारिणःशासनंकृतं किमे
ना?
तद्दृशंयमंदृष्ट्वादेवेंद्रोभयविह्वलः शनैरुवाचवैदुष्टान्यच्छशासनंजातंशिवानुत्कर्षन्उत्कर्षवादिनः आ
ह्वस्मकल्पमेतस्यकृतंभाग्येवशासनं॥५०॥शिवानुत्कर्षवादीयःससुरोक्तनरोक्तवा तस्या
नेवशास्तास्मिसाहमत्युग्रशासनः॥५१॥शिवभक्तोस्म्यहंतस्माच्छिवानुत्कर्षवादिनं पातयि
ष्यामिनरकेघशेवेघनसंशयः॥५२॥सार्द्धलक्षंदानिनरकान्पातिदुःखप्रदानिहि तेषांपुत्रपौत्रदु
ष्टःपातनोयोनसंशयः॥५३॥किंचैतासितरः सतिस्वर्गेधर्मवराजिते तेप्यानेपाहिनरके पातनी
याः प्रयत्नतः॥५४॥सर्वदेवोत्तमंशंभुंयोन्यथावक्तुमिच्छति तस्यापिनरकावासः सम्यगेवभवि
ष्यति॥५५॥यःशिवंदेवदेवेशमन्यथावदतिस्फुटं तस्यवासोस्तिनरकेघिसत्रास्तिकिमद्भुतं॥५६॥
भ्रमेणावाप्रमादेनयद्वामोहेनशंकर जानातियोन्यथातस्यनरकेवस्थितिर्ध्रुवं॥५७॥इंद्रो
श्चबहवोजाताः शिवानुत्कर्षवादिनरकेघतिघोरेदुष्कृतिषुजिपातनां॥५८॥इंद्रोत्यस्फु श्रीगणः
चंद्रोवाप्रद्वेषेंद्रोस्फुकिंनम पदितेषुशिवद्रोहोनरके पातयामितान्॥५९॥शिवद्रोहियदि २४८

भवेदुपेंद्रोहीयदिभवेत्तदामच्छास्यएवसः॥६१॥प्रियामातदा पातपिष्यामिनरकेघशेवेनसंशा
यः॥६०॥मत्संमहेशभक्तायकिमुपेंद्रः करिष्यतिशिवद्रोहीयदिभवेत्तदामच्छास्यएवसः॥६१॥शा
सनीयाः प्रयत्नेनशिवान्कन्उर्ववादिनः इत्याज्ञांशंकरेणावमत्संदत्तामुदा॥६२॥इत्युक्तंद्व
चः श्रुत्वादेवेंद्रोभयसंकुलः उवाचविनयेनैवकृतांजलिपुटस्तदा॥६३॥इंद्रउवाच एतैः किंकृ
तंपापंनरकेषुपतितैर्यम तासर्वमविशेषेणावमत्संयथाक्रमं॥६४॥शिवः इत्युक्तंद्वचः श्रुत्वा
यमोवक्त्रमुपक्रमे अंगुल्यग्रेणातीक्ष्णेनदर्शयन्नुग्रलोचनः॥६५॥यमः एतेसर्वेपिपापिष्ठाः शि
वार्चनपराङ्मुखाः एतेसर्वेपिपापिष्ठाः शिवस्मृतिपराङ्मुखाः॥६६॥एतेशिवायसाधांगप्रणा
मांकारिणोमंत्रमात्र नित्यंसदग्धसर्वांगास्तिष्ठंत्येतान्विलोकय॥६७॥यःशंकरायसाधांगप्रणा
मान्नकरिष्यति सदग्धोग्निकुंडेषुपतित्वंवहतिष्ठति॥६८॥एतेसक्तशिवालापाःशिवध्या
नपराङ्मुखाः संदग्धशस्त्रकुंडेषुतिष्ठंत्येतान्विलोकय॥६९॥एतेसर्वे महादेवकथाश्रवणवर्जि

नाः भुजंगगर्तपतितास्तिष्ठंतेनान्विलोकया॥७०॥एतेसर्वेह्रदोदेषुसक्तशंकरएजनाः घोरवह्निकुंडेषुतिष्ठंतिपतिताः॥सदा॥७१॥एतेशिवानर्पितान्नफलदुग्धादिभोजनाःक्रिमिपूतास्त्रकुंडेषुतिष्ठंतेनान्विलोकये॥७२॥एतेशिवाभिषेकांबुपानधारणवर्जिताः समस्त्रंरेतःकुंडेषुविलुठंत्यवलोकया॥७३॥सक्तपंचाक्षरजपाः सर्वेप्यतेदुराशयाः संतेदुराशयाः संतप्तामध्यकुंडेषु विलुठंतेनान्विलोकया॥७४॥सक्तरुद्रजपात्वेतेरुद्राध्ययनवर्जिताः संतप्तमस्त्रकुंडेषुतिष्ठंते नान्विलोकया॥७५॥एतेसर्वेपिमोहेनशिवान्यकर्मवादिनः बह्वन्नदग्धापसस्तंभेघ्नंत्यश्नान लार्पितान्न॥७६॥एतेसर्वेश्रुतिप्रोक्तभस्मद्रूलनवर्जिताः तिष्ठंत्यजगरावर्तेदुःखार्तास्तान्विलो कया॥७७॥भस्मत्रिपुंड्ररहिताः सर्वेप्येतेशचीपते दश्यमानालोहवाकेतिष्ठंतेतान्विलोकय ॥७८॥एतेसर्वेपिदेवेंद्रसक्तरुद्राक्षधारणाः संतप्तवह्निकुहरेतिष्ठंतेतान्विलोकया॥७९॥ एतेदिवाफलान्नादिभोक्तारःसोमवासरे संतप्तश्लेष्मकुंडेषुतिष्ठंतेतान्विलोकया॥८०॥

काश्यांहत्वापातकानियेऽकाशीबहिर्मृताः तेसर्वेपतिताःसंतिवह्निकुंडेषुपश्यतान्॥८१॥का श्यांमंतर्गेहेमध्येमलादिनिक्षपयेन्मृताः काशीबहिर्देशेतिष्ठंतिमलहृदे॥८२॥एतेकाश्यामपि स्थित्वाविनाविश्वेशदर्शनंभक्तंकाशीबहिर्देशमृतेरवोहृदेस्थितैः॥८३॥एतेकाश्यामपिस्थित्वानहृ तंभस्मधारणा ततःकाशीबहिर्देशेमृतएषहृदयस्थितैः॥८४॥एतेकाश्यामपिस्थित्वासक्तरुद्रा क्षधारणा ततःकाशीबहिर्देशेमृतएषहृदस्थितैः॥८५॥एतैःकाश्यामपिस्थित्वानंहृतंभैरवा चिंतनं ततःकाशीबहिर्देशेमृतंएषहृदस्थितैः॥८६॥एतैःकाश्यामपिस्थित्वानहृतंभैशिव चिंतनं ततःकाशीबहिर्देशेमृतंएषहृदस्थितैः॥८७॥ततैःकाश्यामपिस्थित्वानहृतंशैवएज नं ततःकाशीबहिर्देशेमृतंएषहृदस्थितैः॥८८॥एतेसक्तशिवाचाराःसर्वेसक्तशिवव्रताः विविधेछेदनिष्ठंतिनरकेष्ववलोकेय॥८९॥साद्भुदेषुनरकेघातेषाप्रतिवासरं मु ऊर्मऊर्मवसेववासोऽसहदुःखदः॥९०॥अशैवाःसंतियेवंतस्मृयतांमपिसवंदा भ

Indira Gandhi National Centre for the Arts

वसेतेषुनरकेषवश्यंवसतिध्रुवं॥१॥एनंपश्याग्निकुंडस्थंवार्तांप्यस्योच्यतेमया तद्वार्ताश्रृणा
त्सघोरांचोपिमविष्यति॥२॥अयंकुरुठकानामब्राह्मणोवेदपारगठ धनधान्यादसंपन्नो
महिष्यादियोवकः॥३॥कोटकोटरदृपैकः पुत्रोस्यामवदुन्नमः ससर्वदाशिवाचारानरतः
शिवतत्परः॥४॥ऊहूलनत्रिता निसंशिवकथामेवशृण्वन्प्रीतमानसः॥५॥संपवारप्र
यत्नेनपूजयहोगिरिजापितं बिल्वपत्रपुष्पाद्यैः पूजयतिभक्तितः॥६॥व्रणान्मन्युरुधाक्ष
त्वासाष्टांगान्भक्तिपूर्वकं नत्वंचकारयत्नेनशिवदीक्षातिहर्षितः॥७॥पूर्वंमंत्रंततोभूयं
यावदन्नमयेक्षितं सोपदंशंसमानीयनिवेदयतिशंकरे॥८॥अन्नार्पितंमहेशायफलंवाजले
मेववा नगृह्णासेवनियमान्निसंशयपथपूर्वकं॥१००॥भस्मनोभभवोभावीसुरूपमपिचेद
नं नतेनलालितंभालेविभूत्यासर्वथा॥१॥तदूलितांगमालोक्यहृष्टोभवतिसर्वदाकरास्ते
ऊहूलनभक्त्यानित्यमायादमस्तकं॥२॥निसेप्युहूलनेतस्यभक्तिः श्रद्धापितादृशीवेदोक्त

महतीभक्तिस्तस्योहूलनबोधके॥३॥खेदेनोहूलितंभस्मदेहाऊछतिचेत्तदा पुनरुहूलनं
सम्यक्करोतिविधिपूर्वकं॥४॥त्रिपुंड्रधारणासम्यक्करोतिचततः परंपुहूलनपुंड्रान्यांसर्वदा
पिनिरूपितः॥५॥ऊहूलितानंकितांगंयदापश्यतिनःक्षणेदृष्ट्वाभानुंयत्नेनशिवंध्यात्वासति
ष्ठति॥६॥अथकेचलभस्मागाविप्रचंडालमेववा दृष्ट्वासंतोषपूर्णांगः कशेत्यभ्यर्चनंमुदा॥७॥नि
संशयंधामेवप्रणोतिप्रीतमानसः शिवंसहैवसाततंतिष्ठतिप्रीतिपूर्वकं॥८॥सकदाचि
त्रयत्नेनविल्वपत्रार्चनप्रियः एकाकीविल्ववृक्षाध्ववनंप्रायमगावतां॥९॥तत्रकश्चिद्वो
रूपःपर्वताकृतिः विलोक्यबालकंविप्रमाजगामातिवेगितः॥१०॥ततोहसमायांतंपि
शाचंवीक्ष्यदूरतः जगादवचनंबालोहसन्विस्मयपूर्वकं॥११॥कोटकोटरः पिशाचोयस
नागत्यकिंवामत्संकरिष्यति॥१२॥परिवेषक

Indira Gandhi National Centre for the Arts

रिष्यामि भस्मनासावधानतः परिवेषमतीत्यापमार्गतंडुलान्कुर्याः कथं॥१३॥ वेदाक्तवंति बहुधा
प्रभावं भस्मनः सदा जानंति महिमानंतेनदेवाधियतेमया॥१४॥ मंत्रपूतमिदं भस्ममम रक्षांकरिष्यति
सर्वसंसर्गमिदं संपत्संशयोनात्रसर्वथा॥१५॥ नकरिष्यतिचेदस्मात्सिशाचाद्रक्षणंमम तेदाभस्मक
थंभद्राघोरसंसारसारनाशकं॥१६॥ संसारभस्मात्सकं भस्मघोरपापौघभस्मकं भस्मनाभ्दस्मइये
वाश्रुतिरेववलंमम॥१७॥ देवएवप्रमाणमेब्राह्मणात्समंज्ञेमज्ञानः तथाचेदंधृतंभस्मभयंनैना
शयिष्यति॥१८॥ इत्युक्त्वाभस्मसंगृह्यशिवमंत्राभिमंत्रितं चकारोद्धूलनंविप्रत्रिपुंड्रंयथा
विधि॥१९॥ परिवेषंततश्चक्रेभस्मनात्रित्रिरात्मिकः ततःसमागतः सोपिपिशाचोविकृताननः
॥२०॥ गृहीत्वाकामतंतत्रसाधतमुविस्तृतंपरिवेषाद्बहिःस्थित्वाबलवान्दुःखितोथन
त्॥२१॥ अतःपरंवैपराकोरांपिनशशाकाभिमंत्रितं तभ्दस्ममंडलंप्रोद्धमहारीवृक्ष
तंस्तभं॥२२॥ बहुधापरिवृत्यापपरिवेषंमुहुर्मुहुः अपतन्मलसोज्ञातः खेदपूरितविग्र

हः॥२३॥ततःसादूरतः स्थित्वापरिवेषाम्दुवाचनं बालकान्नत्वयाकिंवाकृतमस्तिवदस्वमे
॥२४॥ अहंतपर्वतोनाकारः सिंहानामपिमर्दकः एतादृशस्यमेबालकथंवाकुंठितंबल॥२५॥ एव
विलोक्यतंदुष्टंविलोक्यासंतदुःखितं ऽवाचवचनंबालः स्मितंपूर्वमंतंद्रितः॥२६॥ काटकोटरः
रेरेपिशाचकिंपूर्वंपापमस्तिकृतंत्वया येनप्राप्तंपिशाचत्वंबहुदुःखप्रदायकं॥२७॥ इत्युक्तंतद्व
चःश्रुत्वादुःखितस्तमुवाचसः नस्मर्यतेत्वया येनप्राप्तंपि मयापापमितिनत्वायुनःपुनः॥
॥२८॥ इत्युक्तंतद्वचःश्रुत्वादूचेविनयान्वितं मंत्रितंभस्मसंगृह्यतन्मूर्द्धविनिक्षिपन्॥२९॥
ततस्तभ्दस्मयोगेनध्वस्तपापःस्ततःक्षणे दिव्यांश्चकांतनुंप्रापस्वर्यमंडनसन्निभां॥३०॥ततः
संतुष्टहृदयःयुध्वेःसंपूज्यबालकं नत्वाकृतांजलिपुटः कृतार्थोस्मीत्युवाससः॥३१॥ तंदृष्ट्वा
विदस्मितोबालस्तमुवाचवचोमुदा किपातकत्वयापूर्वंकृतंनिपतनंमोदया॥३२॥ ततस्तबाले
कंदृष्ट्वास्मितपूर्वकमादरात् ऽवोचवचनंचारुप्रतिज्ञापूर्वकंमुदा॥३३॥ गंधर्वोहंद्विजश्रेष

Indira Gandhi National
Centre for the Arts

ज्ञानशास्त्रविशारदः मयादुः खं पुरादत्तरौद्र्यामिततेजसे॥३४॥एवं मुक्तं मयापूर्वं रौद्रमालो
कबालक भस्मनाश्वेतमभवच्छरीरंनितिमोहतः॥३५॥ततः सदुःखितः रौद्रोमांराशापहितक्षणे पि
शाचतन्नुमाश्रित्यंवृनेतिष्ठतिस्मवरं॥३६॥तदाप्रभृतिघोरेपिशाचतन्नुरागतः कल्यानानयुतज्ञा
तंदुखंभुक्तमयाबेऽ॥३७॥त्वत्प्रसादेनदेवेंद्र मुक्तोहंघोरपातकात् त्वदीयंसंदेहः पालनी
योस्मिसर्वथा॥३८॥पुनर्मत्यमंत्रपूतंभस्मदेहिद्विजोत्तम यघोगंनमयाप्राप्तोगंधर्वांत
नुरुत्तमा॥३९॥उपकारोमयाकार्यः स्वरात्त्यारौद्रपुंगव किंवातत्रेसितंवक्तुंवदात्रभुव
नत्रयं॥४०॥शिवभक्त्यानवान्निपनापकामोसियद्यपि तथापिवदरौद्रंमांसंतोषार्थमादरा
त्॥४१॥इत्युक्तोतद्वचः श्रुत्वाभस्मदत्वाभिमंत्रितं मयास्मतस्त्वमायाहिपुवाचप्रीतिपूर्वकं॥४२॥
ततःसनत्वारौद्रंतथेत्युक्त्वाजगामसः ततःपरंबिल्वपत्रारोपहस्तंसमुपुत्रकं॥४३॥सत्त्रा
ण्तरंस्मारिंबिल्वपत्राणिदरं गृहीत्वासवनत्कात्स्वगृहाभिमुखंययौ॥४४॥तदा

नीमेवसविताससंप्रापाक्तगिरिंतदावालः प्रदोषकालीनांपूजांकर्तुंसमाय भे॥४५॥सं
गोमयमयंलिंगंसंपाप्यनयवतः ध्यात्वासम्यङ्महादेवंचकारावाहनंमुदा॥४६॥
तदानीतत्पितापुत्रः क्वगतोस्तीतिदुःखितः आजगामातिसंवदन्॥४८॥लिंगोपरिस्थि
तंदृष्वातासितश्चरणद्वयं चिच्छेदक्रूरशस्त्रेणक्रोधसंकुलितेक्षणः॥४९॥ततःसमुत्पति
तःपितादुःखाभिकर्षतः हाहाहतोस्मिपुत्रेतिरुरोदाश्रूणिमोचयन्॥५०॥ततःसंज्ञि्का
मुत्सायप्राणेभ्योपिवियोजयन्शिवलिंगेकथंदत्तोचरणचितिसंवदन् एतस्मिन्नंतरेत
स्यक्रोधःशांतोभवत्तदा ततःपूजांचकारायंशिवलिंगीतरेतदा॥५२॥तदानींतिसत्सः
शिवप्रत्यक्षतागः विलोक्यशंकरंरौद्रस्तुष्टावविधेस्तवैः॥५३॥ततोदेवोभवत्वेतिवरादत्तोशि
वेनहरौद्रस्तद्वाक्यमाकर्ण्यययाचेन्पंवरमुदा॥५४॥त्वत्प्रसक्तमेमगौरीशभक्तिरत्यंतिचा
रिणीशिवभक्तिरभीष्टानिमत्यंदास्यसंसरायं॥५५॥किमत्रिदशभावेनत्रिदशत्वेनमेम

Indira Gandhi National Centre for the Arts

तं निर्देशात्वमयाप्राप्यंमहेशांतंवे पूजया॥५६॥अधुनानिर्देशात्वंचममभक्तिमहेश्वरः मू
लोकएवस्थित्वाहतवपूजोकरोम्यहं॥५७॥अनेकजन्मतपसामानुषंजन्मलभ्यते तत्रापिहि
जजन्मदेवप्रसादेनलभ्यते॥५८॥तत्रापिभारतेवर्षेजन्मदुर्लभमेवहि ब्राह्मणेषुभारतेवर्षेत्व
प्रसादेनलभ्यते॥५९॥तत्रापिभरिभाग्योनत्वयिभक्तिःप्रजायते सोमोक्षदाभवत्येव
भक्तिरमलिचारिणी॥६०॥स्थित्वास्मिन्भारतेवर्षेपूजांकरोम्यहं पुष्पैर्नानाविधैर्दिव्यैर्बि
ल्वपत्रैश्चकोमलैः॥६१॥अविच्छिन्नायथापूजाक्रियतेसर्वदामया तथावरंमहादेववृ
हिमत्संसरोत्तम॥६२॥किंचमांप्रार्थयविभोकाशीदेवोत्तमेश्वर पत्रंगत्वानशोचंते
देवाइवशिवार्चकाः॥६३॥विश्वेशोतिगुरूपेणापत्रत्वंयाचितोसि तत्रास्तुममदेहस्य
विनाशः शीघ्रमीश्वर॥६४॥तत्रास्तुतेनोःशंभोमत्संचाक्षरः परःदेवस्त्वयाकृपांसि
धौघंलब्ध्वामोक्षमाप्नुयां॥६५॥भक्तिर्वैश्वेश्वरेलिंगेकाश्यांनिवसतोमम यथा

दृढमवेन्नित्यंतथाकुरुमहेश्वर॥६६॥अथंवरोत्तमः शंभोवरोन्योनेवयाच्यते अयमे
ववरोयस्मादनेकतपसांफलं॥६७॥यमः इत्युक्तंतद्वचःश्रुत्वातथास्त्वित्यब्रवीद्वितः
तत्रैवांतर्दधेलिंगेलिंगरूपीसदाशिवः॥६८॥तस्मिन्नायशिवद्रोहीतत्पुत्रोवमारितः
भक्तावकूनिदुःखानिस्थास्यत्यत्रसशयः॥६९॥पश्यशंकरभक्तानांमाहात्म्यमतिशो
भनं अंगराद्विजंतातंहत्वाद्वेषात्पितिष्यति॥७०॥स्नेहाश्रयःपितातत्रापंथंवेदवि
दुत्तमः तथापिनिजधानेनशिवद्रोहंवशात्सुतं॥७१॥पितापितामहोवास्तुभ्रा
त्राणःक्षत्रियोथवा शिवद्रोहिपदिभवेत्सहंतव्य इतिश्रुतिः॥७२॥शिवद्रोहिणा
मायांतंयाद्दशंताद्दशंद्विजं हत्वामोक्षमवाप्नोतीत्यतिश्रुतिरनेकधा॥७३॥प्रबल
श्चेच्छिवद्रोहीपदिहंतुंनशक्यते तेदादेशांतरंगत्वादतियत्नेनसादरं॥७४॥तथा
चश्रुतितत्वज्ञः शैवः स्वपितरंद्विजं श्रुतितत्वविचारेवजघानश्रुतिपारगः

Indira Gandhi National
Centre for the Arts

॥७५॥ त्रिवान्यस्तुल्यत्वंयः शिवेवक्तुमिच्छति वियोजयतितुंशीघ्रंप्राणेभ्योयंशिवार्चकः
॥७६॥ शिवेशिवान्यदेवेभ्योन्यूनत्वंयेनवोच्यतेतानुत्कंकचैरवेविदारयतिसंवरा॥७७॥दक्षा
स्तेनतुर्यावर्तनःशिवानुत्कर्षवादिनः तावतामपिसर्वेषांमुखानिश्चालपत्ययं॥७८॥दिवायेनन्न
नेणापिभुज्यतेसोमवासरे तमानीयक्रूरचित्तः काशाभिस्ताडयत्यये॥७९॥योभस्मधारणा
त्कामोक्षमिच्छतिमानवः तमानीयातियत्नेनयापाशैस्ताडयत्यये॥८०॥रुद्राक्षधा
रणात्सक्तंयेनमर्त्यंकारागृहेप्रयत्नेनप्रवेशयतिसंवरं॥८१॥शिवालिंगार्चने
सक्तामोक्षमिच्छतियोनरः तामानीयापयसैःपिडैः सताडयतितत्तनु॥८२॥येननार्चितेनिस
र्गादेवेशिवपूजनं तमानीयातियत्नेनकंटकैस्ताडयत्यये॥८३॥शिवव्रतानित्यक्तानियेन
नित्यमात्रादपि तंनरंस्रवलोहिध्वागतैसंपातयत्यये॥८४॥अधर्मनिरतात्दुष्टापशा
सयन्तेवमार्तिकः बहून्धर्मरतानेवचकारायंशिवार्चकः॥८५॥एवमेता दृशंकृत्वा

तद्देशाधिपतिर्धनी तद्दर्शनार्थंयत्नेनसामात्यः समुपाययौ॥८६॥आगत्यासंतवनयासराजा
कुसुमांजलिः पूजयामासशैवेंद्रंसामात्यः सानुगोमुदा॥८७॥ततःसशैवः संदृष्ट्वाभस्मभूषितवि
ग्रहं कुशलंकिमुराजेंद्रेत्याबभाषेनताननं॥८८॥ततःसरानावेनयात्समाराभ्योवाचसादरं
बृहस्पतिरिवार्तंश्रव्यवचनमुत्तमं॥८९॥राजाः शैवेंद्रत्वत्प्रसादेनकुशलंसर्वतोमम राष्ट्रं
सर्वंत्वत्प्रसादोत्सुखेनैवाधितिष्ठति॥९०॥यस्मिन्राष्ट्रेत्वयानित्यंस्थीयतेशैवपुंगव तस्मि
न्राष्ट्रेसर्वंसदाममस्यैवसर्वदा॥९१॥तवदर्शनमात्रेणकृतार्थोस्मिशिवार्चक आज्ञा
पयमयानित्यंकिंकर्तव्यंब्रयत्नतः॥९२॥इत्युक्तादृचः श्रुत्वाबभाषेशैवपुंगवः स्मितपूर्वं
ब्रयत्नेनवाक्यमेवमनोहरं॥९३॥कोटकोरुवाच अस्त्रमादेनसततंभस्मनोद्धूलनंकुरु
त्रिपुंड्रधारणंसम्यक्कुरुविध्युक्तमार्गतः॥९४॥रुद्राक्षधारणंनित्यंकुरुयत्नेनसादरं शि
वपूजांप्रयत्नेनकुरुबिल्वदलैर्मुदा॥९५॥शैवंपंचाक्षरंनित्यंजपयत्नपुरःसरं कालत्र

Indira Gandhi National
Centre for the Arts

येप्यर्चयस्वशिवलिंगंप्रयत्नतः॥९६॥रुद्राभिषेकपानीयं निवेदितंशकरायतांबूलंस्वीकुरुप्रियं
॥९८॥शयनेभोजनेनित्यंशंकरंस्मरसादरं नित्यंशिवकथामेवश्रृणुभक्तिपुरस्सरः॥९९॥रौवैः
सहैवसततंवार्तांकुरुयथोचितं रौवेभ्यएववस्त्रेतधनंदेहिस्वशक्तितः॥२००॥रौवानेदृष्ट्वाति
यत्नेनपूजयोत्थायसादरं रौवेष्वविनयेनैववार्तांकुरुकृतांजलिः॥१॥रौवेनकुरुकोटिल्पद्र
व्यदानेनाप्यसर्वथा रौवानतोषयत्नेनपूजयास्वर्चयान्नप॥२॥अरौवानतियत्नेनसंहारादर
पूर्वकं अरौवसंश्रयंदेशंमायापालयनराधिप॥३॥शिवालयानियत्नेनकारयस्वस्वशक्तितः शिवालयेषुसर्वेषुसर्वेषुकारयास्वार्चनंमुदा॥४॥शिवस्थानेषुरम्याणिजलकुंडानिकारय शिवस्थानेषुविभवाः कारणीयाः प्रयत्नतः॥५॥कारयस्वालंकृतानिशिवस्थानानिसादरं नाथकारयसर्वेषुशिवस्थानेषुसादरं॥६॥दीपमालालंकृतानिशिवस्थानानिकारय सनोर्जीनानिनित्यंचशिवस्थानानिसर्वदा॥७॥डुडुभिध्वनिपूर्णानिशिवस्थानानिकारय सपुष्पजलसिक्तानिशिवस्थानानिकारय॥८॥मायालयस्वतद्राष्ट्रंयद्राष्ट्रंशिवालय मावलोकयतंदेशंयोदेशोस्तिशिवालयः॥९॥मावलोकययत्नेनास्त्रियंसक्तंशिवार्चनं मावलोकंयमर्त्यांश्चशिवचिह्नविवर्जितान्॥१०॥शिवव्रतानिसततंकुरुयत्नेनपार्थिव नित्यंपार्थिवलिंगानिपूजयनरेश्वर॥११॥यक्तपार्थिवलिंगानिपूजयिष्यतिसादरं समहाभाग्यभरभ्रस्त्वालभतेशाकरंपदं॥१२॥यस्यास्तिश्चर्यमोक्षेच्छातेनयत्नेनसादरं पूजनीयविधानेनपार्थिवलिंगमुत्तमं॥१३॥राजान्पार्थिवलिंगस्यपूजनादेवसर्वथा मुक्तिकांतासमायातिस्वयमेवानियत्नतः॥१४॥मृन्मयंलिंगमभ्यर्च्यमहादारिद्र्यनाशकं तेनदारिद्र्यनाशक्तभवत्येवहिसर्वथा॥१५॥अर्चितेपार्थिवलिंगनाशयत्यघपर्वतान् ददातिमहदैश्वर्यंमुक्तिमंतेददातिच॥१६॥पार्थिवलिंगमभ्यर्च्यशिवैकपरदेवतेः नान्येरिष्यहजाचालस्तत्तथैवहिसर्वथा॥१७॥शिवान्पदेचतासक्तः पार्थिवलिंगमर्चयन् नतस्यलभतेमोक्षंनीतिसत्यमिसाह गौतमः॥१८॥अतः शिवोभवश्रीत्यापार्थिवलिं

Indira Gandhi National Centre for the Arts

गमर्चय तत्पूजयात्तवेष्टार्थाः सिध्यंत्येवनसंशयः॥१९॥कुबेरस्यधनंपूर्वंसर्वविश्रवसाहृतं त
तोदरिद्रः समभूत्कुबेरोधनवर्जितः॥२०॥ततोनिदुःखंप्राप्यजगामहिमवद्गृहं हिमवान्पूजयि
त्वातंपप्रच्छसंदुःखितं॥२१॥किमासीद्राजराजाधिपिन्नएवाहिशंतं खेदकारणामाचक्ष्वदुः
खंत्यक्त्वास्थिरोभव॥२२॥एवंपृष्टोहिमवतावाष्पधारापरिप्लुतं जगादवचनंदुःखागतंधनमि
तिस्वकं॥२३॥तच्छ्रुत्वाहिमवान्धीरोविस्मितःपर्यपृच्छतः कथगतंकिमधासीदितेनप्रत्युवाच
सः॥२४॥पूर्वंकल्पान्तरेनष्टंसायंशिवीनं,ततःपरंमयाराज्ञानकृतंशिवपूजनं॥२५॥तदा
नीविश्रवानामगंधर्वःकश्चिदागतः तेनसर्वंधननीतंतिरस्कृत्यैवमातृतः॥२६॥इत्युदीरितमा
कर्ण्यकुबेरस्याहितावहं वभाषेवचनंधीमान्विचार्यचपुनःपुनः॥२७॥कुरुष्वपार्थिवंलिं
गंवीडशांगुंगुलमुन्नतं अनावृतासमावृत्तमास्निग्धाग्रमनुन्नतं॥२८॥सासाद्ववत्सरंयत्पू
जांकुरुसांगंनिसंशयं॥२९॥आनयस्वातियत्नेनहे
जयस्वविधानतः भस्मरुद्राक्षवीतांगोव्रत्नचर्यासमन्वितः॥३०॥रत्नैःपद्मैर्बिल्वपत्रैःपूजयस्व
महेश्वरं सहस्रंरुद्रयंत्रीसादीपानांलिंगसन्निधौ॥३१॥प्रदक्षिणंशतंनित्यंसम्यगघोत्तरंकुरु प्र
णामान्कुरुसाष्टांगंनिसंशयोत्तरंशतं॥३२॥परमान्नेनचैवंकुरुयत्नेनसादरं कपूरदीपा
नमलान्कुरुसार्द्धपुत्रत्रयं॥३३॥गंडालागरुधूपेनप्रीणयस्वमहेश्वरं॥३४॥चतुर्विंशति
सहस्रंजपयचाक्षरंसदा॥३५॥एवमेवान्वहंप्रीत्यासप्तवारंमहेश्वरं पूजयस्वातियत्नेनशि
वैकधारणाःसदा॥३५॥साद्ववत्सरपर्यंतमेवंकृत्वाशिवार्चनं ततःकुरुयथाशास्त्रमुद्यापं
नमतंद्रितः॥३६॥उद्यापनविधिंवक्ष्येसम्पूर्णंसर्वविशेषतः यत्कृत्वैवाविलंबेनप्राप्स्यसेध
नमुत्तमं॥३७॥कृत्वामध्यंलिंगमानेनसोवर्णंलिंगमुत्तमं संपादनीयंयत्नेननवलक्षंतालु
क्षितं॥३८॥राजतान्यपिलिंगानितादृशानिचतद्दरा संपाद्यहेमर्षभाःकार्याःपंचदशोत्त
माः॥३९॥सौवर्णंपुत्तंविंशत्याकार्यंलिंगंहिरण्मयं राजतान्यपिलिंगानितेनमानेनकां

Indira Gandhi National Centre for the Arts

तेनकर्त्तव्याविधिपूर्वकं रात्रौजागरणंकार्यमुपोषणपुरःसरं॥४७॥ततः प्रातः समुत्थायस्नात्वापूजां विधायअ

रयेत्॥४०॥सोबलैरियुतैः कार्यएकैकोवृषभेश्वरः अन्यस्नानातिरिक्तंतुवृषभेसाः प्र
कीर्त्तिताः॥४१॥एतानिसोपकरणान्युपरादीयततः परं ग्राह्याणिपट्टवस्त्राणिश्वेतान्यखण्डुला
निच॥४२॥ततश्चश्रावणेमासिपौर्णमास्यांविशेषतः उद्यापनंप्रयत्नेनकर्त्तव्यंविधिपूर्वकं॥
४३॥आचार्यस्तत्रकर्त्तव्यस्तदन्यःसौवपुंगवः तत्रब्रह्मातुकर्त्तव्यस्तदन्यःशांकरोत्तमः॥४५॥
तत्स्वेच्छुःप्रयत्नेनविप्राःषोडशशांकराःनिमन्त्रणीयाविधिवदर्घ्यदानपुरःसरं॥४४॥त
तोलिंगानिदुग्धाद्यैरभिषिच्यपृथाविधि नंडपेस्थापनीयानीवितानाद्यैरलंकृते॥४६॥रात्रौ
पूजांप्रकुर्य्युर्ब्राह्मणैःसहसर्वेश्चशांभवोर्यत्नपूर्वकं॥४८॥मध्याह्नेशंकरायुक्तेपरमान्ने
नसादरं॥होमंकार्यःप्रयत्नेनपंचाक्षरविधानतः॥४९॥पंचलक्षंप्रयत्नेनकृत्वातुपरमा
न्नतः ततःसबिल्वमधुनाहोमस्तावान्विधीयते॥५०॥ततःसक्षीरमधुनाबिल्वपत्रा
न्वितेनच संज्यक्षीरमधुनाबिल्वपत्रान्वितेनच॥५१॥एवहोमःप्रयत्नेनकर्त्तव्यस्तद

नंतरं लिंगदानानिक्रार्याणिराजाबालोकविधानतः॥५२॥भोजनीयाः प्रयत्नेनततः
शांकरपुंगवाः सुवर्णंपुनरुत्कृष्टदक्षिणात्रविधीयते॥५३॥वृषभान्वितलिंगानिद
त्वावस्त्राणिचादरात् क्षुद्रांतंकर्मकर्त्तव्यंमहादेवार्पणंततः॥५५॥एवंकरोतियःसम्य
क्महादेवस्यपूजनं तेनेवानिधयः प्राप्तानेवाप्स्यतेसंशयः॥५५॥एवमोक्तोहिमवता
सचकारातदाव्रतं ततः कुबेरःसंप्राप्यशीघ्रंसानिधयोनवा॥५६॥तदाप्रभृतियात्रेनकुबेरः
शिवपूजनं सप्तवारंप्रयत्नेनकर्त्तव्यंसमुपचक्रमे॥५७॥अतः पार्थिवयत्नेनभावान्पिशि
चार्चनं कुरुयत्नेनसतांबिल्वपत्रादिसाधनैः॥५८॥सर्वदाशंकरस्यैवकुर्ध्यान्नप्र
ततः निरीक्षयप्रयत्नेनपूजितंश्रीमहेश्वरं॥५९॥जपेत्पंचाक्षरंमंत्रंप्रणवादेनसादरं तं
नसर्वार्थसिद्धिस्तेभविष्यतिनसंशयः॥६०॥क्षणाद्दृष्टविराजेद्वंशंकरध्यानवर्जितं मानु
रुद्रीपदेशोयंसर्वार्थफलदायकः॥६१॥सर्वसाधारणोधर्मोइदानींमदुरीकृतः राजान्

धर्मेणास्माकं पालयस्वस्वकाः प्रजाः॥६२॥ यमऊवाच इत्युक्तंतद्वचः श्रुत्वाराजाविनयपूर्वकंशिवंसंपूज्यतेनेनजगामनगरंस्वकं॥६३॥तस्मैशिवस्पजनकःशिवद्रोहवशादिह पतितोभूद्दुःखानिभुक्तातिदुःखितः॥६४॥अनेनवरणोदत्तः शिवलिंगोपरिभ्रमात् तावताप्यन्धभूयंतेदुःस्वान्येतानिसर्वदा॥६५॥ध्यायमानाग्निकुंडस्थोइवमन्मथत्वयास्तंभंदंदशमानंतसमालिंग्याधितिष्ठति॥६६॥मन्मथोयंताड्यतेसंतक्षायसम्परवलैः कशाजिस्ताअतैतेवैकैदाघैश्चदारुणैः॥६७॥भिंडिपालेस्तावतेयंतमुन्नतैःसातनासंपिंडश्चताअतेदुःखदायकैः॥६८॥कथंवातप्रप्रलाग्रैः प्रोथितोस्यातिदारुणैः कथंवातप्ततैलेनसिच्यतेदुःसहेनचा॥६९॥अन्यदेवसमोरुद्रोनरुद्रोदेवतान्तमः इत्युवाचपुराकामस्तस्पेदंकर्मराणःफलं॥७०॥सर्वदेवाऽधिदेवेशंशिवंयोमन्यतेन्यथा तेनैचसेवदुःखानिप्राप्नुवंतिनसंशयः॥७१॥महाविष्णुब्रियतमः शबराचिस्तथाप्पयं भुक्त्वाघोराणिनरकान्यत्रातिष्ठतिसर्वदा॥७२॥नरकेपति

तंश्रुत्वामन्मथंकमलापुराः दुःखाद्विष्णुब्रावेदंवचनंसारुदन्मुखी॥७३॥लक्ष्मीः तवप्रियतमोमारीनरकेपतितोहरे तमुद्धरातियत्नेनममदुःखनिवारय॥७४॥इतितद्वचनंश्रुत्वासलक्ष्मीरमणोब्रवीत्तदुःखमाकुरुमुग्धेतिपुनरन्यदुवाचच॥७५॥अस्मदादिसमत्वेनशिववेदस्मन्मथः देवाधिदेवः साशिवः सोस्मत्तुल्यः कथंभवेत्॥७६॥अहेऽदेवदेवस्यमहादेवस्यसेवकः मतुल्यकथंभूपाच्छिवोदेवाशिवामणिः॥७७॥सवेकोदधिकृःसेव्यःसर्वसेव्योमहेश्वरः तथैवसेवकान्मत्तोमहानेवमहेश्वरः॥७८॥महेश्वरइतिख्यातःशिवतथासति सोस्मत्तुल्यकथंभूयात्सर्वदेवमहेश्वरः॥७९॥ब्रह्मेन्द्रचमुरवादेवाःशंकरस्यैवसेवकाः ततस्तुल्यतांशंभोःकथंभवतितद्वद॥८०॥सेव्यसेवकाऽल्पंचेन्मन्यतेमोहतस्तदा ससेवकोदंडनीयःसेव्येनभविष्यतिध्रुवं॥८१॥बयंब्रह्मादयोदेवाःशिवसंपदद्वारकिंकराः ताऽयतेतेनदेवेनसमाःस्यामः कथंप्रिये॥८२॥अस्मान्नगणायत्येवकोपिशंकरकिंकराः तादृशाःशंकरास्माभिः कथंतुल्योभविष्य

Indira Gandhi National Centre for the Arts

ति॥८३॥मन्मथः समहादेवभस्मतुल्यमसन्पात अतस्तेनैवपापेननरकेपतितोध्रुवं॥८४॥अ
तुयत्पूजयास्माभिर्देवत्वंकमलेमलोतेनदेवेनतुल्यत्वंकथमस्मासुतद्वदा॥८५॥योन्यतुल्यतया
देवंत्रमराणामपिमहेश्वरं सघोरनरकावासंप्राप्नोत्येवनसंशयः॥८६॥तद्दुःखारायपातोपिमया
कोऽन्यराक्षुतं कृतोपिफलोभविष्यतिनसंशयः॥८७॥पतितोयमहस्तेयः श्रीमहादेवनिंदकः
नतस्यनिगमस्तस्मात्कल्पकोघर्वदेरपि॥८८॥यमस्तुदेवदेवस्यमहादेवस्यकिंकरः सकिं
महचनश्रुत्वापातनंनकरिष्यति॥८९॥शासनीयःप्रयत्नेनयुत्रापिशिवनिंदकः सशास
नीयएवातःपालनीयोनताहशः॥९०॥तद्दुःखारायपातश्चोक्रियतेचमयाद्विज तदासमा
पितेनैवसहस्थेयंभविष्यति॥९१॥तद्दुःखारार्थमुद्यक्तोविद्धुमास्यमद्विज अहोवा
यमितिज्ञात्वाग्रहिष्यत्येवसर्वथा॥९२॥गृहीत्वासतुकालोमामोचयिष्यतिनध्रुवं
तद्दस्तेपतितः कोपिनमुक्तोघापिदृश्यते॥९३॥अतस्तत्रप्रयत्नस्तुनचालिप्स

तिसर्वथा वसत्वमोमितिप्राहलक्ष्मांलक्ष्मीपतिः स्वयं॥९४॥अतोमद्दस्तपतितः स
रोपिशिवनिंदकः मुक्तोतिष्ठतिचोरोसौनरकान्नसंशयः॥९५॥अनंतवत्सहं
साभिर्यावद्दुःखमवाप्ये ततोपिदुःखमधिकंप्राप्नुतेशिवनिंदया॥९६॥ब्रह्महत्याकृतायेनतस्यैव
नरकेस्थितिः तद्दराजानंनरकस्तेनयायेनपापेननध्रुवं॥९७॥शिवनिंदाकृतायेनतस्यैवन
रकस्तुनकिंतुतद्दराजानंचनरकेघातेषुसंस्थितिः॥९८॥शिवनिंदासमंपापंनभूतंनभवि
ष्यति तपायस्याप्यतेदुःखंतदुःखमतिदुःसहं॥९९॥रोचीपतेसमुत्पन्नोयद्दशेशिवनिंदकः त
द्दशेनरकेघोरपतिष्यत्येवसर्वथा॥३००॥मसंरक्षतितद्दशंशिवनिंदाघादवानलः तद्दशेका
लकूटाभोजतोस्तिशिवनिंदकः॥१॥यस्यचंद्रोसमुत्पन्नः शिवनिंदापरोनरः तद्दशेजल
मप्यत्यंनग्राह्यंसर्वथाद्विजैः॥२॥तच्चंडालकुलंज्ञेयंयत्कुलेशिवदूषकः ततस्तत्रतन्नग्रा
ह्यंजलमन्नादिविवेकिभिः॥३॥शिवनिंदकवक्त्रेजालंपिबतिमोहतः तप्तंघृतंदाका

Indira Gandhi National Centre for the Arts

र्पप्रयत्नेनविवेकिभिः॥४॥सकृभस्मत्रिपुंड्रस्यग्रहेभुक्तेतुमोहतः प्रायश्चित्तंद्वादशाहंकर्त्त
व्यमतियत्नतः॥५॥सकृलिंगार्च्चनग्रहेयदिभुक्तेभ्रमाद्द्विजैः तदातद्विगुणंकार्यंप्रायश्चित्तं
मनंद्रितैः॥६॥यत्कृभस्मत्रिपुंड्रस्पर्शोयदिद्वंमुखंभ्रमात् तदास्पर्शविलोक्यादौसवासाज
लविशेत्॥७॥सकृभस्मत्रिपुंड्रस्पर्शोयदिभवेद्भुमात् स्नात्वोपवासः कर्त्तव्यः शिवपूजा
पुरःसरं॥८॥सकृभस्मत्रिपुंड्रेणयद्यालापःकृतोभवेत् तदोपवासंकर्त्तव्यस्त्रीहं व्रतमवा
दिभिः॥९॥विभूतिधारणंसत्कृयदिभुक्तेभ्रमाद्द्विजैः तदातन्नानिष्कास्यंचरेच्चांद्रायणा
त्रकं॥१०॥रुद्राभिषेकपानीयंपीत्वायदिभुक्तेतदातन्नानिष्कास्यंचरेच्चांद्रायणात्रयं॥१२॥
शिवपूजांविहायैवयदिभुक्तेभ्रमाद्द्विजः तदातदन्नंनिष्कास्यंचरेच्चांद्रायणाषकं॥११॥रुद्राभि
षेकपानीयंनपीत्वायदिभुज्यते. तदातन्नंनिष्कास्यंचरेच्चांद्रायणात्रयं॥१२॥रुद्राक्षधारणं
सत्कृयदिभुक्तेप्रमादतः तदन्नंनिष्कास्यंचरेच्चांद्रायणद्वयं॥१३॥यद्येकदेवतस्यकृंप्रायश्चि

त्तमिदंतदंतस्यागासंख्यायाकार्यंप्रायश्चित्तंयथोदितं॥१४॥यदिभुक्तेमासमात्रंसंस
कृभस्मधारणं तदातुसानुपापिष्ठेनप्रायश्चित्तमर्हति॥१५॥शिवपूजादिकंसत्कृप्येवमेव
द्विजाधमः प्रायश्चित्तायुतेनापिशुद्धोन भवतिध्रुवं॥१६॥शिवपूजादिकंसत्कृयेनराः पा
पिनोजनाः तएवैतेपुनरकेघानीयपातिताः॥१७॥अत्यंतस्थूलभंगुरायसत्कृशंकरपू
जनं पतंतिघोरेनरकेघेतेषुजडबुद्धयः॥१८॥भस्मोद्धूलनमायुष्यंसत्कृशंकरजावा
लत्वोदितं पतंति०॥१९॥सात्कृकिंपुंड्रमनघंकेवलंतित्वोदितं पतंति०॥२०॥रुद्राक्षधा
रणंसत्कृपापारणपदवानलं पतंति॥२१॥रुद्राध्यायंसत्कृपापारणपदवानलं पतंति०॥२२॥
पंचाक्षरजपंसत्कृपापारणपदवानलं पतंति०॥२३॥रुद्राभिषेकपानीयंसत्कृघनाशकं
तपंति॥२४॥अरण्येविल्वयत्राणिसंतिरम्याणिभूरिशः तेषांशाखाश्चितोयस्मादतेनरकपा
तिनः॥२५॥अत्यंतस्थूलभंगुरंशिवइत्यक्षरद्वयं मुदानोच्चारितंयस्मादतेनरकपाति

Indira Gandhi National
Centre for the Arts

नः॥२६॥मुक्तिकांतावशहेतोःशिवमंत्रोविराजति कथमेतेपतंत्यत्रनरकेमहदुतं॥२७॥शि
वमंत्रजपोनिष्ठायेषांनैवभविष्यतिते यांतुनरकावासोभविष्यत्येवसर्वथा॥२८॥शिवमं
त्रोह्युद्धरणोनरकध्वांतविनाशकः तस्मिन्सतिपतंत्यत्रकानरकेषुयतंत्यहो॥२९॥पु
राकश्चिन्नराधीशोमित्रराडितिविश्रुतः युवासुघटनुगोरःसुंदरः शूरशासनः॥३०॥त
द्दृष्टितगजाश्वानांनसंख्यादृश्यतेमया सचैसामंतभूपालास्तदाज्ञाकारिणःसदा॥३१॥
एतादृशःसभूपालः स्वपत्नीमतिसुंदरी तिरस्कृतस्वर्गनारीदृष्ट्वावचनमब्रवीत्॥३२॥
राज्ञोवाच आपाहिसुभगेभद्रेरात्रिर्जातावधभ्यसौमत्यमालिंगनंदेहियेनसुखीभवाम्यहं॥३३॥
त्वदालिंगनमात्रेणसंतोषोयादृशोमम नादृशोममसंतोषोनान्यसंगेनजायते॥३४॥बहिस्थि
त्वातवेवेदंसौंदर्यंतिसुंदरं अतिसौख्यंकरंचित्तेध्यायतेसर्वदामया॥३५॥इत्युक्तवद्वचः॥ श्रीराम
श्रुत्वासुभागासामनोहरा जगादवचनंचारुसद्भावैराग्यसाधकं॥३६॥सुभगाउवा २६१

च शंकरार्चनकालोयंक्रियतेशंकरार्चनं अयंतेभोगकालोनोमयानागम्यतेधु
ना॥३७॥कृत्वामपिराजेंद्रमहादेवस्यपूजनं वृथाकालोननेयोयंपरलोकार्थिभि
र्नरैः उपेंद्रेंद्रादयोदेवागंधर्वामुनिसत्तमाः आसिन्काले महादेवंपूजयंतिप्रयानतः॥३९॥
यागयुक्तानीसाक्षाद्भवानीसापिशंकरं सपूजयतिपानेनसाधनेनऊमिर्मदा॥४०॥
कुमारादिगणाधीशाः सर्वेप्यर्चंतियानतः पूजयंतिमहादेवं ब्रह्मविष्ण्वादिपूजितं॥४१॥
गंधर्वोरगयक्षाद्याविविधैःसाधनैःशिवं पूजयंतिप्रयानेनसर्वदेवोत्तमोत्तमोत्तमः॥४२॥
अयंसोमान्वितः ततःपुण्योधुनाशंभुर्चिल्वपत्रादिसाधनैः॥४४॥त्वंचापिशंकरंसम्यक्
पूजनीयःप्रयत्नतः बिलंबंमाकुरुंगीत्यासावधानोभवाधुना॥४५॥करिष्यसिसदाभक्त्या
यदिशंकरपूजनं तदाविपुलभोगांतेलप्स्योमोक्षस्त्वयाध्रुवं॥४६॥प्रभप्यंमहादेव
वैकुंठंप्रापकेशवः तमनाद्यंतमीशानंशंकरंशरणंव्रज॥४७॥सर्वदेवोत्तमः सांबः

Indira Gandhi National Centre for the Arts

सर्वदेवशिखामणिः पूजनीयः प्रयत्नेन भक्तिफलेप्सुभिः॥४८॥महद्भाग्यतवास्येवं तथाचबहु
साधनैः पूजयस्वमहादेवप्रमादेनसर्वदा॥४९॥दीपानलक्षवाधिक्रीसाधकैर्राजितान्रचय
स्वातियत्नेनमहादेवालयेसदा॥५०॥लक्षपूजांकुरुक्षीरान्नैरन्वहमादरात् हेमपुष्पैश्चविल्वैः
लैर्हेमबिल्वदलैरपि॥५१॥शतवारंप्रयत्नेनदधिदुग्धाज्यमिश्रितं नैवेद्यमतियत्नेनशंक
रायनिवेदय॥५२॥यद्यस्मिन्भाग्यसमयेशंकरंनार्चयिष्यसि तदाकदावादेवेशंकरं पू
जयिष्यसि॥५३॥राजन्नैश्वर्यमखिलंतादृक्सफलंभवेत् यद्यर्चयिष्यसिश्रीमादेवदेवं
महेश्वरं॥५४॥शिवानर्पितरत्नानिभविष्यंतिवथातव तथाहमादेवक्तानिभविष्यंत
वथाध्रुवं॥५५॥धिक्धिक्तवैश्वर्यंयन्नेशार्चनसाधनं ईशान्योपिमहेशान्योनास्तिनास्ये श्रीराम
वसर्वथा॥५६॥राजन्माकुरुभोगेछांराज्येछामपिसत्यज कुरुयत्नेनसततंश्रीमहादेवपूज १६१ रा
नं॥५७॥विहायचंदनंराजन्भस्मनांगंविलेपय विहायरत्नाभरणंकुरुरुद्राक्षधारणं॥५८॥

श्रृणुशैवंकथांरम्यांकथामन्यांत्यजादरात् जपपंचाक्षरंशैवं महापातकनाशकं॥५९॥अनि
त्यमिदमैश्वर्यंराज्यंतेदुःखदायकं त्यजैश्वर्यमिदंशीघ्रंपूजयस्वंमहेश्वरं मापिमाकुरु
राजेंद्रस्नेहंदुःखैकसाधनं स्त्रीवशोनिधनंयातिसत्यमेवोच्यतेमया॥६१॥मांसग्रंथीस्त
नावेतौकिमन्यास्तिवदस्वमे विदारितेमांसमात्रंनिःसरिष्यतिसर्वथा॥६२॥श्लेष्मा
गारमुखंपश्यातेवचनंविनाश्रये विवेकोश्लेष्मपानार्थंयततोकिंवदस्वमे॥६३॥म
त्रागारोयोतिदेहः सादुर्गंधिसर्वदा तत्रयः कुरुतेप्रीतिंसएवाहनराधमः॥६४॥अतस्त्यजत
पिप्रीतिंकुरुशंकरपूजनं भजनिष्यमहादेवंब्रह्मविष्ण्वादिसेवितं॥६५॥देवानासार्वभौम
स्यमहादेवस्यसर्वदा विष्णुब्रह्मादयःसर्वेपूजांकुर्वंतियत्नतः॥६६॥योवनभ्रांतचित्तेन
त्वयापक्तंशिवार्चनंतत्यागेनरकावासोभविष्यतिनसंशयः॥६७॥राजन्शिवार्चनत्यागा
त्संतंतिनरकेजनाः प्राप्तानिनरकाप्यद्यापुरापक्तंशिवार्चनैः॥६८॥नित्याडितिंद्वाक्ष

Indira Gandhi National Centre for the Arts

श्रुत्वावचनमब्रवीत् कथंज्ञातमिदंसर्वमितिसातमुवाचच ॥६९॥ अदंपूर्वभवेराजन्नाकिरा
ताधमकन्यकाजातंहिलीवहनंपूर्वकाषकिंकरायदिन ॥७०॥नप्राप्तमन्तंसंपूर्णाकदाचिद
पिसर्वदा वस्त्रसवान्नीकातंचयत्नंऽपरिधीयते ॥७१॥वनेगतंमयापूर्वकाष्ठान्याहर्तुमेक
दा तत्रशैवोमयादृष्टःशिवपूजाविशारदः ॥७२॥नाघंकृत्वास्थितंतेनशंकरायेश्वरायतत्ततः
तंवीक्ष्यशंकरंनत्वामयानाघंकृतंतदा ॥७३॥ततोदेवाद्भुतस्मिन्नन्नरायेमरणंमम तदानी
मागतंमत्पुष्पकंस्वर्गलोकतः ॥७४॥तत्रगत्वास्वर्गलोकेबहुकालंस्थितंमया ततोनराधिनाथ
संभूतमुदरेमया ॥७५॥रंभाघाश्चजिताः सावासोदर्यराममध्रुवं सर्वदासुखमेयास्तिममदु
खंनकिंचन ॥७६॥शिवप्रणामनाघाभ्यांनिरंतरंसुखंयया प्राप्तमंतेमयामुक्तिःप्राप्तामा
संत्यमुच्यते ॥७७॥अतीतानागतज्ञानंमहादेवप्रसादतः ममजातमतः सर्वंसर्यातेनात्रसं
देहः श्रद्धत्वपृथिवीपते ॥८१॥एकवारंनतेनैनप्रणामेनचशंकरः सौभाग्यमीदृशं

मत्वमतिकारुणाददौ ॥८२॥ मयात्वहनिरांसांवः पूज्यतेबऊसाधनैः इदानींऽविरो
धेणपूज्यतेपार्वतीपतिः ॥८३॥ इत्युदीरितमाकर्ण्यरोमांकर्ण्यरोमांचिततनूरुहा
कोहंपूर्वभवेवंसवजीवनं ॥८५॥ कथंपार्थिवल्वपत्राणिसमानुत्वयापुरा वनंप्रविश्यगृह
नंऽबिल्वतरुसंश्रितं ॥८६॥तत्रैवबिल्वपत्राणित्रीठितानित्वयावने बहूनितानिसंवृ
ध्वायरावर्तत्वयावनात् ॥८७॥मध्येमार्गेतदाघोराबहवःसमुपागताः तद्दर्शनेनभीतिस्ते
बभूवप्राणहारिणी ॥८८॥सर्वाणिबिल्वपत्राणित्यक्त्वैवत्वरयात्वया प्रयत्नाश्रमतंनी
तंभद्येनमतत्वया ॥८९॥एतानिबिल्वपत्राणिशिलिंऽर्नार्मदे पतितानितदातेनसं
तुष्टः पार्वतीपतिः ॥९०॥ततः परंलिंगरूपीचपुमेवमहेश्वरः कृपालुः पार्वतीयुक्तःस्तवप्र
त्यक्षतांगतः ॥९१॥ वरंवरस्वराजन्नप्रत्यक्षेयरमेश्वरे राज्यंदेहिमहादेवमुक्तिंचाति
प्रणाम्यता ॥९२॥ततःसपार्वतीनाथस्तथास्त्वित्युक्तवान्मुहुः तत्रैवातर्हधेलिंगेबिल्वपत्रा

Indira Gandhi National
Centre for the Arts

भिवेष्टितो।९३॥ततःपरंसमुत्पन्नंक्षयाक्षोराश्वरोदरेभुज्यतेराज्यभागादिशंकरानुग्रहात्स
दा॥९४॥त्वयाज्ञातंबिल्वयत्नैर्महेशार्चनंकृतंतथापिभाग्यमतुलंददौतुभ्यंसदाशिवः॥९५॥
एतादृशःकृपासिंधुस्त्वयानाभ्यर्च्यतेशिवः यत्प्रसादेनसौभाग्यंप्राप्तमेवंत्वयाधुना॥९६॥
मोहंसत्यंधुनाराजन्पूजयस्वमहेश्वरं निमज्याभिचारेणशंकरंशरणंव्रज॥९७॥इत्यु
क्तःसतदाराजासंपत्काममोहमन्वहं अत्यंतंसावधानेनचकारशिवपूजनं॥९८॥शिव
स्थानानिबहुधाकारयामासभूपतिः रत्नपुष्पैर्महादेवंपूजयामासतत्परः॥९९॥सुवर्णा
बिल्वपत्रैश्चदशलक्षाणितैर्नृपः पूजयामासयत्नेनहेमपद्मैश्चसंततं॥४००॥अम्लेश्चपु
ष्पैरनिशंसंख्यादीनेमहेश्वरं पूजयामासयत्नेनबिल्वपत्रैश्चकोमलैः॥१॥दीपान्तत्क्षणावधि
प्रीत्यादशवन्यहमादरात् नैवेद्यानिप्रयत्नेनसबहुददानिनृपः॥२॥एवंशिवार्थमखिलं
रत्नारंनिवेद्यसः शिवमेवसदाध्यात्वास्थितःशिवपरायणः॥३॥ततस्तस्याभवत्

त्रःशिवपूजापरायणः तस्मिन्समयेतद्राज्यंसपत्नीकोवनंययौ॥४॥तत्रैतेनप्रयत्नेनवि
ल्वपत्रैर्महेश्वरः पूजितःसततंभक्त्यासपत्नीकेनसादरं॥५॥नवानिबिल्वपत्राणिसंयाघ्रगिरिजा
पतिं पूजयित्वाग्रतस्तेशाननंतंचचकारसः॥६॥ततःकदाचित्संपूज्यबिल्वपत्रैस्मदारि
वं पंचाक्षरंजपंकुर्वन्सपत्नीकोमतानृपः॥७॥तदेवकरुणासिंधुर्महेशोवीक्षतंनृपसहस्त्रप्रे
क्षयामासगणानांपुष्पकान्वितान्॥८॥ततःपुष्पकमारुह्यसपत्नीकोनराधिपः अनेनैवाहि
नागैर्गणागतःशंकरसन्निधिं॥९॥तदादुदुभयोनेदुःपुष्पवृष्टिर्बभूवच जगुर्गंधर्वपतयोने
तुश्चाप्सरोगणाः॥१०॥संपूजितोमयाराजापुष्पैर्नानाविधैस्तदा तदानीमेवमाहवचनंप्री
तमानसः॥११॥राजोवाच यमशासक्षयात्तेनशिवपूजापराभवान् अशेषानभिलं
ड्यपातयंश्चदुराशयात्॥१३॥इत्युक्तासयतोपूर्वंसोत्साहंहृदिताननः बहुधैवमेवोक्तं
बहुभिःशंकरैर्मुदा॥१४॥यःशिवस्तस्यनियमात्पूजनंक्रियतेमया शिवेदृढमहोत्सा

Indira Gandhi National Centre for the Arts

महानेवहिजायते॥१५॥रुद्राक्षधारणंमुख्यंकेवलंभस्मधारणं लिंगार्चनंकेवलंचयस्यशैवसमु
च्यते॥१६॥तादृशस्यपितुः शैवस्यपुः पूजांनकरिष्यति सोप्यस्मिन्नरकेघोरेपतित्वातिष्ठति
ध्रुवं॥१७॥शंकरस्यास्त्रियः शैवस्तातःशैवार्चनंसदा प्रयत्नेनैवकर्त्तव्यंतेनाऽभ्यर्चशंकरः॥१८॥
पुत्रास्तिनरकाम्दीप्तेतेनकार्यशिवार्चनं शैवार्चनंचनंत्रकर्त्तव्यमप्रमादेनसादरं॥१९॥पु
श्पेनंमलकुंडस्थंमंत्रपंक्तिनिभक्षकं सतत्यतीक्ष्णशस्त्रोघैस्ताड्यमानमहिंसा॥२०॥अथै
तद्ब्राह्मणाः सर्ववेदशास्त्रविशारदः अनेनब्रह्महत्यापागाः कृताःस्वर्गार्थमादरात्॥२१॥अत्रै
नैवैकदादक्षः शैवः शिवपरायणःनानादृष्ट्वाग्रहवचनमयमेवागतोगृहं॥२२॥अने
ननियमेअनेननियमेनेदं पूज्यतेभ्रांतचेतसा भस्मनागमयंश्चेतंकरोतीतिभ्रमात्तदा॥२३॥
इत्युक्तंहृच्छ्रुत्वाशैवोदुःखमुपागतः अनेनशिवलिंगस्यनामनोच्चारितंमुदा॥२४॥जगा
देदमितिभ्रांत्यभ्रांत्यासंपूज्यतेतिचं श्रीसदाशिवलिंगस्यनामग्रहणमाचरेत्॥२५॥नश्यं

तिपापगिरोवज्रसंताडितेवभस्मनागमयंश्चेतंकरोतिस्मृतवानयं॥२६॥नवेत्तिभस्म
मामाहात्म्यमयंयायत्नदुरात्मः ईदृक्स्मृत्वाशंविन्नहृदयंतंदृष्ट्वाशैवंपुंगवं बभा
षेचनंराजादेवात्तत्रसमागतः॥२७॥राजोवाच किमासीदधुनाब्राह्मन्नकिंवादुःखस्यकारणं
दुःखंचेत्तवमद्राष्टोराघ्रहानिंविधास्यति॥३०॥इत्युक्तंराजवचनंश्रुत्वाशैवोत्तमस्तदा
प्रदर्शैनमनेनोक्तंवचस्तस्मैन्यवेदयत॥३१॥ततःसराजाधर्मज्ञानाकृपद्विजपुंगवान्
एतस्यकीदृशीशास्तीःकर्त्तव्येपब्रवीत्तदा॥३२॥ततस्तेब्राह्मणाः सर्वेधर्ममार्गप्रवर्त्तकाः
श्रुत्वाशैवोस्यकर्त्तव्यःशीघ्रमित्यब्रितदा॥३३॥इतितद्वचनंश्रुत्वाधर्मज्ञःसनराधिपः तस्मै
चकारशीघ्रेणाश्रुत्वाशैवंप्रयत्नतः॥३४॥शैवदुःखप्रदोमर्त्यः शिवपूजापराङ्मुखठ आतता
पितिविज्ञेयस्ततोहत्तमएवसः॥३५॥यघातताविनपूजांमहन्याद्धनवित्तमःपापेवनरकंघो
रंयावदाचंद्रतारकं॥३६॥अतएवधर्मज्ञालोभमोहविवर्जिताः अशैवानांप्रयत्नेनकर्त्तवं

Indira Gandhi National
Centre for the Arts

त्रेवहिशासनं॥३७॥तदादुःखमयंभुक्तंतथात्रापिसमागतं एतस्यवक्रुधाग्रेपिभविष्येत्ववयातना
॥३८॥कल्पकोघयुतंघोरंदोषंसमुपाश्रितः ततोयंपुल्कसोभूत्वाखाडालोपिभविष्यति॥३९॥
आलोकयेतान्संतप्तांस्तांश्चमनानयोधनैः तदंस्तभान्समालिंग्यसंस्थितान्दुःखितान्सदा॥४०॥
उपहासाःकृतास्तेतःशैवस्यचलतःपथितेनदुःखमिदंभुक्तंतिष्ठतेहिसर्वदा॥४१॥भिंडिवा
लैस्ताडयमानान्पश्येतान्सावधानतः एतैस्तुरोवधिक्कारःकृतोमोहेनसत्वरं॥४२॥संतप्तागा
रशाकटस्थितानेतान्विलोकय एतैर्गर्वेणानकृतंशैवातांवदनंमुदा॥४३॥विदार्यमाणान्कृ
कचैःपुरोतान्साधनतःअभ्युत्थानंनरैर्नैतैः कृतंशैवायभक्तितः॥४४॥पश्येतान्श्लेष्मकुं
डस्थानेतैरेवदुरात्मभिः अन्यैरुत्पत्तयाज्ञातः शैवः शिवपरायणा॥४५॥पश्येतान्मलकुंड
स्थावर्ध्वपुंड्रधारान्मुदा पश्येतान्कालकूलकुंडस्थांस्तप्तचक्राकितान्सदा॥४६॥पश्ये

तान्मूत्रकुंडस्थानेतैरेवदुरात्मभिः शंकरायानिवेद्यैवजलंयोतंप्रमादतः॥४७॥य

शेतान्मूत्रंकुंडस्थानेतैरेवदुरात्मभिः शिवानर्पितंमेवान्नंभुक्तंयात्तपुरःसरं॥४८॥पश्येतान्मूत्रकुं
डस्थानेतैरेवदुरात्मभिः शिवायानर्पितं दुग्धंसाज्यंयोतंप्रयातनतः॥४९॥पश्येतान्मलकुंडस्थाने
तैरेवदुरात्मभिः शिवतीर्थमयाविवभुक्तंयात्तपुरःसरं॥५०॥पश्यसंतप्तशस्त्राग्रैर्भ्रामंतमतिदा
रुणा अनेनकृताःपूर्वंशंकरायप्रदक्षिणाः॥५१॥पश्येतान्पतितांस्तप्तलोहस्तंभेभयप्रदे शिवायनकृ
तास्चेतैः साधुगर्जनयोभ्रामात्॥५२॥पश्येतान्मलकुंडस्थान्समंत्रंमलभक्षकान् एतैःपुराकृतावा
भुक्तंसर्वदासोमवासरे॥५३॥मूत्रगर्तेस्थितान्पश्यनित्यंसंतप्तमूत्रयान् त्रिपुंड्रधारांस्तत्काभु
क्तमेतैर्दुरात्मभिः॥५४॥पश्येतान्मलकुंडस्थानसमंत्रंमलपूप्रयान् शिवार्चनंविहायैवभुक्तमेतै
दुरात्मभिः॥५५॥पश्येतांकृमिकुंडस्थान्कृमिभक्षणतत्परान् रुद्राक्षधारणंत्यक्त्वाभुक्तमेतैर्दुरात्म
भिः॥५६॥अग्निकुंडादिकुंडस्थानश्येवाकृमिकुंडस्थान्पश्यसादरं मूलादिभिस्ताडयमानान्सर्वदा
दुःखवहितान्नरान्॥५७॥अशैवःसंतियावंतःपातालेपृथिवीतले तावंतोप्यघुतिष्ठंतिनरकेषुवि

Indira Gandhi National
Centre for the Arts

त्लोकय॥५८॥अशेवाबहवोभस्मोभविष्यतिकलौयुगे तेपातनीपापतेननरकेषमयाध्रुवं॥५९॥अन्यान
रसंमत्वापेतिचंतिमहेश्वरं अशेवास्तइतिज्ञेयास्तेघोरनरकाश्रयाः॥६०॥शिवार्चनंविहायान्यंपर्चय
तिनराधमाः अशेवा०॥६१॥शिवस्यवातियत्नेनपश्यंतिसादरं अशेवा०॥६२॥येनकुर्वंतियत्नेनत्रि
कालंशंकरार्चनं अशेवा०॥६३॥शिनेवातियत्नंनयेनपश्यंतिसादरं अशेवा०॥६४॥येनकुर्वंतियत्ने
नप्रदक्षिणानुपापतेः अशेवा०॥६५॥विश्वाधिकमाकांतननमस्पतियेसदा अशेवा०॥६६॥शिवमेवा
तियत्नेनेनाभिध्यायतियेसदा अशेवा०तियत्नेननामनोच्चारयंतिये अशेवा०॥६९॥शिनेवातियत्नेनरु
द्रेत्रिसदेवये अशेवा०॥७०॥येनकुर्वंतितेसततंकेवलभस्मधारणां अशेवा०॥७१॥येनकुर्वंतिस
ततंभस्मनोनोद्धूलनंसदा अशेवा०॥७२॥येनकुर्वंतिसततंगलेरुद्राक्षधारणां अशेवा०॥७३॥
येनकुर्वंतिसततंरुद्राध्यायजपंसदा अशेवा०॥७४॥येनकुर्वंतिसततंपंचाक्षरजपंसदा अशे
वा०॥७५॥दत्तजप्तंकृतंतप्तंनशिवायार्पयंतिये अशेवा०॥७६॥येनकुर्वंत्यहरहः शिवाग्रेनर्तनं

र्तनंमुदा अशेवा०॥७७॥येनभुंजतेफलीन्नादिशंकरनर्पितंसदा अशेवा०॥७८॥निसमय
निचारेणशिवभक्तानयेमुदा अशेवा०॥७९॥र्वदासर्वभावेनशिवनिष्ठानयेमुदा अशेवा०
॥८०॥शिवनिर्माल्यनजनजनजनेनपिवंतुसदाहुये अशेवा०॥८१॥नभोजयंतिशैवंयेक्षीराज्या
दिभिरादरात अशेवा०॥८२॥नतोषयंतियेशैवंस्वशक्त्याद्रव्यदानतः अशेवा०॥८३॥अस्पृ
श्यशिवकुशरणायेनमनोवाक्कायकर्मभिः क्षेत्रंयन्पक्षेत्रसमंविदुः अशेवा० शिवयात्रांविहाया
न्ययात्राकुर्वंतियेमुदा अशेवा०॥८५॥शिवकुशरणायेनमनोवाक्कायकर्मभिः अशेवास्ता इ
तितेयास्तेघोरनरकाश्रयाः॥८६॥ईदृशानामशेवानांनरकेभ्योनिर्गतिः अनेकब्रह्मकल्पेषु
गतेष्वपिनसंशयः॥८७॥एतेषांकोटिशोजातास्तत्रकल्पास्तथामिताःनिर्गच्छंतिततोघोरेभ्योनरकेभ्योनिष्कृतिः॥८८॥
ध्वंध्वस्तएवघटोभस्मीयदिकर्मक्षमोभवेत् अशेवानांतदाप्येभ्योनिर्गतिः॥८९॥भस्मसाद्दग्धमेवा
न्नंयदिपुष्किरभवेत् अशेवान०॥९०॥मृतोदग्धोभस्मभूतोयदिजीवतिमानवः अशेवान०॥९१॥

Indira Gandhi National Centre for the Arts

सुगंधंयुष्पमुत्कृष्टंगानेयदिजायते अशो०॥९३॥यदिस्वभावतोवह्निर्भवत्यंतशीतलः अशो०॥९३॥
यदिस्वभावतः सौम्यंजलंपजतिसर्वदा अशोवः॥९४॥पृथ्विनायांदिशिस्वल्पंयदि भानुरुदेष्यति अ
शो०॥९५॥पृथयंदेवनित्यः सुमेरुदक्षिणादिशि अशो०॥९६॥क्षीराध्वप्रमुखाः सर्वेसमुद्रायदि
संगताः अशो०॥९७॥पातालोयदि अशोवा०॥५००॥वज्रनाकेनकिंवाक्यमेकंसयमुदीर्यते अशोवा
नीमघोरम्योनानिर्गमः॥१॥अतः प्रयत्नतोनित्यंकर्तव्यंशंकराचन शिवोभक्त्याशिवोनिसंभज
नीयःप्रयत्नतः॥२॥आपांवर्तेपुराकश्चिद्ददर्शगायारगः शिवेकशररणोनिसंशिवपूजायरायाः
॥३॥रुद्राक्षमालाभररणोभस्मोद्धूलितविग्रहः भस्मत्रियुंड्रनिटिलः शिवध्यानपरःस्थितः॥४॥ए
तद्द्विजेश्रेष्ठकश्चित्खोऽशावृषिकः वेदाध्ययनसंपन्नोददर्शवनमध्यगं तदानीतंद्विजंदृष्ट्वा
शिवपूजापरंमुदा प्रणम्यविनयोद्वेल्लन्वाचसंकृताजलिः॥६॥स्वामिन्सर्वज्ञविप्रेंद्रमोक्षोपायंवदत्वमे प्र
यन्नोस्मिकृपासिंधोशिक्षयत्वंयथोचितो॥७॥इतितद्वचनंश्रुत्वाशिवपूजासमोप्यसः उवाचेदंवचनं

चारुसर्वलोकहितावहं॥८॥ब्राह्मणोमप्रमादेनसादरं श्रृणुसिद्धंवदिष्येहं मोक्षोपायमनाकुलं
॥९॥यामिनीयश्चिमेयामेकुरुशंकरचिंतनं ततःशौचादिकंकृत्वाकुरुस्नानंप्रयत्नतः॥१०॥स्नानका
लेमहादेवंस्मरसांबमतंद्रितः परिधायतोवस्त्रंभस्मनोद्धूलनंकुरु॥११॥ततःशिरोललाटादोय
थामंत्रंयथाक्रमं त्रिपुंड्रधारणंश्रोतंकुरुकेवलमादरात्॥१२॥त्रिपुंड्रधारणात्स्वर्गंतदनंतर
मेववा विप्रमुच्चंदनादीनीललाटादोनलायया॥१३॥विप्रजावालमार्गेणकुरुरुद्राक्षधारणा ततः
कुरुपथायोगंध्यादेवीततोजपं॥१४॥ततःकुरुपथायोगंहोममाज्यादिसाधनैः ततोयत्नेनविधि
वन्महादेवार्चनंकुरु॥१५॥महादेवस्यपूजायांसावधानःसदाभवः रुद्राध्यायेनसततंमभिषे
कंकुरुप्रभोः॥१६॥बिल्वपत्रैर्महादेवंपूजयंस्चातिभक्तितः रांभीःपंचाक्षरैर्वाबिल्वपत्रार्पणं
कुरु॥१७॥पंचाक्षरंमहामंत्रः सर्वमंत्रशिरोमणिः तेनसंपूजितः शंभुर्भुक्तिंमुक्तिंप्रयच्छति॥१८॥
वैदिकोयंमहामंत्रस्ततोवैदिकपूजनं शिवप्रियकरंयस्मात्तेनपूजयशंकरं॥१९॥फलंनो

Indira Gandhi National
Centre for the Arts

नेनवारंभः कुरुनैवेद्यमादरात् प्रदक्षिणाविधानेनेकुरुसम्यक्प्रदक्षिणाः॥२७॥साष्टांगा
न्कुरुयत्नेनप्रणामान्श्रीमहेशितुः शंकराग्रेप्रयत्नेनकुरुनर्तनमादरात्॥२८॥पश्चान्निःसृ
यत्नेमपूजितंसांबमीश्वरं पिबयत्नेनसततंशिवानिर्माल्यजोदकं॥२९॥एवंनेवप्रयत्नेनमध्याह्नेपि
महेश्वरं बिल्वपत्रादिभिः सम्यक्पूजयस्वातियत्नतः॥३०॥सायंकालेपियत्नेनपूजयस्वेवमी
श्वरंपूजांप्रदोषकालेनादृताद्दृढांभवाद्विजा॥३१॥शिवंपंचाक्षरंमुच्चैर्जपयत्नपुरःसरं निवे
द्यशंकरायान्नंततोभुंक्ष्वयथोचितं॥३२॥स्मरन्यत्नेनसततंमहादेवकथाः शुभाः निरंतरंमति
म्प्रीत्याकुरुशिवाभिवादनं॥३३॥स्वरात्रेर्यापुष्पपत्राद्यैः शिवानांपूजनंकुरु दूरेपिपतितंशिरो
वाःशंकरपूजकाः॥३४॥तत्रापिगत्वायत्नेनकुरुशंकरपूजनं कुरुसंध्यापमनिर्शंकरैः सर्वदा
॥३५॥मासंत्यजंश्चमेणापिद्विजशंकरसन्निधिंकुरुप्रीतिप्रयत्नेनशंकरे शिवसादरं॥३६॥स
दाशिवकथांशिक्षांशिरसास्वीकुरुद्विज शिवबुद्धिंकुरुप्रीत्याशिवेसुसततंद्विजा॥३७॥सहस्रा

शंकरास्फटिकंपात्रंतथान्योपदिशंतिते तथापिशैववर्त्मायासेवापापापनोदिनी॥३८॥शिवाःशंक
रतत्त्वावरुक्तोऽर्द्धमाम्भवि तादृशान्सावधानेपूजयस्वस्वशक्तितः॥३९॥अशिवपत्रा
णितत्रमावसमावस अशिवसंगमोदुःखेनकावासस्साधनं॥४०॥अशिवंपथिवान्मत्रकदा
चिद्दिपश्यति तदाभस्मनांगानिसंस्पृश्यार्कविलोकया॥४१॥कायमुद्धूलनंकृत्वाकुरु
शंकरपूजनं प्रदक्षिणानमस्कारनर्तनानिकुप्रिया॥४२॥जपेत्पंचाक्षरंनित्यंरात्रावतियत्न
तः शिवस्यसन्निधावेवशयनंकुरुसादरं॥४३॥ऊर्द्धपुंड्रंचकृत्वेवशयनंकुरु यत्नो
पवीतवान्नित्यंकुरुरुद्राक्षधारणं स्निग्धार्चनंचविविधंवृत्वाद्विजजलंपिब॥४४॥सर्वदासा
धनेनकुरुशंकरचिंतनं कर्मणामनसावाचाशंकरंशरणंव्रज॥४५॥शंकरप्रवणंयत्नमनोवाक्का
यकर्मभिः सत्यंत्यंवसंसारमनायासेनसर्वथा॥४६॥शंकरंशरणंगत्वासदेवशिवमाणि
संसारसागरंघोरंनतिष्यंतिमानवाः॥४७॥संसारतरणेपायः श्रीमहादेवपूजनं नातस्मादधि

Indira Gandhi National
Centre for the Arts

कोपायः सर्वसंसंवदाम्यहं ॥४३॥ मोक्षोमिच्छतियोमर्त्यः शंकरा भ्यर्चनंविना समर्वइतिविज्ञेयः सतुस्माभाष्यएवन ॥४४॥ शंकराभ्यर्चनानिसंकर्तुसर्वश्रुतिश्रुतं तत्यागेरौरवे घोरेभवत्येवहिसंस्थितिः ॥४५॥ महादेवार्चनादेवमुक्तिसमभिचारिणी शिवमन्यभिचारेणपूजयत्यत्रयत्नतः ॥४७॥ शिवमन्यभिचारेणयोन्वहं पूजयिष्यति नतस्यनरकावासः सर्वथेतिहिश्रुतिः ॥४८॥ पथापतिव्रतानारीपतिसेवायरातथाशिवमभिचारेणपोन्वहं पूजयिष्यति नशिवमेवभजद्वीसमनोवाक्कायकर्मभिः ॥४९॥ महापापविघोरायांमाविस्मरमहेश्वरं नायास्संसायदः पुंसाशंकरस्मरणोद्यतः ॥५०॥ शंकरस्मरणादेवमहापातककोटयः विनश्यंक्षणादेनसत्यंहिश्रुतिः ॥५१॥ ततः प्रयत्नतोनिसंशंकरं पूजयप्रभुं श्रीमहेशार्चनादेवमोक्षइत्यहिश्रुतिः ॥५२॥ करुसर्वप्रयत्नेनरत्नवद्भस्मसंग्रहं क्षणाद्धंमविनस्येयंभस्मयोगंविनाद्विजा ॥५३॥ स्वेदादिनाकदाक्लेद्भस्मनिर्यातिनक्षणो करुजाबालविधिनाभस्मनोद्धूलनाद्विजा ॥५४॥ सितकेवलभस्मांग

त्रिपुंड्रांकितस्फटिकं शिवलिंगैकनिरतंनमंतिरक्षदेवताः ॥५५॥ शिवमन्यभिचारेणयदियास्यसि तदाविघ्नकारणाभ्रतिभिः पूजनीयोभविष्यसि ॥५६॥ भरिपुरापवतांयुसाशिवएवेष्टदेवतं अन्येषामल्पपुराणामादेवतास्याच्छिवेतरः ॥५७॥ शिवैकदेवायेतेषांशिवंभवतिसर्वदा शिवान्यदेवायेतेषांनशिवंसर्वदाभवेत् ॥५८॥ भजंत्यभाग्यापापाप्तिशिवान्यमशिवार्थिनः तेषांतुघोरसंसारान्निर्गमोनकदाचन ॥५९॥ अशेवंयस्यनिटिलेतस्यैवाशिवदेवतं शिवयस्यललाटेस्तितस्यस्याद्देवतंशिवः ॥६०॥ भजत्वमपियत्नेनशंकरंलोकशंकरं नित्यमन्यभिचारेणशरणंयाहिशंकरं ॥६१॥ संसारतरणोपायः शंकरस्यैवपूजनं सत्यमुद्धृत्यभुजमुच्यते ॥६२॥ संसारसर्पदष्टस्यशिवपूजनमौषधं तदन्यदौषधक्लाप्तिनास्तिनास्त्येवसर्वथा ॥६३॥ येमग्नाः सततंघोरसंसारसागरे तैरन्वहंप्रयत्नेननाराधिगिरिजापतिः ॥६४॥ तत्तत्सर्वप्रयत्नेनपूजयस्वमहेश्वरं संसारसागरंघोरंयदिसंतर्तुमिच्छसि ॥६५॥ इत्युक्तंद्वचः श्रुत्वासंतुष्टाहृदयेनदा

Indira Gandhi National Centre for the Arts

सर्वमन्यत्परित्यज्य शिवपूजापरोभवत्॥६६॥ततः सबालकस्तत्र बिल्वपत्रैर्मनोहरैः समर्चयन्म
हादेवम्त्वासप्रीतिमानसः॥६७॥ऊर्ध्वपुंड्राभ्यामुलंकृतानन्दार्द्रजः शिवपूजांप्रकुर्वाणः
कृतार्थस्वममन्यत॥६८॥अन्यानबिल्वैरातान्नेरसंख्यातैर्महेश्वर पूजयंस्वातियत्नेनप्रसहंसु
दितानन:॥६९॥आस्वेदमतियत्नेनप्रणामीत्सचकारचचकारनर्त्तनंनिसंशंकराग्रेप्रयत्नतः॥७०॥
सशंकरैकशरणाः सर्वदाशंकरार्चकाः शंकरंपूजयन्नेवजहौप्राणान्कदाचन॥७१॥ततस्तस्मैन
हेशोनविमानंप्रेषितंमुदा सवितानंसमारुरुक्षंगतः शंकरसन्निधिं॥७२॥अनेनैवहिमार्गेणास
गीतः शैवपुंगवा तदातस्मैमयापूजाकृताशक्त्यनुरोधतः॥७३॥तदासमामुवाचैवप्रहसन्चन्द्रशे
खरः शिवपूजाप्रभावंजोमन्यतेमन्यथामुदा॥७४॥यमकिंक्रियतेनित्यंसर्वदासावधानतः
अशैवास्तत्तशस्त्राद्यैः शास्यतेखलुसत्वरं॥७५॥अशैवैस्तुत्वयाकालकूपानक्रियतेखलुअशै
वाःखलयासंतेनरकेषुयथायथं॥७६॥अशैवानग्निकुंडेषुपातयस्वप्रयत्नतः विदारयस्वत्रक

काचैरग्नितप्तैश्शंकरान्॥७७॥इत्युक्तासयशैवः शिवाराधनतत्परः इंद्रोपेंद्रादिभिः सम्यक्पू
जितः शंकरालयं॥७८॥मयालब्धोधिकारोयंदासोबान्महेश्वरात् तदैवमाहवचनंशंकरः सुरसत्त
मः॥७९॥श्रीमहादेवःरेरेयमत्वयानित्यंपूजाकर्तव्यतेदृश्यते शृणुष्वसावधानेनचित्तमन्यत्रमाकुरु॥
८०॥येमामभ्यर्चयिष्यंतिशंकरं तानर्चयानिरीहभक्त्यापुष्पबिल्वदलादिभिः॥८१॥
अनन्यचित्ताःसततंयेमद्भक्तिंप्रकुर्वते तानर्च०॥८२॥येमामनन्याःसततंप्रणमंतिस्तुवंतिच तान
र्च०॥८३॥येमदर्पितकर्माणोमदेकशरणाःसदा तानर्च०॥८४॥येकुर्वंतिप्रयत्नेनभस्मनोद्धूलनंसदा
तानर्च०॥८५॥त्रिपुंड्रांकितनिटिलारुद्राक्षाभरणाश्चये तानर्च०॥८६॥रुद्राध्यायजपासक्ताः
पंचाक्षरपराश्चये तान०॥८७॥नित्यंशिवकथासक्ताः शिवनामपराश्चये तानर्च०॥८८॥शिवलिं
गंसम्पूज्यपोषंनदंतिसर्वदा तान०॥८९॥येमांसर्वोत्तमत्वेनज्ञात्वातिष्ठंतिसर्वदा तानर्चयानि
शंभक्तापुष्पबिल्वदलादिभिः॥९०॥ऊर्ध्वलक्षणसंपन्नाशैवाइत्यवगम्यतां एतादृशानांशै

Indira Gandhi National
Centre for the Arts

वानांपूजयापूजितोस्म्या॥९१॥ उक्तलक्षणसंपन्नानभविष्यंतियेजनाः अशैवास्तेततःसेवांकुरुशा
सनमन्वहं॥९२॥अशैवाघोरनरकेघशेष्यंतिसुदुर्यतः पातनीयाः सर्वथैवमामाकुरुकृपांयम॥९३॥
अशैवेभ्यस्मादाहृत्यकृपांयदिकरिष्यसि तदाऽहंपातयिष्यामिभवंतंनरकेघहं॥९४॥यःशिवद्रोहि
णंस्तेऽनुशासनीयास्त्वयान्यहं अन्यथात्वधिकारोयमन्यस्मैदीयतेमया॥९५॥इत्युक्तोहंमहेशेन प्रेषि
तोस्मिशचीपते तदोद्भ्रमतियत्नेनमयात्रस्थापनेध्रुवं॥९६॥सदाशिवः इतिकालवचः श्रुत्वारा
चीनाथस्तदाशिवे रोमांचिततनुर्जातोबाष्पपूरितलोचनः॥९७॥एतस्मिन्नंतरेदेविब्रह्मलोकनि
वासिनः कोटिशः पतिताविप्रानिष्यमाणरकारणवे॥९८॥नरकेपतितान्दृष्ट्वातानिद्रोयमब्रवीत्
कथमानोगलद्बालघ्नोयमदृष्टभयानकं॥९९॥इंद्रः एतेकेकिंकृतंकर्मस्थितंकुत्रयुगायम कोदाम्वि
धेघुनरकेघोरेस्थास्यंतिततदृढं॥६००॥नभलोकात्समायातमेतैः किंस्वर्गलोकतः समागतमतः
कालेकिमेतन्नाम्नुतेवद॥१॥यमः इंद्रवचयम्नुतेदृष्ट्वातांश्चराम्सादरंपृष्ट्वातत्स्वकथनंश्रु

त्वामयप्रदं॥२॥एतत्कुलसमुत्पन्नः काशीश्राद्धविधानतः काश्यांपिंडप्रदानानिचकारविधिपू
र्वकं॥३॥एतेतेनैवपुण्येनब्रह्मलोकमुपागताः पुरात्रुस्थितमत्रैवनरकेघतिदुःखितेः॥४॥एतत्कु
लसमुत्पन्नः काश्यांस्थित्वायदातदा चकारतर्पणंतेन प्रीत्याघेतेतदातदा॥५॥सुधापानेनयाप्री
तिर्देवानामभवत्सदा ततोप्यधिकतृप्तिर्वैपितॄणांश्राद्धतोभवेत्॥६॥काशीस्थितिलतोयेपितृभ्योदत्तमक्षय
मेवयातथा सुधापानेपितॄणांतृप्तिः सर्वमंत्रनसंशयः॥७॥काशीस्थंसतिलंतोयंपितृभ्योदत्तमक्षय
तृप्तिः तर्पितास्तेमतंमत्वासंप्रीणयतितर्पितृन्॥८॥मणिकर्णीजलंयेनपितृभ्योदत्तमादरात्
तेनदत्तंसुधासिंधुःपितृभ्योनात्रसंशयः॥९॥पितृनुद्दिश्यसंनिलंक्षीराज्यमधुसंयुतं मणिक
र्णयांयेनदत्तंसपितॄन्तारयिष्यति॥१०॥अमासोमवतीप्राप्यकाश्यांश्रीवृषभध्वजं यः करोति
पितृश्राद्धंसपितॄन्तारयिष्यति॥११॥अमासोमवतीप्राप्यपुरेतद्दुरासंभवः श्राद्धंचकारयत्ते
नदृषभध्वजसन्निधौ॥१२॥अथवंशिरसंपृष्ट्वाद्दकालेसभक्तिमान् ब्राह्मणान्श्रावया

Indira Gandhi National
Centre for the Arts

मासश्राद्धभोजनतत्परान्॥१३॥ पठन्नथर्वशिरसंपः कुर्याच्छ्राद्धमादरात् सपिंडीरयवैर्वाजगणास्पा
विरोधतः॥१४॥ तेनपुण्यप्रभावेनपुरैतेमुदिताननाः तिरस्कृसामतंतस्थुःपूजिताब्रह्मणायुरा॥१५॥
नियंब्रह्मसभासद्भिर्ब्रह्मणापिसमार्चिताः अतिसंतोषमासाद्यब्रह्मलोकेस्थिताध्रुवं॥१६॥अथै
वंघटिकास्र्वकाश्यामेतत्कुलोद्भवः श्रीमंदांतर्हरम्येचक्रेमंत्रविसर्जनं॥१७॥तेनैवपातकेनैतेस
र्वेनासितारोधुना पच्युताब्रह्मसदनात्पतितानरकार्णवे॥१८॥अतःपरंतमशस्त्रैरेतेसंताडितास्ततः
पतिष्यंत्यग्निकुंडेषुघोरेष्वविविधेषपि॥१९॥ततःपरंमत्रकुंडेपतिष्यंतिदारुणे ततःपुरीषकुंडे
षुपतिष्यंतिदारुणे॥२०॥तानक्षमकटाहेषुतप्तेतेलाढ्यतेषपि पतित्वावह्निकुंडेषुपतिष्यंतिततः
परं॥२१॥ततस्तमोयमसभेघंटेबद्धाःप्रयांततः ताडनीयास्तमशस्त्रैराकल्पंनात्रसंशयः॥२२॥
अनंतंब्रह्मकल्पांतेप्यंतनरकलोकतः निर्गतानभविष्यंतिसंसत्यराचीपते॥२३॥शिवः इत्यु
क्त्वाप्रेरयामासदूतास्तान्ताडनायसः ततस्तमोयमशस्त्रैस्ताडिताः पितरःशिवे॥२४॥पार्वत्युवा

च अंतर्ग्रहेकृतोयेनमंत्रोत्सर्गोदुरात्मनी सगतः कुत्रतद्वार्तांवदशंभोदयानिधो॥२१॥शि
वः अंतर्गहेसमोहेनकृत्वामंत्रविसर्जनं हाहतोस्मीतिदुःखेनरुरोदबडधाशिवे॥२२॥स
यदांतर्गहेमोहंचक्रेमंत्रविसर्जनं तदांतर्दृष्टेर्विप्राजाबालश्रुतिपारगाः॥२७॥इत्या
तमब्रुवन्सर्वेपित्रोधात्मन्विलोचनाः पापात्मंस्ताडयेतंस्तेत्राहस्तावरानने॥२८॥विप्रः सविप्रशं
कलागारेश्रीमदंतर्गहेत्वयामंत्रोत्सर्गःकृतोमोहात्तेनदुःखमवाप्स्यसि॥२९॥सर्पपाइवलिगा
निश्रीमदंतर्गहंसदा तिष्ठंतितेषुपतितंमंत्रमेतत्तवाधुना॥३०॥अनेनमंत्रपातेनपापमात
कर्मार्जितं तावत्पापंब्रह्महत्याकोटिभिश्चनचार्जितं॥३१॥अनंतब्रह्महत्याचपातकानिकदा
चन विनश्यंतीदृशंपापंकदापिनविचक्षणे॥३२॥अंतर्गहेप्रवेशात्तुसुराणामपिदुर्लभः इद
मंतर्गहेरौद्रंमंत्रोत्सर्गःकथंकृतः॥३३॥यथाकथंचिद्यात्रार्थंमंतर्गहेप्रविश्यते शंकरानु
ग्रहान्नोचेत्प्रवेशोप्यतिदुर्लभः॥३४॥अंतर्गहंपूजयंतिदेवाबिल्वदलादिभिः स्तुवंत्यंतर्गहे

Indira Gandhi National
Centre for the Arts

याः कृतांजलिपुटाः सदा॥३५॥यस्मिन्नंतर्गृहे सांबो विश्वेशो देवतोत्तमः तदंतर्गृहमुत्सृज्य कोवा नाराधयिष्यति॥३६॥अंतर्गृहे पूजयति यो विल्वकुसुमादिभिः तानर्चयंति पत्रेण सस्यसंपन्नसंश्रयः॥३८॥अनेतशाखोवेदोवा शोवामुनयोथवा अंतर्गृहस्यमाहात्म्यनज्ञानेयेवक्लृप्ताः॥३९॥एतादृशि वागारेश्रीमदंतर्गृहेत्वया कपर्दिकृतदुराचारे मत्रस्योत्सर्जनंवद॥४०॥नत्वदन्योमहापापीयाफरारि स्त्वमीदृशः तवेदृशस्पदुष्टस्यमुक्तिरस्तुदुर्लभा॥४१॥नरकेषुपतिष्यंतितेरस्त्वंसर्वथा तवा पियातनाघोराभविष्यंतिनसंशयः॥४२॥तवाऽब्रह्मकल्पांतेप्यनुयायातनाद्विज भविष्यंतिनसंदेहोवेदाएवात्रसाक्षिणः॥४३॥यद्यच्चतेतदुत्सृज्यगतस्तदाभैरवयातना अनेककल्पयंतेभविष्यंतिनसंशयः॥४४॥अन्यत्रापितदुत्सृज्यगेघोरांतेयमयातना अनेककल्पयंतेभविष्यंतिनसंशयः॥४५॥पितृचिःसहदुःखानियस्मोकेत्वयाद्विज भोक्तव्यान्यतिघोराणितत्तस्मात्प्रच्युतिस्तव॥४६॥तत्पापिरुग्रैर्दूतैर्वायागेर्वावऊदक्षिणोः क्वत्रुतस्यास्पपापस्यचिनाशोनभविष्यति॥४७॥

संतप्तमत्रकुंडेषुतववासोभविष्यति ततःपुरीषकुंडेषुवासस्तवभविष्यंति॥४८॥संतप्तलोहसं भोगेवध्वासंतप्तश्वखलैः भवांतंताडयिष्यंतियमदूताः शरीरके॥४९॥ततस्तापापसैः पिंडैर्भवंतंपा पकृत्तमं ताडयित्वातप्तशस्त्रैस्ताडयिष्यंतिसंततं॥५०॥शिवऊवाच इत्युक्तोतत्तोविप्रोभस्त्रिपुष्ट्वा तुतंद्विजंयर्युपीत्रार्थमुद्युक्तमन्नामस्मृतिपूर्वक॥५१॥ततःसलासितोविप्रैर्वडुभिर्निर्दितोमुहुः जहौकाशीन्निमांपुण्यांशिवस्यसर्वश्रुतिश्रुतां॥५२॥ततःसदुःखितोविप्रःकाशीत्यक्त्वातमांतुरः जहौप्राणांस्ततोनी तःसदृष्टोयमकिंकरैः॥५३॥ततःसपातितोविप्रोयमाग्रेक्रूरशासनैः तंदृष्ट्वाप्राहरामनश्चित्रगुप्त विशारदं॥५४॥यमःचित्रगुप्तायमामीतोमदीयैःकिंकरैरिहअनेनविकृतंकर्मतदुदस्वयथार्थतः ॥५५॥इत्युक्तश्चित्रगुप्तोपियमेनयममाहतं तत्कृतंदुष्कृतंकर्मविचार्यादरपूर्वकं॥५६॥चित्रगुप्तःअ पंकाश्यांशिवागारेश्रेष्ठःमदंगृहेयमः भ्रमान्मत्रविसर्ज्यादोततःकाशीवहिर्गतः॥५७॥काश्यांमंत र्गृहेयेनकृतंमत्रविसर्जनं तेनघोराणिदुःखानिपापानिनसंशयः॥५८॥यमस्तमतिवेगेन

नीडयिलायसैः शरैः श्रांतोभटान्वाचेदंताडयेति सत्वरं॥५९॥ततोयमभटायमेनप्रेरिताः पिंडे
तंछिंजंताडयामासुस्तप्तत्रैरतिदारुणैः॥६०॥ततः सपातितोविप्रस्तप्तमत्रहृदेनटेः ततः पातितो
विप्रोवन्हितप्तमलहृदे॥६१॥प्रतप्तलोहस्तंभाग्रेसंबद्धस्तप्तश्रृंखलैः ताडितस्तप्तशस्त्रौघैर्मिंडि
पालैश्चताडितैः॥६२॥ततप्तलहृदे प्रतप्तलोहस्तंभाग्रेसंबद्धस्तप्तशृंखलैः तैलकराहेषुपातितः
सततोभटैः प्रज्वलद्वह्निकुंडेषुपातितः ततस्ततः परं॥६३॥एवंप्राप्यस्थितोविप्रः पितृभिस्सहतानं अनंतदुःख
दंदेविपुनरादृत्तिदुर्लभा॥६४॥येकाश्यांमृतकथांत्यक्त्वास्थित्वाकाशीवहिर्गताः तेषांमपिभवत्येवं घो
रानरकयातना॥६५॥येकाश्यांमृतकथांत्यक्त्वास्थित्वाकाशीवहिर्गताः तेषां॥६७॥काश्यामन्यत्रवा
येतुभक्तानाराधयंतिमां तेषां॥६८॥विभूतिधारणादीनित्यत्क्वातिवेनराः तेषां॥६९॥सोमवारव्र
तंशैवंनकरिष्यंतिपेजडाः तेषां॥७०॥एवंयमभटैः क्रूरैः शासमानंद्विजाधमं तंदृष्ट्वाहवचनंरा
जोपतिरवस्मयः॥७१॥ इद्रःयमेदमेवतेकार्यमन्यत्कार्यंतकिंचन कार्यांतरंयदिभवेन्नहृद

स्वमभाषणा॥७२॥अशैचरिक्षन्यत्रदमत्रनास्तिप्रयोजनं अशैवान्यतान्यश्वनरकेषुपथा
क्रमं॥७३॥यानदुःखमिहप्राप्यमनुद्भूतिभस्मना तावदुःखंत्रसहस्राकोटिभिश्चनलभ्यते॥७४॥
यावदुःखमिहप्राप्यत्यक्त्वभस्मत्रिपुंड्रकं तावद् यावदुःखमिहप्राप्यशिवानल्कर्मवादिभिः तावद्॥७५॥
यावदुःखमिहप्राप्यशैवदुःखप्रदैर्नरैः तावद्॥७७॥त्रिपुंड्रोद्भूलनादीनिनकरिष्यंतियेद्वि
जाः तेषामघोरनरकेष्वशीघ्रन्यहस्थितिः॥८०॥इदंविचार्यबहवः कर्मसुद्भूलनादिकं उद्भूल
नादिसंसक्तानपश्यंत्येवयातना॥८१॥यस्यभालंमहद्दाग्यादस्मरेखाविराजितंसघोरत
रसंसारंतरिष्यत्येवसंशयः॥८२॥मुक्तिकारणमिसाद्भूः केवलंभस्मधारणा तत्रापिशिवभक्ति
श्चेत्किंवक्तव्यमतःपरं॥८३॥भाग्येनभाषितंभव्याद्भूलंकेवलभस्मना तस्मान्मीयतेभोग्यभा
लेभासितभस्मना किमत्रबहुनोक्तेनसारमेकवचस्मृणु अशैवदुःखदानार्थंशिवेनप्रेरितोस्महं॥८५॥
या मर्त्यातालातलादिभ्योथशैवानानयानयाम्यहं पात॥८७॥श्वेतद्वीपादिपश्चाद्रौवानन

पाम्यहं पात०॥८८॥क्षीरवृक्षप्रमुखाद्भिर्भोज्यशैवान्नयाम्यहं पात०॥८९॥श्वेतद्वीपादपिक्षुक्षीरो
दान्नयाम्यहं पाम्यहो पात०॥८९॥हिमवत्पर्वतादिभ्योप्यशैवान्नयाम्यहं पात०॥९०॥अशैवमु
कुंदोपिपक्षयातीभवेद्यदि मुकुंदमपिघोरेस्मिन्नरके पातयाम्यहं॥९१॥अशैवजनसंघादः प्रल
याग्निरहंयमः मत्कोपानलदग्धांगानशैवान्यश्यसादरा॥९२॥मत्कृतोयातनासंघानविष्यतिस
र्वथा अशैवेषुकृपालेशोप्यस्मनेनभविष्यति॥९३॥अशैवमात्रदाहार्थंस्पृहामातरावमा अ
शैवदाहकः कालोयमइत्याहुरार्तिकाः॥९४॥अशैवाः संतियावंतस्तावंतः शत्रवोमम अतएवहि
घोरेषुपतिष्यंतिनरकेषुते॥९५॥अतएवशाचीनाथयदितेनरकाभयं जदाभजस्त्वसततंदेवदेवं
निशिवं॥९६॥इदमत्वेवसततंविक्षुशकरपूजनं करोतिसावधानेनबिल्वपत्रादिसाधनैः॥९७॥
ब्रह्मापिप्रत्यहंसोवंशिवलिंगस्वरूपिणं पूजयत्यतियत्नेनयातनाभीरुदारतः॥९८॥कश्यपोत्रिर्वसि
ष्ठाद्यऋषयः शैवपुंगवाः पूजयंतिमहादेवंसावधानेनसर्वदा॥९९॥गंधर्वोरगयक्षाद्याः सर्व

पिगिरिजापतिं पूजयतिप्रयत्नेनप्रत्यहंविधिपूर्वकं॥७००॥शिवः इत्युक्तःसशाचीनाथोय
मंसंपूज्यसादरं यमाज्ञयाश्चर्यलोकंसगुरुः सान्दगोययौ॥१॥यमोक्तप्रतिसंधायविस्मितःसशा
चीपतिः तदाप्रभृतियत्नेनशिवपूजापरोभवत्॥२॥बृहस्पतिश्चयत्नेनशिवलिंगस्वरूपिणं मा
मर्चयत्यहरहर्बिल्वपत्रादिसाधनैः॥३॥पुरावैश्रवसीकाचिदार्यावर्त्तेस्थिता निशिकामातुरंपति
प्राहस्वयंमत्पूजनेरता॥४॥विप्रसी बाल्येनाराधितः शंभुर्ज्ञानेनलघ्वाधुना कामातुरेणानाराधि
भगवान्गिरिजापतिः॥५॥अधुनागानिसर्वाणितिपत्यतियद्गृहे अर्घचेन्नार्चितः शंभुरर्चनो
पः कदालया॥६॥गलारूपेबिल्वपत्रैः कोमलैर्बहुभिर्नवैः कृत्वायार्थिवलिंगानिपूजयस्वयथा
विधि॥७॥कुशपुष्पैः काशपुष्पैः पलाशकुसुमैरपि पूजयस्तमहादेवंलोकाधिपसदा॥८॥नीलो
त्पलकृतांमालांकृत्वायत्नपुरः सरं लिंगरूपायसांबायमहेशायसमर्पया॥९॥नवबिल्वकृतां
मालांतथाधत्तुरमालिकां लिंगरूपायसांबायमहेशायसमर्पये॥१०॥पुरायोबेशाखमासो

Indira Gandhi National Centre for the Arts

यमस्मिन्मास्करोदये स्नात्वापूजयतोरीशंबहुभिर्बिल्वपत्रवैः॥११॥अस्मिन्मासिमहेशाय
जलधारांप्रकल्पय शिवालयंजलैश्शुद्धैः परियसादरं॥१२॥चंदनंदेहिदेवायसकर्पूरंसुशी-
तलं ततोनवैर्बिल्वपत्रैपूजयस्वसदाशिवं॥१३॥धूपस्वमहादेवगुग्गुलेनयथाविधिदीपय
स्वमहादेवदीपैः कर्पूरसंभवैः॥१४॥दध्यन्नेनमहेशायनैवेद्यंकल्पयादरात् पुनर्धूपादि
कं कृत्वाचामरंवीजियेश्वर॥१५॥एवमाराधयाराध्यंमहादेवंकृपानिधिं सुप्रसन्नोमहादेवो
भक्तिमुक्तिंप्रयच्छति॥१६॥नयौवनंस्थिरंविद्धिनैश्वर्यमपिचंचलं इदमेवविदित्वैवपूजय
स्वमहेश्वरं॥१८॥अधुनायौवनाधस्तात्वदेवोत्तमेशिवे नोदतिभक्तिरमलाभुक्तिमुक्तिसुक्ति
फलप्रदा॥१९॥अहोमोहस्यमहात्म्यमीदृशादुरतिक्रमं येनमोहेनविश्वेराःपूजनंविस्मृ
तंत्वया॥२०॥विश्वेराः करुणाः सिंधुः सर्वदेवशिखामणिः येनाराध्यतेनित्यंपूज
न्मानिरर्थकं॥२१॥विश्वेराःपूजनंकर्तुनिर्मितंयत्करद्वयं तेनचेन्नार्चितः शंभुस्त

द्वृथादग्धकाष्ठवत्॥२२॥विश्वेशापूजनंदृष्टुंनिर्मितंनयनद्वयं तेनचेन्नोक्षिविश्वेरास्त
द्वृथानयनद्वयं॥२३॥श्रोत्रेशिवकथाश्रोतुंनिर्मितेसाकथामुदा तास्चाचेन्नश्रुताश्रोत्रे मर्त्य
नास्तित्रसंशयः॥२४॥शिवनामजपंकर्तुंसृष्टाजिह्वातयायदि नजप्तंतेमनुःशैवः साजिह्वाचर्म
वद्वृथा॥२५॥येनचित्तेननध्यातोभगवान्पार्वतीपतिः तच्चित्तंपित्तवन्निंद्यंनवाधयतिकिंपद
॥२६॥दंडवत्प्रणामंतेशंभोःकृतंनसार्थकंकुरु अन्यथातन्दुरेघातेसदग्धातन्द्रुवद्वृथा॥२७॥प्र
णामंतिमहादेवंदंडवद्येपदातदा पतंतिपापगिरयोवज्रमेतादिताइव॥२८॥निरीश
वरिवेवशिवेयेवशिवयजयं विहितंपरलोकेमातःकरुष्वशिवार्पणं॥२९॥परलोकस्य
पाथेयंमोक्षोपायमनामयं पुण्यसंघैकनिलयंशिवइक्षरद्वयं॥३०॥श्रीसदाशिवः इति
तद्वचनंश्रुत्वाकथंज्ञातमिदंत्वया तद्वदस्वेतितामाहसातमाहततः शिवा॥३१॥विप्रसती०
एवंजन्मन्यहंविप्रकन्यासंविप्रसमेधसः अस्मद्गृहंप्रातपदेशंकश्चिद्विल्वेतरुस्थितः॥३२॥

Indira Gandhi National Centre for the Arts

विल्वायाश्चजलंदत्तंकदीचिद्यातोमया तेनपश्चाद्वितोवक्षस्ताद्विल्वतरुपश्चवैः॥३३॥मत्पिता
पूजयामासमहादेवमुमापितं शिवंसंछादयामासताद्विल्वतरुपश्चवैः॥३४॥तेनपुत्रप्रभा
वेनजन्मनामेशतत्रयं मयाविज्ञायतेविद्वन्मुक्तमुपायोपितत्वतः॥३५॥श्रीशिवउवाच इति
तद्वचनंश्रुत्वापत्कासमदनमथा शिवार्चपरोजातोमुक्तःश्रुतदनात्परो॥३६॥मासुया
श्रियोभक्त्यामाराधयतिश्रिये सम्पत्तिलभतेनसंसयंसत्यंनसंशयः॥३७॥शिवेमदर्चनश्री
तिर्महद्भाग्यफलंततः॥मदर्चनंप्रयत्नेनकर्तव्यंविधिवत्सदा॥३८॥तारकः सर्वलोकानामहमेव
ततः सदा॥पूजनीयःप्रयत्नेनसर्वोपायैर्यथाविधि॥३९॥सर्वेषामेववेदानांसारभूतामदर्च
नः॥मदर्चनंसदाकार्यमुद्धृत्यभुजमुच्यते॥४०॥जपनीयोहमानित्यंपूजनीयोहमन्वहं सत्य
मेतत्समेतदुद्धृत्यभुजमुच्यते॥४१॥मुक्तिदाताहमेवास्मिसर्वस्यजगतःशिवे ततःसर्वैर्यत्नि
त्यंपूजनीयोहमात्मिके॥४२॥सर्वोत्तमःसर्ववरःसर्वपूज्योहमंबिके अयमर्थस्तुविदि

र्घवेदेरेवोच्यतेध्रुवं॥४३॥सर्वभावेनसततंपूजनीयोहमंबिके मदर्चनान्मुक्तिमुक्तिसंप्राप्ये
सयमुच्यते॥४४॥संसारपाशनाशार्थंमामेवमुनिपुंगवः पूजयंस्यातियत्नेनभस्मोद्धूलितविग्रहः
॥४५॥विचार्यवेदवेदांतानिदंनिष्पादितंबुधैः शिवएवसदाध्येयोमुक्तिकामैरितिध्रुवं॥४६॥मु
क्तिंत्यक्त्वसर्वथानास्तिशंकराराधनंविनासत्यंसत्यंपुनःसत्यमितिवेदोपिवर्त्तते॥४७॥अतोन्यूहंप्र
यत्नेनपूजनियोहमंबिके विल्वपत्रादिभिःसम्यक्चतुर्वर्गफलार्थिभिः॥४८॥मदर्चनप
राधीरामेदेकपरदेवताः निर्दग्धकल्मषादेविप्रविशंतिमपिध्रुवं॥४९॥विश्वाधिकोहमज
रोनिष्कलोनिर्गुणोंबिके मयिप्रविष्टोस्म्योन्यंनप्रविशत्येवसर्वथा येमामनन्यशरणाः॥
सितभस्मभालारुद्राक्षकंकणालसत्कारदंडपूजनाः सपूजयंत्यहरहः श्रुतितत्वमतंतनेव
घोरनरकादहमुद्धरिष्ये॥७५१॥इतिश्रीशिवरहस्येसप्तसंहितायांशिवगौरीसंवादेनामश्चाद्यशो
ध्यायः॥१च॥श्रीसदाशिवउवाचशिवेदक्षिणाकैलासोविलासस्याश्रयोमम अथापत्तके

लास्तत्तथैवस्मृवदः सदा॥१॥सवर्णामुखरीनामनदीतन्नास्तिशोभन अश्वत्तस्नानमात्रेणाह
र्प्यतेसर्वकिल्बिषैः॥२॥तत्तीरेकोटिशः संतिबिल्ववृक्षामनोहराः अखंडबिल्वपत्राणितेषुति
ष्ठंतिकोटिशः॥३॥सुवर्णामुखरीतीरेकोटिशः संतिशांकराः तेसर्वेनियताहारामस्मोद्धू
लितग्रहाः॥४॥त्रिपुंड्रमात्रविलसद्भालाः घंगातिशोभनाः रुद्राक्षमालाभरणाजटामंडले
मंडिताः॥५॥शिवपूजैकनिरतानिरीहानिर्मलाशयाः शिवनामैकनिरतास्तत्तकभोगा
निराकुलाः॥६॥स्वप्नेप्यनशरणामदेवपरदेवताः मन्नाममात्रयापूतामदेवशरणाः
सदा॥७॥यःवलिंगार्चननिसेसर्वदासक्तमानसाः ध्यायंति तेमहादेवमाम्नाघंतम
घयं॥८॥निष्कलंनिर्गुणंशांतंशिवमक्षरमव्ययं सर्वधारंविदित्वामांवसंतितेः॥९॥तत्रत्यक्ततनु
र्नरैःकीटोवामशकोपिच मुक्तोभोगान्यथाकामंमत्स्वरूपंप्रयातिच॥१०॥तत्रास्तिपर्व
तः कश्चित्सदात्मकएवहि सत्लिंगमयोयस्माच्छिवाकारः सर्ववतः॥११॥तत्रवर्तस्य

विविधिवद्देशाखेमाघमासिवा कृत्वाप्रदक्षिणांसम्यक्सप्तजन्महापिविमुच्यते॥१२॥कैला
सनामकंलिंगंतत्रास्तेकंमदात्मकं तत्रतल्लिंगरूपेणनिवासाम्यहमादरात्॥१३॥कर्पूरगौ
रंतल्लिंगंपश्चियाभिमुखंसदा वर्णांतरंप्रतियुगेतस्यलिंगस्यजायते॥१४॥विष्णुब्रह्मादयो
देवासततंशिवपूजकाः तल्लिंगमतियत्नेनपूजयंतिमुमुक्षवः॥१५॥तल्लिंगदर्शनात्सघो
नश्यत्यघकुलंशिवे तल्लिंगंसाधनेनपूजनीयंमुमुक्षुभिः॥१६॥सुवर्णामुखरीतीर्थंत्रा
त्वासम्यग्यथाविधिअशेषयापनिर्मुक्ताभविष्यंतिनसंशयः॥१७॥सुवर्णामुखरीतीर्थंत्रा
त्वासम्यग्यथाविधि अशेषयापनिर्मुक्ताभविष्यंतिनसंशयः॥१७॥स्नात्वातत्रविधाने
नपितॄन्संतर्प्यवारिणाऽन्नादिभिश्चसंतर्प्यसर्वपापैःप्रमुच्यते॥१८॥तत्रश्राद्धकरणा
द्धितरणांश्रेणवंधनोत्तमुच्यतेमनुजः सद्यःपद्मपत्रमिमांमसा॥१९॥तत्रस्नात्वाविधि
धानेनस्वशक्त्याशिवयोगिनेदेयंसुवर्णायानेनमत्प्रीत्यर्थमतंद्रितैः॥२०॥भोजनीयःप्र

Indira Gandhi National Centre for the Arts

यत्तेनशिवयोगीपथास्तुवं सद्गधापरमान्नाचैर्यथेवंघृतमिश्रितैः॥२१॥तत्तुक्षेत्रंशिवक्षे
त्रमतएवहिशांकराः भोजनीयाप्रयत्नेनतीक्ष्णीबाधनादिभिः॥२२॥एकस्मिन्भोजितेशैवे
भोजिताः कोटियोगिजाः पतत्रीवमुखद्वारा भुज्यते गिरिजेमया॥२३॥परंतुश्रद्धयाभक्त्याचि
न्येनविचक्षणैः भोज्यतेयदिशैवेद्रक्तदात्रुज्यतेमया॥२४॥शिवयोगिनिसंतुष्टेसंतुष्टोस्म्य
हमंबिके शिवयोगिरूपेणसंचाराम्यहमेवहि॥२५॥शैवक्षेत्रेषुसर्वेषुपूज्याःहिशिवयोगिनः
अर्हंतुपूजितःसर्वंशिवयोगिनिपूजिते॥२६॥तंत्राद्रीकृत्तिकायोगेपानघदिनेसंपूज्यमा
विल्वपत्रैर्ब्रह्महापिविमुच्यते॥२७॥वैशाखपौर्णमास्यांयःसंपूजयतितंत्रनायदियातार्द्रयुक्ता
यांसमोक्षधिगच्छति॥२८॥योमांबिल्वदलैस्तत्रकोमलैःपूजयिष्यति ससंघएवसंसारान्मुक्तो
भवतिसर्वथा॥२९॥शैवःप्रसहमागत्यतत्ररत्नैमनोहरैः तदेवलिंगममलंसंपूजयतिसादरं॥३०॥अलब्धमैलक्षरत्नैः शैवःप्रसहमादरात् समर्चयतितल्लिंगंनियमेनातियत्नतः॥३१॥

तत्रकश्चिद्भुजोनिसंनियमनेवसादरं तुंडेनजलमानिपुन्दानामभिषिंचति॥३२॥ततः
परंविल्वपत्राणपादायोच्चस्वतुंडतः नामर्चयतियत्नेनपुष्पैनानाविधैरपि॥३३॥अथयदास
नायातिमत्पूजार्थंमदाहियः तत्सर्वंफणिसद्रत्नैः पूजांकृत्वासगच्छति॥३४॥तानिरत्नानिदू
रेपहस्तापाषाणशंकया दूरीकरोतिरत्नानिसकोपः सत्वरंशिवे॥३५॥एवंप्रसहमेवाय
रत्नानिविमलान्यपि दूरीकृत्वैवबिल्वैर्मांपूजयामासभक्तितः॥३६॥तदूरीकृतरत्नानिदृष्ट्वा
शैवः सविस्मितः केनदूरीकृतानीतिदुःखंप्राप्नोत्यहर्निशं॥३७॥अलब्धमानिरत्नानिसमा
नोपमयामुदा समर्प्यंतेमहालिंगंकेनदूरीकृतान्यहो॥३८॥शिवपूजाधनंयत्नात्सातंयदु
पार्ज्यते तत्कृतोदोषलेशोपिकिनतस्याभिजायते॥३९॥इतिकृत्वामहदुःखंरत्नैः संपूज्यमांपुनः
सयातिनागकुहरंनानानागविराजितं॥४०॥एवमेवसमागत्यपूजयित्वापुनः पुनः संयात्यथ
तिसततंपुनरायातियातिच॥४१॥उमाम्यांहसितंनागाम्यामेवमन्वहमादरात् लिंगरूपेण

Indira Gandhi National
Centre for the Arts

पित्रोत्सवं कृत्वानुदास्थिते ॥४२॥ ततः कदाचित्सफणीपूजां कृत्वाप्रयातितः कीयमायातितंदृष्ट्वेनमनचेति
संस्थितः ॥४३॥ दृष्ट्वामहतायत्नेनशिवपूजाविनाराकं किनारायामिदेवोवानरीक्तनसंशयः ॥४४॥ म
यालयंप्रयत्नेनरत्नैरन्वहमादरात् पूजतेशंकरस्तीनतिष्ठत्येवरंकरे ॥४५॥ इतिनिश्चित्यनागेंद्रः क
पिलोनिलीयसः स्थितस्तदाद्विपः सोपिपूजार्थंएनुयागतः ॥४६॥ द्विपः सन्नानिदूरीकृत्यतत्र
पुरे विल्वपत्रैः प्रसन्नेश्वरपूजयामासतत्रादरं ॥४७॥ द्विपस्तस्मिन्दिनेभ्योबिल्वपत्रार्थंमादरात्र
सं पूज्यनत्वायत्नेनत्वयाबाहिरागतः ॥४८॥ बहिरागत्यरम्याणिबिल्वपत्राणिशोभने गहीत्वाप
जयामासभक्तिपुरःसरं ॥४९॥ ततस्तंदंतिनंदृष्ट्वानागःसत्वरमन्मुखः तद्दंतिदंडद्वारेण
शिरोमध्यंजगामसः ॥५०॥ ततस्तद्दंशितोदंतीद्वारस्तंभेशिलामये शिरःसंघर्षयामासक्रोधेनक्रो
धेनक्रोधसंयुतः ॥५१॥ ततस्तत्संघर्षणेनैवस्फुटितंतच्छिरस्तदा निर्जगामततोभोगीमृत्यु
स्तच्छिरस्तदा ॥५२॥ ततोविषाद्वितोदंतीमृतोभूमौपपात्तच्चपतितंदंतिवर्यस्मिन्नागेचपार्थि

वीतले ॥५३॥ प्रादुरासमहंदेवितदातद्दंतिगमध्यतः ततस्तांभ्यांततोयात्वाक्षीरुद्रेणयथाक्रमं
॥५४॥ ततस्ताभ्यांप्रयत्नेनदृष्टोयंवरऊर्जितः उभयोरपिनामत्तोदलिंगंप्रख्यातमेष्यतु ॥५५॥ नामान्यद्द
त्तिरस्त्वेषापार्थिवामावयोस्सदा मुक्तिस्त्वद्दर्शनादेव भविष्यत्यघसर्वथा ॥५६॥ इत्युक्तंहृदयंश्रु
त्वावरोदतस्तदाशिवे जयोर्मुक्तिरभूद्देविमत्साक्षात्कारस्ततः ॥५७॥ पार्वती० महादेवगजास्या
स्पभक्तिरेतादृशीत्वयि कथंजाताभोगिनोपितृदस्वमहेश्वर ॥१८॥ अनंतजन्मभिर्घोरैर्यदि
तत्तंतपस्तदा त्वयिभक्तिर्महादेवंभविष्यत्यथानुनं ॥५९॥ शरीरंयस्यचरमंतस्यैवत्वयिशंकरे
भक्तिर्भवतिसाभक्तिदानन्यगाप्रभा ॥६०॥ येषांसंसारविच्छित्तिर्यद्दृहायगमेसति तएवसर्व
भावेनशरणंयांतिशंकरं ॥६१॥ सोकंठंनीलकंठेतिश्रीकंठेतिवदंतिये तेषांशरीरंचरमंसत्य
स्तिहिश्रुतिः ॥६२॥ विश्वाधिकंमहादेवंविश्वेशेतिवदंतिये तेषांशरीरंचरमंसत्यमित्यतिहि
श्रुतिः ॥६३॥ देवतासार्वभौमेतिशंकरेतिवदंतिये तेषां० ॥६४॥ सर्वदेवाधिदेवेति

Indira Gandhi National
Centre for the Arts

महेशेतिवदंतिये तेषां॥६५॥सर्वोत्तमांनंतरात्तेश्रीरार्वेतिवदंतिये तेषां॥६६॥विदारितन्दसिंहे
तिश्रीरुद्रेतिवदंतिये तेषां॥६७॥गरुडध्वजयेचोतिसर्वश्रोतिवदंतिये तेषां॥६८॥विष्णुनेत्रार्चि
तांगुष्ठमहादेवेतिवादिनः जीवन्मुक्ताइतिह्येतासत्यमित्यस्तिहिश्रुतिः॥६९॥अनन्यशरणाानिस
र्वेर्चयंतिमहेश्वरं तानहंपूजयामीतिवेदोपिवदतिस्वयं॥७०॥अनन्याः शंकरंनित्यमेर्चयंतिस
सुरेश्वरं तेषांगर्भवासादिदुःखानीसन्तिहिश्रुतिः॥७१॥एवंसतिहियोनिंसंविल्वपत्रजलादिभिः क
रोतिपूजनित्यंकथंत्वयिमहेश्वर॥७२॥कोयंपूर्वभवेत्वामिन्कमनेनकृतंतपः पूज्यतेस्यविगर्ह
सघोमोक्षमावाप्त॥७३॥नागोप्पंसदाभक्त्यारानेरत्युत्तमेर्मुदा पूजयासाईभावेनलिंगरूपेवपि
प्रभौ॥७४॥एकैकस्यचरत्नस्यमोस्यमेवनविद्यते तादृशानि समानीयकथमर्चनं॥७५॥एतत्सर्व
विरीक्षणाश्रोतव्यमितिवक्त्रेतं वदसर्वज्ञसर्वेशकरुणाकरसाकर॥७६॥ईत्युक्तंतद्वचःश्रुत्वासर्व
देवशिरवामणिःउवाचनंचीस्श्रोचनंदकरंपरं॥७७॥सदाशिवः हसन्तीपूर्वदेविब्रह्मन्॥

वेदपादगः मलयाचलदेशस्योदरिद्रोव्याधिपीडितः अन्यार्थंशिवभक्तायामनेनोयोषणा
कृतं कृतंजागरणंरात्रौतेनयामचतुष्टयं॥७९॥रात्रावन्यकृतांपूजांशिवलिंगेमदाप्तके ददर्शायम्
तिप्रीत्यादीपमालांचतंकृतां॥८०॥ततः कदाचित्सपेणादष्टोभक्तस्ततोमृतः ततोयमभवद्
तीर्थमविक्रयदोषतः॥८१॥पूजाविलोकितातेनरात्रौभक्त्यातोमम तेनज्यातिस्मरोजातो
द्वापजन्मन्यपिप्रिये॥८२॥आबाल्यमतियातेनममपूजाकरोत्ययं कदाचिदपिनत्यक्त
मनेनममपूजनं॥८३॥बिल्वपत्रैर्जलैः पुष्पैर्नामभ्यर्च्यान्वहंततः जलंपिबतितन्मत्वनि
वेद्यैवप्रयत्नतः॥८४॥एतादृशाद्विपंदृष्ट्वाव्रत्नविक्रयादयः सुराः पूजांप्रयत्नेन मंतिचमुदुः
॥८५॥यादशस्तादृशोडालएववा मामनीयः पूजनीयोमदर्चनपरायणः॥८७॥भार्यापि
यदिपत्तेनमदर्चनपरासदा तस्यानिष्टरमुक्तातेनरकंयातिसर्वथा॥८८॥पुत्रोपिय
दिपत्तेनमदर्चनपरक्तदा तस्मिन्निष्टरमुक्तातेनरकंयातिसर्वथा॥८९॥अथमादे

Indira Gandhi National Centre for the Arts

नसतांनिधायस्पशिवार्चने सपूजनीयोयत्नेनतास्मिन्नन्नः सदाभवेत्॥९०॥अतएवागच्छंसर्व
प्रणामंतिसुराः सदा बिल्वार्जनेद्रियंनित्यंमदर्चनपरायणाः॥९१॥समर्थोपिपुराविप्रोवेशा
स्त्रविशारदः मत्पूजानिरतोनित्यंहमवत्सर्वतोस्थितः॥९२॥सदर्शास्त्रगंधर्वशिवपूजापरंपरायणा
सरत्नेरुत्तमैर्नसंमार्चयात्सादरी॥९३॥द्विजस्तुसुस्त्रगंधर्वप्राणिपत्याभिपूज्यचरत्नानिकुत्रसं
तीतिपप्रछुविनयान्यतः॥९४॥ततस्तद्वचनंश्रुत्वागंधर्वस्तमभाषत विनयेनप्रणम्येनमदर्च
नपरायणं॥९५॥गंधर्वउवाच सुमुद्रैः सहसख्यमेवकुधावतेद्विज तैरेवेतानिरत्नानिदी
पंतेमत्यमन्वहं॥९६॥रत्नैः प्रत्यहमभ्यर्चशंकरं ततः परंजलादीनिगृह्णतेनियमान्मया॥९७॥रत्ने
रभ्यर्चितेलिंगेसर्वपापैः प्रमुच्यते रत्नपूजनमात्रेणमुक्तोश्वेवहवंभुवा॥९८॥भवत्येवहिसंतुष्टः
शंकरोरत्नपूजया संतुष्टेशंकरेमुक्तिर्हस्तलभ्यैवसर्वतः॥९९॥नागलोकेपिरत्नानितिष्ठंत्य
मानिच गच्छपूजयत्नेनपातालेनागजन्मना॥१००॥इत्युक्तः सतदाविप्रस्त्यक्त्वासघृणांतं

स्वकानांगोवभूवनागः सन्पूर्वजातिस्मरोभवेत्॥१॥ततोब्रह्मातपत्नेनसनागोन्वहमा
दरात् रत्नैरत्युत्तमैः सम्यक्पूजयासभक्तितः॥२॥एतादृशेदेविशिवपूजायणो तन्मानसे
वहितद्विजप्रख्यातेमुक्तिदायका॥३॥पश्चिमाभिमुखंलिंगंकालहस्तीश्वरंमदा स्मृत्वाभिस
र्वपापेभ्योमुक्तोभवतिसर्वथा॥४॥पश्चिमाभिमुखंलिंगंरौद्राकारमनुत्तमं बिल्वपत्रैः समभ्य
र्च्यपूर्णातिममसन्निधिं॥५॥नदंपेनतद्विजंगंतपूजन्मानिरर्थकं॥७॥श्रीमद्दक्षिणकैलासं
सर्वेब्रह्मादयः सुराः तिष्ठंतिवेदवेदेशामामभ्यर्चन्वहमुदा॥८॥तत्पश्चात्कालहस्तीशंपोनु
सेवितुमिच्छति समदीपोगणोद्भवोममप्रियकरश्चसः॥९॥प्राणाविश्लेषसमयेकालहस्तीश्वेति
मां यःस्मरिष्यतिभागेनात्समेमोक्षंददाम्यहं॥१०॥यंयंकामयतेकामंप्राणाविश्लेषलक्षणे
तास्मिन्क्षेत्रवरेदेवितंतंकामंसविंदति॥११॥तन्मोक्षदंकामदंचात्रक्षेत्रमनुत्तमं अतएव
हितत्क्षेत्रंसेवनीयंप्रयत्नतः॥१२॥पुराकश्चिद्विजैः स्नात्वा मुखरीजले पूजयामा

Indira Gandhi National
Centre for the Arts

सपत्नेनकालहस्तीश्वरंमुदा॥१३॥ततः प्रदक्षिणादीनिकृत्वास्वयाचिंतया ततःस्वप्नेबुभ्वैवं
तस्यचिंताविनाशकः॥१४॥यांस्वप्नश्रवणादेवरोमांचस्तोभविष्यति सुभगोतादशाक्षुप्रणुस्व
प्नंप्रातःततः॥१५॥शिवउवाच चिंतामाकुरुविप्रेदक्षेत्रेस्मिन्कामदेमम चिंतितार्थप्रदोत्रा
हंनिवसामिनसंशयः॥१६॥मादेहपातयात्ननकुरुमत्फजनंसदा तेनाहंसर्वथाकामान्पू
रयिष्येनसंशयः॥१७॥मायाश्रीत्यमहादेवंसर्वाभीस्मितदायकं नकोपिचिंतावशगोनजा
तोनभविष्यति॥१८॥तावदुःखानिचिंतापिपावन्मानोपसेवते मयिसंसेविनेनित्यंभवया
नंदएवहि॥१९॥अहंत्वनन्यसदृशः सर्वदेवशिरोमणिः ऊर्ध्वंद्रंद्रादयोदेवाःसर्वेपिमम
सेवकाः॥२०॥मत्तएवाभवद्विघ्नुमत्तएवाभवद्विधिःमत्तएवात्तदन्यच्चजगदासीच्चराचरं॥२१॥
चिंतानकार्यांविप्रेंद्रत्वाभीष्टंददाम्यहं मद्भक्तायस्मुशीलायनादेयममकर्हते॥२२॥द्विजो
पेंद्रत्वमिंद्रत्वंब्रह्मत्वंवायदिच्छया प्रार्थ्यतेतन्मयातुभ्यंदेयमेवनसंशयः॥२३॥किं

चेर्दकामिकंक्षेत्रंममप्रियकरंद्विज अत्राभीष्टंददाम्येवमद्भक्तायनसंशयः॥२४॥
एतादृशंस्वप्नवार्तांमातरुस्यायवतः कथयामासशैवेभ्योविनीतोभक्तिपूर्वकं॥२५॥
ततस्तांस्वप्नवार्तांतेश्रुत्वाशैवोत्तमात्तदा संतोषंपरमंप्रापुरपूर्वस्वप्नवार्तायाः॥२६॥
तदाप्रभृतिविप्रोसौप्रयत्नेनमदर्चनं कृत्वाकदाचिद्विजहोप्राणान्मामनुस्मरन्॥२७॥
तदावीक्षेश्वरोवायसोहंप्रत्यक्षतांगतः ततःप्रणम्यमांविप्रश्चकारस्तोत्रमादरात्॥२८॥
ततःसविप्रोविनयान्नत्वासंपूज्यमांशिवे इदमेवचःप्राहकृतांजलिपुटस्तदा॥२९॥
द्विजउवाच अनाथंपदंदेहिमत्परंकरसर्वगः यस्याप्यननिवर्त्तंतेकल्पांतेप्यक्षयंपदं॥३०॥
नयानयास्यतेशंभोविस्मरंतेनकिंमम विस्मारपिप्रतोघोरोगभवोसौखिलैः श्रुतैः॥३१॥
संसारोपिमहान्देवविस्मृतोप्यनुभूयते ऊर्ध्वंतिवडुधाजातंतमास्यादियोद्य॥३२॥त्व
यादृशोसिवैकुंठशिवभक्तायविस्मवे त्वयिभक्तिःकृतांतेनतदर्थंप्रार्थयेश्वर॥३३॥

Indira Gandhi National
Centre for the Arts

अलब्धान्यपदस्यासीत्तद्विष्णोः परमं पदं॥३५॥नित्यंनित्यंनिष्कंटकंराज्यंभाग्यवानभिवांछति
निष्कंटकीदरिद्रस्तुकुत्सितान्नमिवांछति॥३६॥अलब्धान्यपदोविष्णुस्तदावैकुंठवांछया
त्वपिभक्तिंचकारातोवैकुंठंप्रापकोशवः॥३७॥नयावैकुंठलोकस्तंमनसापिनगच्छति
तस्मात्पदंमहादेवदेहिमत्समनामयं॥३८॥मयाब्रह्मत्वमिंद्रत्वंकृतंयवसवस्त्रभो नत
तत्रवांछास्वब्रह्मपिजायतेमन्मनस्त्वपि॥३९॥इत्युक्तोतद्वचःश्रुत्वाशंकरोमहामनः तस्मै
मुक्तिंमर्यादयाप्रीतिपूर्वकमादरात्॥४०॥घृष्णुर्दत्वाहरिस्तत्रसर्वदाअ
नन्यमनसःसांतमर्चनपरायणाः॥४१॥तेवैमेचब्रह्मादीन्कदाचिदपिशाभने शे
वानगणायंवेमर्चनपरायणाः॥४२॥अस्माभिरत्रमरणान्मुक्तिःप्राप्येवसर्वथा विष्णु
ब्रह्मादिदेवानाकदामुक्तिर्भविष्यति॥४३॥संसारपाशसंबंधाविष्णुब्रह्मादयःसुराः ते
घांडब्रह्मकल्पांतेमुक्तिरीशप्रसादतः॥४४॥अस्माभिरल्पकालेनशंकरार्चनपूर्व

कं श्रीमद्दक्षिणाकैलासेतन्मुख्याज्येहमुक्तये॥४५॥अस्माभिर्भारतेवर्षेजन्मप्राप्यतं
पुस्यातवाप्युक्तमंक्षेत्रंशैवप्राप्तमिदंमहत्॥४६॥अस्माभिःसावधानेनभस्मोद्धूलितविग्र
हैःनित्यंश्रीकालहस्तीशःपूजनीयोयथाविधि॥४७॥पश्चिमाभिमुखंलिंगमिदमत्यंत
दुर्लभं एतत्स्पर्शनंध्यानंविनावक्तव्यस्तुया॥४८॥यश्चिमाभिमुखंलिंगंयद्यन्यत्रापि
तिष्ठति तत्रापिमरणेमुक्तिर्भविष्यत्येवसर्वथा॥४९॥कालहस्तीश्वरंलिंगंयाश्चिमाभिमु
खंशिवा स्वयंयत्नेनसततमभ्यर्चयतिसादरं॥५०॥सचैवामुक्तिदानार्थंमार्दभंनोत्रशं
करः महायद्यपिनत्याज्यमिदंक्षेत्रंशिवात्मकं॥५१॥कालहस्तीश्वरंलिंगंविल्वपत्रैर्जल
स्नातैः यःपूजयिष्यतिप्रीत्यानंतस्यनकाम्दयंशंकरापांचदुग्धन्नैराकंराघृतसयुतं दे
यमत्यंतयत्नेनशिवप्रीत्यर्थमादरात्॥५२॥यत्रकुत्रापियत्नेनभोजितेशिवयोगिनि तं
त्रापिशंकरप्रीतोभवत्यत्रकिंपुनः॥५३॥यद्यत्रशंकरोभक्त्यापूजतेशंकरार्चकः

तदाऽक्षोभवत्सेवसांवासर्वोत्तमः शिवः॥५५॥अत्राल्पमपिचेज्जप्तंतदानंत्यायकल्पते अत्राल्प
मपिचेद्दत्तंतदानंत्यायकल्पते॥५६॥मरिष्यायप्रभावेनप्राप्तेक्षेत्रमीदृशं अस्मान्निरातिय
त्तेनस्थातव्यंशिवंपूजकैः॥५७॥इत्येवन्यांन्यंचदंतस्तेमुनयोब्रह्मवादिनः श्रीमद्दक्षिणा
कैलासेनिवसंतिमनोरमे॥५८॥पुरानिकल्पवोनामसुनिभिर्गपूजकः श्रीमद्दक्षिणा
कैलासेचकारवसतिंशिवे॥५९॥तेनतप्तंतपोघोरंतत्रैवाग्निप्रयानतः तेनैवतपसादेवीः
क्षुद्धाःसर्वेपिशाकरि॥६०॥भस्मनोद्धूल्यसर्वांगंसमर्चंतात्यका मामेवसततंध्यात्वापू
जयित्वास्यतःशिवे॥६१॥तंददर्शमहोशेवंविनीतंइतिशाकरः दृष्ट्वातंपूजमासंबिल्व
पत्रेणाभस्मना॥६२॥ततस्तमब्रवीद्देवोनिष्कल्मषमनाकुरु मुक्तिक्षेत्रोत्तमंक्षेत्रंक्षेत्र श्रीराम
किमस्तीतियथार्थतः॥६३॥ततोनिष्कल्मषोविप्रोविनीतमभाषत मुक्तिक्षेत्रोत्तमंमुक्षे २८६
त्रंकाश्येकाश्रुतिसंमतं॥६४॥मुक्तिक्षेत्रमिदंविप्रमुक्तिक्षेत्रोत्तमंतुनमुक्तिक्षेत्रो

त्तमाकाशिनान्येतिश्रुतिरास्तिहि॥६५॥महेशराजधानीयासासर्वश्रुतिसंश्रुता सातु
काश्येवनान्येतिवेदाःसंतिसहस्रशः॥६६॥व्याचष्टेतारकंब्रह्मयत्रसांवः सदाशिवः त
देवमुक्तिक्षेत्रंसुश्रेष्ठमितिकथ्यते बुधैः॥६७॥इदंमुक्तिप्रदंक्षेत्रंकाशीसंज्ञाप्रसि
द्धकं ततस्तदेवहिक्षेत्रंमुक्तिक्षेत्रोत्तमोत्तमं॥६८॥यत्रदेवीस्तिविश्वेशोविनायकः ततः क्षे
त्रोत्तमंनान्यक्षेत्रमित्यस्तिहिश्रुतिः॥६९॥काश्यांविश्वेश्वरूपेणमुक्तिः पूजीकृताद्विजे
ततःसदृशंक्षेत्रंनास्तिनास्तीपिश्रुतिः॥७०॥यत्रास्थानपुल्कसोपिधिक्कारोतिरा
चीपतिं ततःकाश्यामिधंक्षेत्रंततःविश्वेश्वराश्रितं॥७१॥यत्रवैश्वेश्वरोलिंगंद
ग्धापिमुनिपुंगवः नगर्भभाकपुनः सएवसत्यमितिश्रुतिः॥७२॥तत्रास्तिमणिक
र्णिकंकुंडंकेशवनिर्मितं ततोपीत्वापयोभूयस्तन्मयोनभविष्यति॥७३॥मणिक
र्णीयःस्नाविधःसस्नाविष्यशिवोदरे शिवोदरेप्रविष्टोयः सपुनर्जन्मभाकनै

Indira Gandhi National
Centre for the Arts

॥७४॥ मणिकर्यावसे घस्तनियमेनसमन्वितः सवसत्येवकैलासेनानागणानिवेवितो॥७५॥
मणिकर्णेपविष्टेनसुखंयदनुभूयते सुखंतदहरेविप्रनक्रतोरपिनभूयते॥७६॥म
णिकर्यांनरःस्नात्वादृष्ट्वाविश्वेश्वरंप्रभुं स्ववंशकोटिसंयुक्तः प्रयातिशिवमव्ययं॥७७॥
परंतुकाशीक्षेत्रस्यप्राप्तिरत्यंतदुर्लभा सामहेशप्रसादेनभवतीपुण्यकर्मणा॥७८॥त
त्तत्राप्तिकोमनेनकार्यप्रत्नतोमुदा सांउघेतपसात्रैवकाशीप्राप्तिर्भविष्यति॥७९॥इति
तद्वचनंश्रुत्वातपश्चक्रेततोद्विजः तत्रदक्षिणकैलासेसर्वकामप्रदेप्रभुं॥८०पुरातत्र
ममक्षेत्रेकश्चिदिक्ष्वाकुनाश्रयः पूजयामासयत्नेनमल्लिकादिभिर्मुदा॥८१॥प्रत्यहं
मामनभ्यर्चनंकृत्वाजलादिकंकरोति सततंमत्तोमसक्तोदक्षधारणा॥८२॥अरण्ये
प्रत्यहंतेनस्थीयतेचनचासिना तत्रास्थित्वापिमामेवस्मरत्यस्मत्यभिनंदति॥८३॥सम

त्यमांसमलमारुवाघोत्वाघभक्षितः उपहारंप्रयातेनकल्पयत्यन्यहंमुदा॥८४॥क

सुमैर्बिल्वपत्रैश्चसुखमध्यास्थितेर्जलैः मामर्चयतियत्नेनभिक्षोर्नियमपूर्वकं॥८५॥तं
दृष्ट्वामुनयःसर्वेभिक्षोंतादृशमन्वहं दुःखितावतिष्ठंतिसुखमध्यजलार्बकं॥८६॥उच्छि
ष्टोदकमानीयकिंनित्यमभिषिंचति मांसोपहारंवापिनिवेदयतिकिंजडः॥८७॥प्रत्यहंनि
यमेनैवबिल्वपत्रैर्मनोहरैः पूजयत्यवनीशानंशिवलिंगस्वरूपिणं॥८८॥इदृशोसुखमध्य
स्थःशिवसन्निधितंचतिदुर्बुद्धिरिदृशीजाताकथमेतस्यसर्वदा॥८९॥एवंनकार्यभिक्षोर्ति
घंस्माभिरिहोच्यते रारंपापात्मरक्षरःसर्वानेवहनिष्यति॥९०॥एवंस्थातामुनिवराः प्र
त्यहंदुःखिताःशिवे तत्रास्थितेघतिष्ठंतिनित्यंकृत्वासंस्थितेः॥९१॥तेतपोप्यप्रभोस्येनं
नरापतिकदाचन किंन्वास्मिन्शिवभक्तेत्वंदृष्ट्वात्रस्थोस्थितोशिवे॥९२॥सदाचारो
राजोसौनियमेनशिवार्चकः पूजनीयोतियत्नेनतस्मिन्निष्ठरवदेद्रुः॥९३॥कदाचित्सर्व
रत्नभिक्षोर्वनमध्यगतेः शिवे भिक्षोघमांसुसंतप्तस्तोषितश्चबभ्रवसः॥९४॥तस्मै

Indira Gandhi National
Centre for the Arts

वनिकटे कुंडं शीतलोदकसंभृतं स्थितंतथापिभिक्षेननपितंशीतलंजलं॥५॥मयास्त्रीका
लहस्तीशोविल्वपत्रादिसाधनैः नाराधितः यत्नेननतश्चपुतः पुनः॥६॥विभूतिर्नधृ
ताप्युद्धासर्वपापापनोदिनी रोवः पंचाक्षरः स्नानजप्तः शिवसान्निधे॥७॥एवंसतिर
षार्तैनजलंयेयंकथंमया तत्रयादिगछंतिगछंत्यधास्वोमम॥८॥तत्रादितेनचेय
ंतातद्रक्षातदामम सर्वथानरकावासोनभविष्यतिशाश्वतः विभूतिधारणात्पत्था
पाचेसायतंजलं तदाऽनरकावासोभविष्येवसर्वथा॥९००॥विभूतिधारणात्पत्का
पीतकोश्चिपुराजलंतेदुःखमतुलंकचित्सोयतेचक्रकारवे॥१॥त्पत्काशिवार्चनंकोश्चिपु
रापीतंजलंततः तेदानीमपिध्यातेमज्जयतेदुःखमायसे॥२॥पंचाक्षरजपंत्पत्काकोश्चि
यातंजलंपुरा तेनपापमत्रसमलंपोवातिघातिदुःखिताः॥३॥ततःशिवार्चनंत्पत्काभस्मनो
धारणंतथा पंचाक्षरजपंत्पत्कानयेयंकथंमया॥४॥किमतेमेमकर्त्तव्यंप्राणोदेहेनवा

मम मयाशिवार्चनादीनित्पत्कायेयंजलंकथं॥५॥एवमसंतयत्नेनशरीरंयदिरक्ष्यते न
दाकिनिदमंकल्पशरीरमेवासिष्यति॥६॥यशोमांसत्वगाढ्यपरीषनिलयंसदा शरीर
मेतदुर्गंधिकिमनेनसुखंमम॥७॥आंत्रास्थिबद्धसमलमयायत्नसंकुलं क्षपिक्षु
रोगसंबंधशरीरमेनरोचते॥८॥अनंतानिशरीराणित्पत्कान्येवपुरामया इदमप्यधुना
त्याज्यंत्वात्तेनमयाध्रुवं॥९॥वस्त्राणिकतिनद्यानिकटिबद्धानिसादरं तन्नोशेनयथा
दुःखंतथेहापिनसंशयः॥१०॥मयाएवंस्थितंननंशंकरारधनेविना अतःप्राप्तानिव
क्षुधाशरीराणिमयापुरा॥११॥शिवपूजनमेवोक्तं संसारोच्छेदकारणं तथासत्यंघम
नुसाशंकरपूजयास्यहं॥१२॥सर्वमापिसर्वभूतांतरात्मासाक्षीचेतानिर्गुणश्चेश्वरश्च सोमो
निसोनिर्विकारश्चिदात्मानीलग्रीवःपातुमामादिदुःखात्॥१३॥मायातीतोमहितारोधलो
कः सामाकारः सामवेदस्वरूपः सर्वाशास्यः सर्वरूपो महेशोनीलग्रीवः॥१४॥व्यक्ताव्यक्तानां

Indira Gandhi National Centre for the Arts

दिकर्माभिगम्योव्यक्ताव्यक्तानादिधर्माभिगम्यः व्यक्ताव्यक्तानादिवेदाधिगम्यानीलग्रीवः॥
॥१५॥यंवेदांतानैवजानंतिशंभुंयस्मान्नियंवेदइदाचोनिदृताः यंब्रह्मानैवजानंतिसोयंनील
ग्रीव०॥१६॥यत्समांगादुभ्दवःसप्तिकर्तुर्यहोमागाज्जन्मसंप्रापविस्मृः यसर्वेशःसोम
पंतस्थोनीलग्रीवः॥१७॥यस्मादाग्राज्जज्ञिरेदेववर्गायन्मिश्चासोवेदजालंसमस्ता
योयज्ञेशःसोयमंवासमेतोनीलग्रीवः॥१८॥यंसर्वेशांतत्वतोवेदविद्याविद्यांशपज्ज
यंयादरेणासोयंशर्वः सर्ववेदांतवेद्योनीलग्रीवः०॥१९॥यस्यापांगस्यंदमात्रेणा
नित्यब्रह्मोपेंद्रादयःकंपमानाःदूरेतिष्ठंत्यहंसोयमीशोनीलग्रीवः॥२०॥य
स्यापांगस्यंदमात्रेणानित्यब्रह्मोपेंद्रादयःकंपमानाःदूरेतिष्ठंत्यहंसोयमीशो
दोग्रीवस्मरंतंतमस्मात्सीयंनेत्रंसम्यगुन्मीलयंतंमांवीर्यंपज्जयामासशंभो

नीलग्रीवः०॥२१॥यस्यस्मर्तृसर्वयोपेचनोशोपत्पज्जातोघोरसंसारनाशः यस्य
स्तुत्यास्तुतिरापेक्षसोयंनीलग्रीवः॥२२॥सदाशिवउवाच एवंस्तुत्वासमिन्मोमानंदा
श्रुलसन्मुखःदध्योदेवाधिदेवंमामनंतापूतविग्रहं॥२३॥तदानीमभवद्दधिमंदारकु
सुमान्वितं शरीरंसिक्तमभवत्सुभवत्यातदाशिवे॥२४॥यदाद्धिरभूद्म्यासपिधा
यमुखंतदा स्थितोमत्तेजलस्यास्यप्रवेशोमास्त्विति प्रिये॥२५॥ततोस्यतृट्ततदाशांता
जलयानंवनाब्धिये जलंनपीतंभितेनपाप्यमानमपिध्रुवं॥२६॥ततःसविस्त्वेपत्राणि
पुष्पाणिसुत्तमानिच मांसान्यपिविचित्राणिसमादायेवनिर्गतः॥२७॥ततःशनैर्भिक्षः
कालस्त्रीश्वरालयं संप्रायपज्जाद्मांसंगृहीत्वामुदिताननः॥२८॥ततस्मात्वाप्रयत्ने
नैसुरेणामुखरीजले भस्मनोद्धूलनंकृत्वापात्रेपुंडूंचचकारसः॥२९॥ततोगृहीत्वापा
प्यारिणिवित्रीतिचादरात मांसंचजगृहेभक्तोजलंचसुखतस्तदा॥३०॥ततोमु

रवजलैः सम्यगाभिषिच्यसमाहितः विल्वपत्रैः संपूज्यश्रपूजां चक्रे प्रयत्नतः॥३१॥ततोमा
सानिसर्वाणिसुस्वादूनिप्रयत्नतः मत्यर्पयिवेदयामासपंचाक्षरपुरस्सरं॥३२॥प्रदक्षिणा
नमस्कारान्ततंचक्रेपंचवारस्तः ततः पंचाक्षरंमंत्रंजजापप्रीतमानसः॥३३॥एतस्मिन्नं
तरेदिव्यऋषयोब्रह्मवादिनः सायंप्रदोषपूजार्थंकोटिशः समुपागताः॥३४॥तदामपाभिषे
भक्तिप्रख्यापनमनीषया दृढदेवालयस्यैवभक्तरक्षार्थमुद्यताः॥३५॥भक्तरक्षमाणंतंतं
दृष्ट्वादेवालयमंत्रं ऋषयोविस्मितास्तेशिवालयात्॥३६॥भक्तरक्षमाण
ंतंदृष्ट्वाभिस्तोदेवालयंतदाविस्मितश्चिंतयामासकिंकर्तव्यमितिद्विजे॥३७॥भक्तरक्षमाणस्त
वाराःशिवलिंगेपतिष्यंति तत्पातेनाखिलाघातः शिवलिंगे भविष्यति॥३८॥जीवतास्मय
माघातोमयातोमयाद्रष्टुंनशक्यते भक्तरक्षमाणस्तुपाषाणान धर्त्तुमायतोदृढः॥३९॥शांति
श्रममनास्त्वेवचहस्तावोंराधारतो पतिष्यंत्येवपाषाणाः शिवलिंगोपरिध्रुवं॥४०॥तन्दि

तांनवत्वत्राशिवलिंगोपरिस्थिते भक्तरक्षमाणस्तुपाषाणोमत्पश्चेत्पतिष्यति॥४१॥यदिपाषाणा
भारेणमच्छरीरंपतिष्यति तदातुशिवलिंगाग्रेशरीरंमेपतिष्यति॥४२॥ततःपरंतुपाषाणा
ते [illegible] प्रयत्नेत्याघातोनभविष्यति॥४३॥
येनकेनापिरूपेणशिवलिंगस्यसर्वथा आघातोनयथात्रस्यात्तथाकार्यंप्रयत्नतः॥४४॥बहिःप
लाप्यगमनेरक्षितेपंतनुभवेत् किमत्रिफलंमेतत्स्वशरीरस्यतुरक्षणे॥४५॥देहरक्षणमा
त्रेतुपुरुषार्थोनसर्वथा एतत्संरक्षणा कार्त्तकोन्वयत्नकरिष्यति॥४६॥सुखलेशोपिनास्य
घबहिश्चेद्भवतेतदा शिवलिंगाघातहेतुदर्शनेक्षणेभवेत्॥४७॥किंचात्रयदिभागेनश
रीरंचेत्पतिष्यति तदामुक्तिरनायासाद्भविष्यतिमम ध्रुवं॥४८॥यदिस्याच्छिवलिंगस्यसंनि
धौमरणंतदा मुक्तिकांताकराक्रांतासएवभविष्यति॥४९॥मरणंदृश्यंपुंसाशिवलिंगस्य
सन्निधौ तत्रचेन्मरणंपुंसांसंसारोनपुनर्ध्रुवं॥५०॥शीर्यमाणस्वभावेस्यशरीरस्यास्यरक्ष

णां आस्तिन्कालेकथंकार्यंपरलोकार्थिनामया॥५१॥यदामृत्युः समायातितदारक्षरान
तोमर्त्तिकंप्रापसएववरवर्णिनि॥२८॥अरुणाचलनाथस्यमहिमाहिमहान्शिवे वक्तुं
नरःक्षंतेदेविमहिमातस्यसर्वथा॥२९॥धन्याःपूज्यतेमानिसंमरुणाचलवासिनः कीटाद

योपितत्रस्थाःशिवरूपानसंशयः॥३०॥तत्रपूर्वमभूद्राजाकश्चिन्दीनेश्वराभिधः तस्य
प्रभावंवक्ष्यामिश्रृणुसादरमंबिके॥३१॥सतुपूर्वंभवेविप्रोदरिद्रोव्याधिपीडितः तेनदुष्टा
निपापानिकृतानिचमुहुर्मुहुः॥३२॥दुष्टप्रतिग्रहासक्तः सर्वदापापचिंतकः दुष्टविप्रापहा
रीसर्वदासक्तमानसः॥३३॥इदृशःसतुपापिष्ठः कदाचिद्द्विजनंययौ शाकादिकंसमानेतु
मुत्थायशोभने॥३४॥तत्रपश्यद्विल्ववृक्षंनवपल्लवसंयुतं लिंगंचापश्यदमलंतत्रना
मदमुत्तमं॥३५॥ततःसचिंतयामासदृष्ट्वाबिल्वतरुंद्विजः लिंगंचनामदृंदृष्ट्वाकिंकर्त्तव्यमिति
प्रिये॥३६॥एतस्मिन्नंतरेकालेतस्यपत्नीसमागता तांदृष्ट्वासदंतीभार्यामुवाचेदंद्विजस्तदा॥
॥३७॥द्विजः अपिभार्येमयापूर्वंबुभुक्षापापकंकृतं तत्पापनाशः केनापिनविनाशंकरार्च
नं॥३८॥एतादृशानिदानानिगृहीतानिमयाप्रिये यदानगृह्णातिनैवनम्यःपुरुषोभवेत्
॥३९॥तुलाद्रव्यंमयापूर्वंबुभुक्षाभक्षितंमुदा तत्फलेनरकोत्पासःसत्यंसत्यंनसंशयः॥४०॥

Indira Gandhi National Centre for the Arts

बणिगासीत्सुराकश्चित्तेनस्वर्णतुलाकृतातद्द्रव्येणाभवत्स्वर्जीवनंमासपंचकं॥४१॥मृद्वे
णाकेनचित्स्वर्णतुलाकृताप्रिये तंद्रव्येणाभवत्स्वर्जीवनंमासपंचकः॥४२॥कियत्कालंन
यापएवंवणिग्दत्तधनैःप्रिये कृतमसंतपत्नेनस्वकुटुंबस्यपोषणं॥४३॥वणिग्दत्तेनवित्तेनतन्नेयः
पोषपिष्यंति सभ्रूकानरकंघोरंतिष्ठसेवनसंशयः॥४४॥गोर्गृहीत्वाग्रजदत्ताशिवक्षेत्रेमयापुरा
गृहीत्वागोः शिवक्षेत्रेवाणिग्दत्तापिसादरं॥४५॥शिवक्षेत्रेगृहीत्वागांयावद्रोमसंख्यापापतंति
घोरनरकेदारुणेदुःखदायके॥४६॥रातादशानांपापानांनिष्कृतिःशिवपूजया भविष्यतिनसंदेहः
श्रुतिरेवात्रकारणं॥४७॥अतःपरंमयात्रैवस्थातव्यमतियत्नतः अत्रैवशंकरंनित्यमर्चयिष्यामि
सादरं॥४८॥सत्पत्रबिल्वतरवोनवपल्लवसंवृताः लिंगार्चनामदंतिष्कर्मनादिघदायकं॥४९॥संसा
रदुःखबद्धमुक्तमेवमयापुरा सुखलेशापिनास्मेवसंसारे दुःखसागरे॥५०॥स्ववन्मत्रेपुरीवा
ध्रेशरीरेदुःखसाधने कः प्रतिकुरुतेमंडोमलकूपइवान्वहं॥५१॥एतावत्कालपर्यंतं भ्रमेणो

वस्थितंमयानाराधितोमहादेवोविघ्नत्रस्तादिवंदितः॥५२॥अघनामदलिंगस्यदर्शनादृष्टमं
तिः ममजातामहद्भाग्यंमनास्यत्रसंशयः॥५३॥इतःशाकादिकंनीत्वाग्रामेनानाजनाश्रये स्थि
त्वाकिमन्यत्कर्तव्यमत्रैवसाम्प्रं॥५४॥ग्रामेसंसारिणःसंतिबहवोमोहसंकुलाः तद्दर्शनेचित्त
वृत्तिरन्यथेयंभविष्यति॥५५॥बिल्ववृक्षौघसंवीतेस्थातव्यंनिर्जनेवने कर्तव्यंदेवदेवस्यमहादेव
स्यपूजनं॥५६॥अनर्च्यंमहादेवंयदिपश्येत्तुनंतदा आचंद्रार्कंमघोरेषुनरकेषुवसाम्प्रं॥
५७॥अनर्चितंमहादेवैर्नरकेस्थीयतेसदा अतःप्रयत्नतःकार्यंमयाशंकरपूजनं॥५८॥शंकरे
ऽर्चितेनिसंनश्यंत्यघकुलानिहि धर्मार्थकाममोक्षाञ्जलभ्यतेखलुसर्वथा॥५९॥शिवइतिनि
श्चित्यनियतस्तत्रैवसवनेद्विजः ऊवासभार्यासहितः संपज्यग्रामन[illegible]सुवासनां
॥६०॥तदाप्रभृतितत्रैवसभार्यः सवसन्द्विजः पूजयामासतंनर्मदेलिंगमुत्तमं॥६१॥च
कारकुंडममलंतस्यलिंगस्यसन्निधौ तत्रस्नात्वामहादेवंपूजयामासमासदा॥६२॥अभि

Indira Gandhi National
Centre for the Arts

क्षिप्त्वा महादेवांतकुंडस्थोदकैः समाः पूजयामास यत्नेन बिल्वपत्रैः समाहितः॥६३॥ स्वहस्त
लब्धैरक्षिद्रैर्बिल्वपत्रैर्नवारुणैः पूजयामास भक्त्या शिवलिंगस्वरूपिणं॥६४॥ एवं स यत्नेन
मासमन्वहं मनोमयं प्रदक्षिणानमस्कारान्सचकास्तुतिं तथा॥६५॥ ततः सकंदमूलादि किंच
त्संपायसादरं मध्यनिवेद्य यत्नतस्तेनाहारमकल्पयत्॥६६॥ एवं संपूज्य यत्नेन तेन मासद्वयं
स्थितं ततः सत्रविज्ञप्तो नंदिनाध्रिगासन्निधौ॥६७॥ तत्स्वल्पेपि मतात्तत्र वने भर्तुर्विदाग्निना
ततः ससंवत्सात्स्वर्गं बुद्धकालं मदाज्ञया ब्रह्मलोके स्थितं तेनततः कल्पावधिप्रिये ब्रह्म
णापूजितेनैव भक्तिश्रद्धापुरः सरं॥६९॥ ततः सबलिचक्रस्य भूपालस्याभवत्सुतः जातोजा
तिस्मरः स्वांचितपामासमामजं॥७०॥ पार्वत्युवाच महादेवकृपासिंधोविघ्नब्रह्मादिदैवतं
गर्भवासः कथंजातस्त्वद्भक्तस्यवदत्वमे॥७१॥ गर्भवासोतिदुःखापदुःखपापसमुद्भवं तस्मा
तकं कथमज्ञस्यविघ्नशांकर॥७२॥ त्वद्वचनं यानितस्यानिमहेश्वर पुनः पापेनसंबद्धः क

थमासीद्वदप्रभो॥७३॥ त्वद्वचनेनसंदग्धमहापातकपर्वताः तेषुपापानिपुनः क्वास्यवदत्व
मे॥७४॥ बिल्वपत्रैरासंपूज्यसकृदप्यहंहरं सर्वपापविनिर्मुक्ताः शिवंयांतीतिहिश्रुतिः॥
७५॥ क्वशिवार्चनपर्यंतंपपातकानामवस्थितिः शिवेतिस्मरणादेवनस्यत्यघकुलंयतेः॥७६॥ यः
शिवंपूजयेद्भक्त्यासमुक्तः पापकोटिभिः शिवरूपंव्रजातीतिश्रुतिस्त्रबलीयसी॥७७॥ ईश्वरः
गिरिजेबलिचक्रस्यललाटात्प्रादुरासतः तंमन्यंतभूपालः पुत्रत्वेनतदाध्रुवं॥७८॥ प्रादु
रासीद्दादेविसभालात्तस्यभूपतेः तदादुंदुभयोनेदुः पुष्पवृष्टिर्मुदाभवत्॥७९॥ प्रादुर्भूतःस
भूपश्चध्यानस्तिमितलोचनः ससारस्वकृतांपूजांलिंगेबिल्वदलादिभिः॥८०॥ आनंदाश्रु
लवाकीर्णः स्मरन्मामीशमव्ययं हृवासासायममलः कंपपन्नवनीतलं॥८१॥ तंविलोक्यो
श्रुपूर्णाक्षंसराजाविस्मयंगतः गौतमाः गौतमायसमाचख्यौवार्तांमेनामशोधतः॥८२॥ गौ
तमः सततोगत्वाबालकंवीक्ष्यसादरं जगादतस्यवृत्तांतमशेषंप्रतिधानतः॥८३॥ गौतमः

Indira Gandhi National Centre for the Arts

राजन्नयंपुराविप्रोमहापापगणाश्रयः अनेनैतादृशैनैव पूजितः पार्वतीपतिः॥८३॥ततस्तु
नुजहौसोपांशवलिंगस्यसन्निधौ स्वर्गलोकेस्थितंपूर्वमनेनतदनंतरं॥८५॥ब्रह्मलोकेस्थितंरा
जन्नाकल्पंशिवपूजनात् ललाटात्प्रादुरासीत्तवभाग्यवशान्नृप॥८६॥ईदृक्तंतद्वचः श्रुत्वाबा
लकः शीघ्रमुत्थितः ननाममुनिशार्दूलंगौतमंशैवपुंगवं॥८७॥लकः भस्मोद्धूलितसर्वांगरुद्रा
क्षाभरणाप्रिये शिवलिंगार्चकश्रीमन्शैवोत्तममुनीश्वरा॥८८॥त्वंशैवरत्नोसिशिवार्चनप
रायण किंकर्त्तव्यंमयानिर्वदानिश्चित्यसादरं॥८९॥गौतमः धन्योसिकृतकृत्योसिसफलंत्वज्ज
वितं सफलंजन्मतेबालधन्योयंजनकस्तथा॥९०॥बालिचक्रोभवेद्दुःखशरीरंचातिदुर्बलं अतः
परंप्रयत्नेनकुरुराज्यपालनं॥९१॥किंचभस्मोद्धूलितांगः कुरुशंकरपूजनं शिवस्यार्चनेनै
वजातिस्मृतिरुत्तमा॥९२॥जातिस्मरत्वंभूयत्वंलावण्यंचशिवार्चनात् संप्राप्यतेनलभ्यमा
मुक्तिश्चांतेनसंशयः॥९३॥कस्तिष्ठतिमहादेवादपरः कामितार्थदः अतोन्वहंप्रयत्नेनपूज

यस्वसदाशिवा॥९४॥यस्यप्रसादलेशेनविष्णुर्विष्णुत्वमाप्तवान् तादृशः शंकरःपूज्यो
ब्रह्मेंद्रविष्ण्वादिवंदितः॥९६॥कृतंसंयरब्रह्मपुरुषंकृष्णपिंगलं ऊर्ध्वरेतंविरूपाक्षंविश्वरू
पंभजाम्यहं॥९७॥विष्णुब्रह्मेंद्रचंद्राद्याः सेवकायस्यभूतलेः तमेवदेवदेवंभजशंकरन्व
हं॥९८॥यतोवाचोनिवर्त्तंतेअप्राप्यमनसासह तमे०॥९९॥यस्यनिःश्वासपवनाद्वेदाः सर्वेपि
प्रभूतिनः तमे०॥१००॥योमतीनाममुनातेराज्ञीनाथस्यपः पिता तमे०॥१॥यश्चतुर्वक्त्रजनको
योविष्णोर्जनकः प्रभुः तमे०॥२॥योधर्माधर्मोद्भवार्थफलदः श्रीगौराप्राणवल्लभः तमे०॥३॥
योवेदांतोद्भवस्थानंयोवेदांतशिरोमणिः तमे०॥४॥योविष्णुमौलिमंदारमकरंदाइपादुकः
तमे०॥५॥योवेदांतोद्भवस्थानंकंदर्पदमनोयोनिर्योयोमनोन्मनः तमे०॥६॥चिदाकृतिर्न
सिंहोयोयोमहाविष्णुनाशकः तमे०॥७॥यतःसर्वमभूद्दृश्यं जगदेतच्चराचरं तमे०॥८॥य
न्मयासवतेचातोयन्मयोदेतिभान्वमान् तमे०॥९॥यन्मयादनलेंद्रौद्वौस्वस्वकर्मणितिष्ठ

Indira Gandhi National
Centre for the Arts

तः तमे०॥१०॥यद्यदेनमहाविघ्नः कदाचनोपितिष्ठति तमे०॥११॥यद्यदेनचतुर्वक्त्रःकं
यमानोपितिष्ठति तमे०॥१२॥योऽग्नावौषधीष्वप्सुविश्वव्याप्याधितिष्ठति तमे०॥१३॥योन
तोनिष्कलोनन्योनिरुपाधिकः तमे०॥१४॥यःसर्वत्रासर्वात्मासर्वव्यापीसदाशिवः तमेवदे
वदेशभजशंकरमन्वहं॥१५॥त्रिकालमप्रमादेनशिवमर्चयसादरं कुरुभस्मोरुलना
दिकुरुरुद्राक्षधारणं॥१६॥गृहाणशांभवीदीक्षांमोक्षार्थमपिपंडितः मोक्षस्तुनभ
वत्येवविनांशांभवदीक्षया॥१७॥सन्यासयोगघानन्यःप्रुद्रसस्वानिरामयं
प्राप्यब्रह्मामृतंतस्मान्निवृत्तानभवंतिहि॥१८॥सन्यासयोगोविज्ञेयोयादीक्षाशांभवीमता सादीक्षा
कैवल्यमुक्तासन्यासइतिगीयते॥१९॥वक्ष्येशांभवदीक्षायाःस्वरूपलक्षणमप्यहं यद्दीक्षयामोक्ष
लक्ष्मीरदूरस्थाभवति॥२०॥आपादमस्तकंकार्यंभस्मनोद्धूलनंसदा त्रिपुंड्रधारणंकार्यंललाटादिषुभस्मना॥२१॥रुद्राक्षधारणंकार्यंसप्रमादेनसततं लिंगपूजेववर्त्मनाकेवलास

र्वसाधनैः॥२२॥वेदावतंसः सततंजप्यःशैवः षडक्षरः रुद्राध्यायजपः कार्यःशिवसंज्ञंस
माश्रयः देवतासार्वभौमोयः सर्वदेवशिरोमणिः सएवसर्वदाध्येयः पार्वतीरमणोत्रभुः
॥२४॥सभस्मधारणाभाव्यसदारुद्राक्षधारणा श्रौतरुद्राक्षभस्माभ्यांत्रच्युतः पतितोभवे
त्॥२५॥शैवव्रतानिकार्याणिनान्यकालेषुसादर शैवव्रतेपरिभ्रष्टोभ्रष्ट एव भविष्यति॥
२६॥दशशैवव्रतान्याहुर्जाबालश्रुतिपारगाः तानिनिद्रतानिनिद्रतानि यत्नेनकार्याण्येवबु
धैः सदा॥२७॥प्रत्यहंप्रातरुत्थानेनकर्त्तव्यंनक्तभोजनं कालाष्टम्यांतूपवासव्रतं भोजनं
यत्नपूर्वकं॥२८॥अवश्यंसितभूतायांकर्त्तव्यंनिशिभोजनं असितायांतुभूतायांतत्रकार्यं
द्विजातिभिः॥२९॥एकादश्यांसितायांतुपञ्चम्यंभोजनमाचरेत् असितायांतुभोक्तव्यंनक्तभो
ज्यंतुशंकरं॥३०॥त्रयोदश्यांतुभोक्तव्यंरात्रावेवप्रयत्नतः शिवलिंगार्चनंकृत्वास्वशक्त्यापञ्चोप
पूर्वकं॥३१॥निशियत्नेनकर्त्तव्यं भोजनंसोमवासरे उपोषणादिनान्यस्मिन्नदिवसेनियमो

Indira Gandhi National
Centre for the Arts

त्ययं॥३२॥पर्वण्यपिदिनेत्याज्यंभोजनंसोमवासरे किमुतान्येषुदिवसेधिनिजाबालवादि
नः॥३३॥भोजनीयः प्रयत्नेनशैवः रात्रिपुरःसरं शिवार्चनंविनाकोलोननेयोद्विजजन्म
भिः॥३५॥व्रतान्येतानिनियमोकर्त्तव्यानिद्विजन्मभिः व्रतान्येतानिदुष्कामबंतिपतिता
द्विजा॥३६॥एतावंतःशैवधर्माः शैवदीक्षातिगोयते एतद्दीक्षापरिभ्रष्टाः पतंतिनरकेध्रु
वं॥३७॥नयस्यशांभवीदीक्षातस्यमोक्षोविदुर्लभः सत्संसमितिप्राहजाबलिःस्वयमास्ति
कः॥३८॥यस्यशांभवदीक्षायांसंसक्तहृदयोद्विजः तमर्चंतिसदेवापिविष्णुब्रह्मादयःसु
राः॥३९॥द्विजत्वमपिसंप्राप्यशैवदीक्षापराङ्मुखाः येभावंतितेसर्वेयांतिनरकंध्रुवं॥४०॥
आशांभचाभविष्यंतिचाप्तेकलियुगेद्विजाः तेगमिष्यंतिनरकंयावदाचंद्रतारकं॥४१॥अ
शांभवार्थंसंत्यजंतिनरकाणिपुरार्यतः तत्रएवतेयांतिनरकेष्वसंभावतः॥४२॥अशांभव रामः
गृहाइयानरकाणितथासतिअशांभवाः व्रयासेवस्वग्रहान्प्रतिसत्वरं॥४३॥अशांभ ३२८

वान्नमन्नेणापिमाविलोकयसर्वथा यदिपश्यसिमोहेनतदास्यंविलोकय॥४४॥आशां
भचान्द्विजान्सर्वान्म्लेच्छारोपयादरात् आशांभवानांहननेपातकंनभविष्यति॥४५॥
शैवधर्मपरिभ्रष्टादुष्टाएवद्विजास्ततः दुष्टरक्षापरोधर्मोराज्ञांभवतिसर्वथा॥४६॥
शैवमध्येवसश्रीमाशैवान्योक्षयसर्वदा शैवानेवार्चयश्रीमाशैवमेवविलोकय॥४७॥
शिवालयानिपात्रेनकारयस्वयंप्रयत्नतः बहिर्बिल्ववनान्येवकारयस्वप्रयत्नतः॥४८॥
विल्वपत्राणिसततंत्वमेवाहरसादरं आदरेणबिल्वपत्राणिपूजयस्वसदाशिवं॥४९॥
अनर्घ्यमहादेवंमामामुक्ष्यभ्रमादपि शिवतीर्थमयोत्वंमामामुक्ष्यकदाचन॥५०॥कुरु
यत्नेनसततंमहादेवंनिरीक्षणं कुरुयत्नेनसततंशिवमंत्रंजपंसदा॥५१॥सर्वदानीलकंठे
तिमहादेवेतिसंवदहृदिशंकरमाराध्यात्वंवससर्वदा॥५२॥रुद्राक्षभस्मनानित्यंभस्म
यस्त्वंकुरुपदापुत्रामविष्यंतितदाननविलानपि॥५३॥शिवनामांकितानेवकुरुयत्नेन

Indira Gandhi National Centre for the Arts

सादरं तानप्यवश्यंयत्नेनशांभवान्कुरुसादरं॥५४॥ब्रह्महंशिवपूजायांनियोजयन
पात्साजान् पदान्नफलदध्यादिभोक्तव्यंतैर्भविष्यति॥५५॥तदातोकनमुः सोमेत्यादिमंत्रान्पठन्
मात् हावुहावु इत्यादिमंत्रान्पठन्ततः परं॥५६॥अंगुष्ठमात्रपुरुषोयोंगुष्ठंचसमाश्रितः इशःस
र्वेस्यजगतः प्रीत् प्रीणातिविश्वभुक्॥५७॥ इतिवैदिकमंत्रेणशिवायान्नंनिवेदय रौद्रेभ्योप्य
मुनान्नानिमन्त्रेणनिवेदय॥५८॥ततः परंश्रद्धयाभिसादिमन्त्रपंचकं प्रत्येकंसमनुध्यैन्
नः प्राणाऽरु॥५९॥ततः परमुमाकांतंकवलेकवलेस्मर मध्येजलादियानेपिस्मरसांबम
हेश्वरं॥६०॥स्मरहृदिमाहादेवंकुरुमौनेनभोजनं वक्तव्यंकुरु॥५९॥ततः परमुमाकां
तंकवलेस्मर मध्येजलादि पानेपिस्मरसांबं महेश्वरं॥६०॥स्मरहृदिमाहादेवंकुरुमौ
नेनभोजनं वक्तव्यंयदिमध्येस्यात्तदाशिवकथांवद॥६१॥भृंक्ष्वरौद्रैः सहान्नानिवरौ
द्रैः सहामृतं वसरौद्रैः सदाप्रीत्यायजरौद्रैः महेश्वरं॥६२॥श्रृणुरौद्रकथांनिसंघोर

पातकनाशिनींवदशंकरसर्वेरा महादेवेतिसर्वदा॥६३॥अयंद्विजातिमात्रस्यधर्मो
ऋसमुदीरितः ब्रह्मक्षत्रियवैश्यानामेषधर्मः सनातनः रौद्रक्षेत्रमिदंज्ञेयमरुणा
चलनामकं अरुणाचलनाथस्यत्रिकालंकुरुपूजनं॥६५॥अरौचानांशिवक्षेत्रेप्रवे
शोनयथातथा कुरुदैवादागतां स्त्वान्प्राणैरेवंवियोजय॥६६॥वाजपेयफलंप्राप्यम
रौद्रानांविनाशाते अरौद्रनाशनंपुण्यंपरमोक्षमुच्यते॥६७॥रौद्रधर्मंसुसंतत्तं
निष्मातोभवसर्वथा शिवसेवार्चयप्रीत्यारिद्रैकपरदेवतः॥६८॥त्रियंबिकोदेवंरौद्रंभज
शंकरमादरात् त्रियंबिकेतिमंत्रेणयजसांबंसदाशिवं॥६९॥त्रियंबिकेतिमंत्रेण
यः पूजपतिशंकरं ससर्वान्लभतेकामानितिजाबालवादिनः॥७०॥त्रियंबकं
कररणान्सांवकान्नितिमन्महे निरंवकान्मन्महेहं त्रियंबकंपराऽनुरवान्॥७१॥
सदाशिवः इत्युक्तापूजितोराज्ञागौतमः स्वाश्रमंययौ तदाप्रभृतिमत्पूजानि

Indira Gandhi National
Centre for the Arts

यतोब्रालकोप्यभूत्॥७२॥तयितानंदघ्नकृतकृत्यममन्यतः स्वात्मानमधिभूपालः कृत
कृत्यममन्यत॥७३॥ततस्मिंस्तन्सुतेराज्यंनिवेद्यस्वयमादरात् गृहीत्वाशांभवींदीक्षांतत्रै
वोवाससतत॥७४॥तत्पुत्रस्याभवत्प्रीतिर्महादेवेमधिप्रिये मधिप्रीतिर्यथातस्यातथानान्यस्य
सर्वथा॥७५॥सनानादेशराजभ्योजगृहेकन्यकाः सुभा योयोददातितांतांवैसगृह्णात्येवकं
न्यकं॥७६॥एवगृहीत्वाबसतस्तस्यलक्षंमनोरमाः जयांबभूवुरमलेरूपलावण्यशोभि
ताः॥७७॥शिवाग्रेनर्त्तनोपेताः पत्न्यस्ताविनियोजयत् नियोजिताःस्त्रियस्ताश्चचक्रुर्नर्त्त
नमादरात्॥७८॥त्रिकालंनर्त्तनंकृत्वापत्न्यस्ताःसाध्वीरक्षिताः संपूज्यशंकरंनिषमाया
तिसदनंव्रजति॥७९॥गायंतितामहेवाग्रेप्रातिवासरमंबिकेताः सर्वदापिमज्जापत्नीकृत्व
वसंस्थिताः॥८०॥एकैकस्यांपंचपंचपंचपुत्रास्तस्याभवन्शिवे मन्नामविहितांश्चक्रेसपुत्रो
नखिलानपि॥८१॥सतान्शंवभवदीक्षायांविनियोजयदादरात् पुत्रास्तस्याभवन्सर्वेमद

र्चनपरायणाः॥८२॥शिवव्रतानिसततंतैः कृतानिघ्नतोतः दृष्ट्वातान्व्रत्नविष्ण्वाधा
तोएववस्थितासदा॥८३॥ब्रह्मलोकादिलोकेषुस्थितंतैस्तुकदाचन कदाचिद्बालकैस्तै
स्तुपथिव्यामेवसंस्थितं॥८४॥स्वर्गलोकेयदाबालास्तेनातासादरंतदा तानिंद्रःपूजयामास
बृहस्पतिसमन्वितः॥८५॥कदाचित्तेगताः पूर्वंसत्यलोकेनपात्मजाः तदाब्रह्मासमुत्थाय
चक्रोत्पूजनंमदा॥८६॥कदाचित्तेगताःपूर्वंविष्णुलोकेनपात्मजाः तदाविष्णुःसमुत्था
यचक्रोत्पूजनंमु॥८७॥इशास्तेसदावालाःमदाराधनतत्पराः स्थितारेवातियत्नेनशिवं
व्रतपरायणाः॥८८॥तस्याभवन्नेषपुत्रश्चंद्रमौलिरितिश्रुतः सददंशंवहिर्ग्रामान्मन्दाल
ब्रात्मणंवने॥८९॥ततःपरमशैवोयंमयादृष्ट इतिप्रिये जघानतच्छिरःसद्यःशस्त्रमुद्या
घवीर्यवान्॥९०॥ततोस्ययातनाकाममन्दालस्यभवितिइतिज्ञात्वायोशीघ्रंधर्मराजानि
केतना॥९१॥ततस्तमागतंवीक्ष्यचंद्रमौलिंनयोतमं अभूत्स्वायेनयानेनचक्रेपूजांतदा

Indira Gandhi National Centre for the Arts

यमः।।२३।।ततः परं समानीतः सनन्दालोद्विजोभटैः तंवीक्ष्यकालस्तदनुचित्रगुप्तमुवाच।।२३।।यमः किमनेनकृतं पापंतत्सर्ववदतत्वतः यद्यंघोरपापीस्यात्तदाभुंजतुयातनां।।२४।।इत्युक्तंतद्वचः श्रुत्वाचित्रगुप्तोविचक्षणः विचारपूर्वकंग्राहवचनंवाग्विशारदः।।२५।।चित्रगुप्तः अथातवेदशास्त्रापाकृतंयागश्चसादरं एतादृशोप्ययंभालेनन्दालोपयेति मोहतः।।२६।।वाग्विशारदः यद्येकघपिविध्वंसन्नन्दालेलापयिष्यति तदाविध्वंसमाप्नोतिब्रह्महत्यासंशयः।।२७।।मोहेनापिमदंयस्तुललाटेलापयेत्सदा समुंजतेयातनां घोरांयावदाचंद्रतारकं।।२८।।अकृतंसर्ववेदोपियोनन्दालोभविष्यति सर्वेषांनास्तिनिष्कृतिः।।२९।।अथात

घमानसः तदाकृतार्थमात्मानममन्यत गिरींद्रजे॥१३॥रौक्षतपरा जाताः पुत्राः सर्वे ममेदृशाः ईतोधिकंमहद्भाग्यंकस्यवाभुविति हति॥१३॥एकोपियदिपदृशेशांभवेतिस्वतः सोपिवान्नत्रमोवंशोपतः शांभवेवान्वयं॥१४॥पंचलक्षममीपुत्राममसर्वेपिशांकराः मम भाग्यंस्यकिन्यूनंधन्योहंमात्रसंशयः॥१५॥सर्वभूचक्रनाथत्वंशांभवत्वंचसर्वथा अनल्पपुत्रवत्वंचमयाप्राप्तंशिवार्चनात्॥१६॥शिवः कृपालुर्देवेशोमत्वभाग्यंकथंददौ बहुकालं पूजनंचनकृतंसाधुसाधनैः॥१७॥नासहयंबिल्वपत्रैः पूजितःपार्वतीप्रभुः कथमेतादृशंभाग्यंददौमत्वमनामयं॥१८॥यदिवासरमात्रंचेत्पूजितः शंकरस्तदा ददातिकोदृशंभाग्यंतत्रविज्ञायतेमया॥१९॥एतादृशंकृपासिंधुशंकरंलोकशंकरंयेनार्चयंतितेमूढाःसंसेनसंशयः॥२०॥शंकरस्यार्चनंपुण्यमिहामुत्रफलप्रदं कार्यंसिवार्चनंनित्यमिहामुत्रसुखार्थिभिः॥२१॥कृतानंतमहापापोप्यभ्यर्चयतियः शिवं मुक्तयातकोमर्त्यो राज्यंमोक्षंच विंदति॥२२॥मनुष्याणांगतिर्नित्यंत्रैलोक्येप्यविधिनाइदृशंहिमहद्भाग्यंप्राप्तंशं

करंजयाम्॥२३॥जातिस्मरत्वंबहुपुत्रतांचभूचक्रनाथत्वमखंडितंचं मोक्षंचदातुंशिवएवशक्तः सत्यंपुनःसत्यमिदंत्रिसत्यं॥२४॥कः शंकरान्मोवितरेत्तभाग्यंकः शंकरान्मोवितरेत्तमोक्षंकः शंकरान्यस्तनुतेसुखानिकः शंकरान्योविधिविक्षसेव्यः॥२५॥यस्यादपद्मंनिगमांतवेद्यंयस्यादपद्मंमुनिवंदवंद्यंयस्यादपद्मंविष्णुवंतंयस्यादपद्मंरमाराणांब्रजामि॥२६॥यस्यादपद्मांबुजरेणुमिश्रंमुकुंदचंद्रेंद्रचामुंडवाद्याः समर्चयंत्यन्वहमादरेणातस्यादपद्मंरमाराणांब्रजामि॥२७॥यस्यादपद्मांबुजमादिविक्षुस्वनेत्रपद्मेनमनोहरेणासमर्चयामासतदर्चनेनसौभाग्यमुत्कीसुलभेनलभ्ये॥२८॥यन्नामसंकीर्तनमेकमेवविनाशयत्याशुमहाघसंघं तंवेदमीशंशरणंब्रजामिब्रह्मेंद्रविष्ण्वादिसुरैकवंद्यं॥२९॥यन्नामपीयूषमपीपमानाभवंतिसंसारसमुद्रमग्नाः तंदेवमीशंशरणंब्रजामिब्रह्मेंद्रविष्ण्वादिसुरैकवंद्यं॥३०॥यन्नामयात्रोच्चरणेनसद्यो धन्याभवंत्येवहि

Indira Gandhi National Centre for the Arts

पापिनोपि तंदेवमीशं०॥३१॥यन्नामदेहक्षयपूर्वकालेस्मतंददासेवहिमोक्षमेकं तंदे
वमीशं०॥३२॥यन्नामतत्वंनविधिर्विवेदयन्नामतत्वंनविवेदविष्णुः तंदेव०॥३३॥यन्नामतत्वं
नविवेदवेदोप्यनंतशास्त्राणिसंकुलस्वरूपः तंदेव०॥३४॥यन्नामसंसारसमुद्रविद्रं विद्रानंकुसं
र्वभयापहारिं तंदे०॥३५॥न्नोपमसंकीर्तनएतज्जिह्वाः सदाचिधिंद्रावरजादिपूज्याः तंदेव०
॥३६॥यन्नामदिव्यामृतपानसंक्तानिदंतिदेवानपिविस्मरंतं तंदेव०॥३७॥यन्नामगाको
ठिसहस्रकोटिप्रदानपुण्याधिपुण्यपुण्यंतंदेव०॥३८॥यन्नाममात्रोन्नतदंतिकोटिप्रदानपु
ण्याधिकपुण्यपुण्यं तंदेव०॥४०॥यन्नामरत्नोन्नमकोटिकोटितुलाप्रदानाधिकपुण्यपुण्यं तं
देव०॥४१॥यन्नामस्मृतोत्रममवाजिकोटिप्रदानपुण्याधिकपुण्यपुण्यं तंदेव०॥४२॥यन्ना
ममहेमोन्नमकोटिकोटिप्रदानपुण्याधिकपुण्यपुण्यं तंदेव०॥४३॥यन्नामकन्यार्बुदकोटि
कोटिप्रदानपुण्याधिकपुण्यपुण्यं तंदेव०॥४४॥यन्नामसस्पर्वतसर्वपृथ्वीप्रदानपुण्या

धिकपुण्यपुण्यं तंदेव०॥४५॥इत्युक्त्वासततंपुत्रान्सर्वान्नाकूंपसादरं उचाचवचनंचारु
स्वपुत्राणांहितावहं॥४६॥राजोवाच. अर्चयध्वंमहादेवंविष्णुब्रह्मादिवंदितं त्रिकालमप्रमा
देनबिल्वपत्रादिसाधनैः॥४७॥भजध्वंमंत्रमादेनशिवंब्रह्मादिवंदितं जपध्वंमनिशंप्राणायामेन चैव
पंचाक्षरंपरं॥४८॥ऊहूलनंत्रिपुंड्रंचतथारुद्राक्षधारणंमाप्यजध्वंमाप्यजंध्वंनिशाकालेपिसर्वथा
॥४९॥शृणुध्वमतियत्नेनमोक्षदांशांभवीकथांशांभवैः सहसेलापांकुरुध्वंभस्ममुद्धूलिताः॥५०॥
आज्ञांभवान्नशिक्षयध्वंशिक्षयध्वंप्रयत्नतः विप्रुद्धरणंभवीदीक्षांपालयध्वंप्रयत्नतः॥५१॥मेयां
कार्यांतपश्चर्यांशिवमुद्दिश्यसंततं कुर्वंतुसकलाधमान्प्रजांपालनपूर्वकं॥५२॥शिवः इत्युक्त्वास्व
सुतान्राजास्नात्वाब्रह्मसरोवरे तपः कर्तुंसमारेभेनियतोनिर्जितेंद्रियः॥५३॥ऊहूलनंत्रिपुंड्रा
ख्यंरुद्राक्षैश्चविभूषितः शिवलिंगार्चनपरः शुशुभेन्नपतिः शिवे॥५४॥न स्त्रीगएजनंप्र
एयंतपइत्युच्यतेबुधैः अतस्तदर्चनेनिद्यात्स्यज्जातावरानने॥५५॥फलानिभक्षयित्वैवमा

Indira Gandhi National
Centre for the Arts

समात्रमुवाससः ततोमासंजग्राहारंचकारनियतेंद्रियः॥५६॥ततश्चक्रेनिराहारंवत्सरत्रयमा
दरात् तेनैवतपसादेवाब्रह्मक्षुभिताभवन्॥५७॥ततस्तस्यमनोऽहंविष्णुरूपंधृतंमया ध
वोऽहंवेधसंरूपंततस्तंत्रगतंमया॥५८॥वैनतेयसमारूढंशंखचक्रगदाधरं पीतांबरंधरंराजा
मोहयञ्चलवात्स्यतः॥५९॥ततोदेवोवरंराजन्निस्तुतंसादरंमया ततोमांप्रत्युवाचेदंतदृश्ये
श्रूणुसादरं॥६०॥राजोवाच नभवत्तोवरंयाचेयातः क्षुद्रोहरंभवान् परंतुसर्वदेवेशाद्वरंयाचे
महेश्वरात्॥६१॥आदिविष्णुर्यतः पूर्वंयस्माज्जातोमहेश्वरात् तस्मादेववरंयाचेरांकराद्भोकरांक
रात्॥६२॥यतश्चाद्भुतयोजातोदेवदेवान्महेश्वरात् तस्मादेववरंयाचेरांकराद्भोकरांकरात्॥६३॥
यस्मादिंद्रादयोजातादिक्पालाः श्रीमहेश्वरात् तस्मा०॥६४॥देवायस्मात्समुत्पन्नादेवदेवान्महे
श्वरात् तस्मा०॥६५॥यस्मात्सूर्यः समुत्पन्नोदेवदेवान्महेश्वरात् तस्मा०॥६६॥यस्मादजायताकी
र्तिदेवदेवान्महेश्वरात् तस्मा०॥६७॥यस्माच्चंद्रः समुत्पन्नोदेवदेवान्महेश्वरात् तस्मा०

॥६८॥यस्माद्वायुः समुत्पन्नोदेवदेवान्महेश्वरात् तस्मा०॥६९॥यस्मादायः समुत्पन्नोदे
वदेवान्महेश्वरात् तस्मा०॥७०॥यस्मादग्निः समुत्पन्नोदेवदेवान्महेश्वरात् तस्मा०॥७१॥यस्मा
त्क्षोणीसमुत्पन्नादेवदेवान्महेश्वरात् तस्मा०॥७२॥यस्मादोषधयोजातादेवदेवान्महेश्वरात्
तस्मा०॥७३॥यस्मादन्नंसमुत्पन्नंदेवान्महेश्वरात् तस्मा॥७४॥यस्माद्वीपाःसमुत्पन्नादेवदेवान्म
श्वरात् तस्मा०॥७५॥यस्मात्द्विपादःसंभूतादेवदेवान्महेश्वरात् तस्मा०॥७६॥यस्माच्चषड्दोजा
तादेवदेवान्महेश्वरात् तस्मा०॥७७॥यस्मादष्टपदोजातादेवदेवान्महेश्वरात् तस्मा०॥७८॥य
स्माद्दशानिजातानिदेवदेवान्महेश्वरात् तस्मा०॥७९॥यस्माद्विराजातादेवदेवान्महेश्वरा
त् तस्मा०॥८०॥यस्माद्रुद्राः समुत्पन्नादेवदेवान्महेश्वरात् तस्मा०॥८१॥यस्यांतनविदुर्देवाम
वदाद्याः पिनाकिनः तस्मा०॥८२॥यस्यस्वरूपंननांतंसर्वथाभवदादिभिः तस्मा०॥८३॥येब्रह्मा
देनविष्णुत्वंत्वपात्राप्तंपुराहरेतस्मा०॥८४॥ब्रह्मत्वंब्रह्मणाप्राप्तंयत्प्रसादात्पुराहरे तस्मा०॥८५॥

Indira Gandhi National
Centre for the Arts

इंद्रत्वंप्राप्तमिंद्रेणयत्प्रसासुरहरे तस्मा०॥८६॥वासयंवापुरनिशंपस्माद्दीतोमहेश्वरात्
तस्मा०॥८७॥सूर्योप्यहरहोदेतिपस्माद्दीतोमहेश्वरात् तस्मा०॥८८॥उदेतिवह्निश्चंद्रश्चंयस्मा
द्दीतोमहेश्वरात् तस्मा०॥८९॥यद्दंतैर्मेदिताःशैलामंदारप्रमुखापुरा तस्मा०॥९०॥यद्दंतैः
क्षणमात्रेणसमुद्राश्चुलकीकृताः तस्मा०॥९१॥यद्दंतैःक्षणमात्रेणालोकामत्सासिताःपुरातस्मा०
॥९२॥तृणीकृतोसियद्दंतैस्त्वमेवगरुडध्वज तस्मा०॥९३॥तृणीकृतश्चतुर्वक्त्रोयद्दंतैर्हंस
वाहनः तस्मा०॥९४॥तृणीकृतः शचीनाथोयद्दंतैः स्वर्गभूपतिः तस्माः॥९५॥यतोवाचोनिवर्त्त
तेअप्राप्यमनसासह तस्मा०॥९६॥यदंतंसत्परंब्रह्मपुरुषंकृष्णपिंगलं तस्मा०॥९७॥यदक्षरंवि
रूपाक्षमक्षय्यफलदायकं तस्माः॥९८॥यद्ध्रुवंतमनाद्यंविश्वरूपमनामयं तस्माः॥९९॥यो
निर्गुणोनिराकारोनिरुपाधिर्निरंजनः तस्मा०॥१००॥यः सर्वदेवदेवांतश्चितिपाधोमहेश्वरः तस्माः
॥१॥यःसृजत्यवतिस्वैरंहंतिसर्वमिदंजगत् तस्मा०॥२॥त्वयात्वन्नेत्रयत्नेनपूजितंपत्पदांबुजं ज

स्माणाश्॥कंदर्पदर्पदलनोपः स्वतंत्रोमहेश्वरः तस्मा०॥४॥यःसर्वशिक्षकोदेवोनरसिंहनि
पातनः तस्मा०॥५॥देवतासार्वभौमोपःसर्वदेवशिरोमणिः तस्मा०॥६॥मधुसूदनयोदेवो
मधुसूदनसूदनः तस्मा०॥७॥यद्दत्यमत्सागीर्वाणाभवत्प्रभृतयोहरे तस्मा०॥८॥यद्द
त्यंवेत्रसंत्रस्ताःश्रीहरेभवदादयः तस्मा०॥९॥नयस्मात्परमोदेवोनयेनसदृशोथवा त
स्मा०॥१०॥यःसर्वदेवदेवेशोमहादेवोखिलेश्वरः तस्मादेववरयाचेशंकरंरंकशंक
रात्॥११॥त्वयामत्तोहरेदेयःकथमित्थंतमोवरः महेशादपरःकोवाभवेदित्थंवरप्रदः॥
१२॥वरोदेयइतिस्वैरंकथंधाष्ट्यीकृतंत्वया मपिधाष्ट्यमिदंकृतंवनेवोचितंहरे॥१३॥
अस्वतंत्रेणाहरिणात्वयाचेद्वीयतेवरः तुम्पनेववरोदेवोमयाकिंनभविष्यति॥१४॥य
थाहमस्वतंत्रोस्मिसर्वकालेष्वसर्वथा तथात्वमप्यस्वतंत्रःसस्पमेवोच्यतेमया॥१५॥स्व
तंत्रःश्रीमहादेवस्तदन्येभवदादयः अस्वंत्रास्तोमत्प्रवरदाताकथंभवान्॥१६॥ह

Indira Gandhi National
Centre for the Arts

रकोवावरोदेयोदातुंशक्तिःकदाचन॥१७॥पीतांबरजी
र्णमेकंवदीयमिहतिष्ठति तस्मिन्नपिनमेप्रीतिर्बिहंगत्वेननिश्चिते॥१९॥वैकुंठलोकवास
स्तवयादातुंनशक्यते किंचेक्षापिनमेतत्रकिंतत्रास्तिवदस्वमे॥२०॥सुदर्शनाभिधंचक्रंतवपा
दातुंनशक्यते तत्किपत्कालपर्यंतंस्थित्वाशोकरमेष्यति॥२१॥लक्ष्मीतोप्यधिकाप्रद्धाःसतिलक्ष्
स्त्रियोमम ततोलक्ष्म्यामपिप्रीतिर्मनास्त्येवसर्वथा॥२२॥अस्तुतत्रेणाहरिणामोक्षोदातुंनश
क्यते अतःपरंत्वयादेयंकिमस्तिवदतन्मम॥२३॥गच्छगच्छहरेश्रांतःश्रमोभ्यानमतव अघप्र
भृतिरौवेसुधार्घ्यमाकुरुसर्वथा॥२४॥अत्रषवैदिकमार्गेषुदुष्टेष्वत्वयाहरे वरदास्येवरदास्ये
इतिकार्यात्रतारणा॥२५॥शांभवव्रततिष्वेषुमादृशेषुत्वयाहरे वरदास्येइतिवैरंकर्थकार्यात्र
तारणा॥२६॥वरदाताहमस्मीतिभ्रांतिमाकुरुमाधव तवचेद्वरदात्वंतरेद्विप्रोपिसागरा॥ श्रीराम
॥२७॥वैकुंठःप्राप्तइत्यत्रगर्वंमामाप्रदर्शयतत्राधिकारमात्रेणागर्वस्तिकथनीदृशः॥२८॥ ३३६

हरेवैकुंठलोकस्यत्वधिकारोतिचंचलः अधिकारेततस्तस्मिन्नकाचाप्रीतिर्भविष्यति
॥२९॥शिवोविष्णुत्वमन्यस्मैदास्यत्यग्रेस्वतःप्रभुः दत्वावैकुंठंशानस्तस्मैदास्यतिशंकरः
॥३०॥तस्मैददातिविष्णुत्वंसोऽपिःपार्वतीपतिः तस्मैददातिवैकुंठंसुदर्शनमपिप्रभुः॥३१॥
बहवोविष्णवोजाताः संख्यातेषांनविद्यते अतःपरंभविष्यंतिबहवोविष्णवोहरे॥३२॥अ
संख्याताहताःपूर्वंमहादेवेनविष्णवः बहवोग्रेपिहंतव्याविष्णवःशूलपाणिना॥३३॥शिवमु
द्दिश्ययोमर्त्योविष्णुत्वप्राप्तयेतपः करिष्यतियत्नेनविष्णुत्वंतेनलभ्यते॥३४॥ब्रह्मत्वमप्ये
वमेवलभ्यतेबहुभिर्हरे इंद्रत्वमप्येवमेवलभ्यतेबहुभिहरे॥३५॥अधिकारविरोधोयंविष्ण
वमतिचंचलः अतोतिचंचलेनास्मिन्प्रीतिंमाकुरुमाधव॥३६॥विष्णुत्वप्राप्तिमात्रेणाग
र्वश्चेदृदृश्यतेत्वया गाणपत्यस्यतुप्राप्यामभ्यानगर्वोभविष्यति॥३७॥गर्वंविहायसततंपूजय
स्वमहेश्वरं गर्वेनसहतेशर्वंगर्वापहारकः॥३८॥गाणपत्येकृतेपाशर्वं पूजयस्वमाधव किं

Indira Gandhi National
Centre for the Arts

मक्तितववैकुंटेविद्मल्लेवावदस्वमे॥३९॥शिवार्चनेनसंतुष्टोगाणांपत्यंमहेश्वरः॥५०॥
दास्यतिगोविंदसिद्धिक्षेत्रेमिदंयतः॥४०॥गाणापत्यंशिवाद्ध्यायशिवसेवापरोभव॥४१॥
दास्यतिमुक्तिंचशंकरः करुणाकरः॥४१॥तिष्ठहयद्यागच्छेतस्त्वतः कार्यंनमेहरेस्यास्मस्य
त्रपथेकुंचेत्तदामोनेनसवस्व॥ ४१॥श्रीमहादेवउवाच इत्युक्तासनपोदेविभस्मधत्वाशि
वार्चकः मदेकशरणोभूत्वामामभ्यर्च्यस्थितोमुदा॥४३॥तदामेकशरणंतंदृष्ट्वानपतिंशि
वेसंतुष्टोस्मिमयातस्मैस्वस्वरूपंप्रदर्शितं॥४४॥अनंतोघमहानंदोनानाभरणविभूषितं
मांविलोक्यातिसंतुष्टस्तूष्णीमवन्पतिः शिवे॥४५॥राजोवाच कृतार्थोस्मिमहादेवकृतार्थोस्मि
महेश्वरकृतार्थोस्मिहरानंतकृतार्थोस्मिशिवापते॥४६॥नमस्तेदेवदेवीयनमस्तेशंकरप्रभो
नमस्तेपार्वतीनाथनमस्तेनीलकंठायनमस्तेनीललोकरुणाकर॥४७॥नमस्तेमुक्तिमदारना
मस्तेभक्तवत्सल नमस्तेशर्वसर्वेशानमस्तेपुरस्दन॥४८॥नमस्तेनीलकंठायनमस्तेनीललो

हित नमस्तेभगवन्शंभोनमस्तेवृषभध्वज॥५९॥नमस्तेनिर्गुणायनमस्तेसगुणाप्रभो
नमस्तेनिः कलश्रीमस्तेशशिशेखर॥५०॥नमस्तेचंद्रचूडायनमस्तेभरिभक्षण नमस्तेसर्पभू
षायनमस्तेशूलपाणिने॥५१॥नमस्तेविश्वरूपायनमस्तेविश्वचक्षुषे नमस्तेविश्वमूर्तायनम
स्तेविश्ववाहवे॥५२॥नमोनेतगुणाधारनमोविश्वंभरायते नमः खट्वांगहस्तायनमस्तेपस्तेपर
मात्मने॥५३॥नमस्तेभूरिरूपायनमस्तेभूरितेजसे नमोविद्मवादिवृंघायनमस्तेस्वरूपिते॥५४॥
नमस्तेदेवदेवेशानमस्तेसुरसत्तम नमस्तेअस्तभगवन्नमोविश्वेश्वरायते॥५५॥महादेवन
मस्तेस्तुत्यपंचकनमोस्तुते नमस्त्रिकालाग्निकालायनमस्तेत्रिपुरांतक॥५६॥नमःकालाग्निरु
द्रायमहारुद्रायतेनमः नमस्तेकालरुद्रायनमः सर्वेश्वरायते॥५७॥वमः परमरूपायसदाशि
वनमोस्तुते नमःश्रीविश्वनाथायविद्मनेत्रार्चितांघ्रये॥५८॥नमोविश्वैकवंद्यायविश्वाशा
स्यापतेनमः नमोवेदांतवेद्यायनिर्मलायामितात्मने॥५९॥नमस्त्रिशूलहस्तायकंदर्पदल

Indira Gandhi National
Centre for the Arts

नायते नमोऽमरुहस्तायचिरूपायनमोनमः ॥६०॥ विदारितन्रसिंहायसंदग्धमदनायते हं
नत्रस्तोत्तमांगायशंभवेप्रभवेनमः ॥६१॥ गरुडध्वजवंधायमकरध्वजहारिणे पुरुषध्वजमिश्रा
यभवायप्रभवेनमः ॥६२॥ विश्वाकारायविश्वायनमस्तेविश्वतस्त्विषेविश्वभव्रनमस्कृभ्यंनम
स्तेविश्वमूर्तये ॥६३॥ अनंतविभवश्रीमन्नप्रमेयगुणार्णव अपराधान्क्षमस्वेशकरुणासा
गरप्रभो ॥६४॥ धत्वारूपांतरं पूर्वस्थितंशंभोत्वयातदा नार्चितोध्यादिभिस्तत्रनापराधोममत्र
भो ॥६५॥ सोमार्द्धशेखरश्रीमन्विश्वरूपस्त्वमस्यतः विश्वरूपस्यतेपूजाकर्तुमेवनशक्यते ॥
६६॥ विष्णुब्रह्मादिरूपाणिगृह्यतेशंकरत्वया यदातदातुतद्रूपपूजायांनहिमेरुचिः ॥६७॥तदा
तुशांभवंनेजंस्वरूपंध्रियतेतदा पूजाप्रयत्नतः कार्या यत्रपुष्पफलादिभिः ॥६८॥शांभवं
रूपमेवैकंपूजनीयंप्रयत्नतः नाशांभवंपूजनीयंरूपमित्याहिश्रुतिः ॥६९॥ स्वलिंगंपूजनी
यंवैदिकश्रुतिचोदितं ऽमार्द्धविग्रहामूर्तिः पूजनीयाथवाद्विजैः ॥७०॥ नगुणोनिष्कलंसाक्षा

च्छिवलिंगंशिवात्मकं पूजनीयंप्रयत्नतद्विजैर्वेदविदांवरैः ॥७१॥ शिवात्मकंपूजनीयंलिं
गमेवद्विजैः सदा निधनेत्यादिभिर्मंत्रैर्लिंगस्यप्रतिपादनात् ॥७२॥ मूर्तिपूजाविचेत्कार्या
मूर्तिःसोमार्द्धशेखरा सांबात्रिनयनापूज्यानान्यंसर्वात्मनाद्विजैः ॥७३॥ पूजनीयःप्रयत्ने
नशास्त्रेषुस्मृतिभाषया नान्यःपूज्योमन्त्रमेणापीत्यस्तिहिश्रुतिरीश्वर ॥७४॥ शिवउवाच इति
कृत्वार्घ्यपाद्यैर्नामभ्यर्च्यप्रयत्नतः कृतांजलिपुरोतिष्ठद्विनयानतकंधर ॥७५॥ वरंदकृष्णरा
जेंद्रवरामिवंददाम्यहं मत्तोवृणुष्वमाचिरंयतोस्मीसुकृवानहं ॥७६॥ इत्युक्तंद्युचः श्रुत्वासंपू
ज्यार्घ्यादिभिर्नृपः कृतांजलिपुटोभूत्वायपार्वेवरमीदृशं ॥७७॥ राजोवाच महादेवकृपासिंधोवि
भ्रुवस्त्रादिवंदितममास्त्वचंचलाभक्तिस्त्वयीवाव्यभिचारिणी ॥७८॥ महाप्रलयकालेपिशंभो
त्वत्पादपंकजात् मच्चित्तचंचरीकोयंमायात्वन्यत्रसर्वथा ॥७९॥ महापापपिशाचोयंत्वदन्यंना
र्चयाम्यहं ईदृशीनमभक्तिर्यात्सदाभवतुप्रभो ॥८०॥ यथात्वदन्यपूजायांमतिर्मेनभविष्य

Indira Gandhi National
Centre for the Arts

ति तथाकुरुमहादेवप्रसादंमपिसर्वदा॥८१॥सदाशिवमहेशेतिनामोच्चारणात्परा रसनेयं
ममास्त्वेप्रसादादहर्निशं॥८२॥नत्रिपुंड्रधारणेप्रीतिरक्तमे नातस्मादनिष्टनासक्तप्रीतिरा
पद्मपिप्रभो॥८३॥त्वत्पादपद्मपूजायामसक्तप्रीतिरखंडितः पत्पादपूजनाढ्येभ्यामुक्तिकांतातिदु
र्लभा॥८४॥त्वन्नैवान्यामरेप्रीतिर्ममास्तुमहेश्वर प्रीतिरस्तुमहादेवशिवलिंगैकपूजने॥
८५॥निवृत्तमस्तुमच्चित्तंपुत्रपौत्रादिषुप्रभो त्वत्पूजासाधनेसक्तंचित्तमस्तुममान्वहं॥८६॥
शिवाभक्तत्वत्कथामात्रश्रवणाद्यवणंमनः ममास्तुप्रीतिरनिशंत्वत्सेवायामुमापते॥८७॥श्री
शिवउवाच ईत्यनेकेवरान्तेनदत्ताद्वावरानने दत्ताश्चतेवरास्तस्मैवराः सर्वेपिमोक्षदा॥
८८॥ततःपरंसमुत्थायोमामभ्यर्च्यप्रयत्नतः प्रणम्यदंडधात्क्षोक्षतांजलिपुटः स्थितः
॥८९॥ततः सर्वेदुपश्यास्तत्रैवांतार्हितंमया तदाप्रभृतिराजापिमदेकरायणोभवत्॥९०॥

मत्पादपद्ममकरंदरसाश्रयाणांमामेवपूज्यतमभिसन्दचितकानांसचोर्यदंसकलदेवग

णांभिवंद्यांप्रेक्ष्यश्चारेत्वमन्यसेव्यमुमासहायं॥३९१॥इतिश्रीशिवरहस्येसप्तमांशेशिवगौरी
संवादेनाम एकविंशोध्यायः॥२१॥पार्वत्युवाच किंचकारसमुत्पालः करुणाकरशंकरात्सर्वव
दसर्वज्ञविस्तरेणाविशेषतः॥१॥सदाशिवः शिवपूजांतंदृष्ट्वासमुत्पालोनंदचंडः अभ्युत्थायाति
यत्नेनकुर्वन्नेवस्थितोर्चन॥२॥नंदर्चनेनयथाप्रीतिस्तथानन्दकपूजने प्रीतिः स्यातान्पुस्पा
स्पमेवानुग्रहात्सदा॥३॥शेवानांपूजनेश्रद्धापथातस्यस्थिताप्रिये तथानान्यस्यसुभगेस
र्वकालेष्वखंडिता॥४॥एकदासनपोदेविगौतमंशैवपुंगव भस्मोद्धूलितसर्वांगंददर्शग
हमागतं॥५॥ततः पुरंसमुत्थायकृतांजलिपुटोन्पः प्रददावासनंरम्यनानारत्नविराजि
तं॥६॥तत्रोपविष्टंशैवेंद्रंगौतमंमुनिसेवितं अर्घ्यपाद्यादिभिःसम्यक्पूजयामाससादरं
॥७॥भस्मनासमलंकृत्यबिल्वपत्रैश्चतंमुनिं उवाचवचनंराजाकृतांजलिपुटः शिवे॥८॥
राजोवाच गौतमाद्यासिधन्योहं भावुकंभाविभूरिशः त्वद्दर्शनांडशैवानांदर्शनंडुर्ल्भ

Indira Gandhi National Centre for the Arts

मंमुने॥९॥माननीयोध्वजातोहंत्वदागमनतोमुने शिवार्चनव्रतस्यास्यनवात्रागमनंभ्रु
वं॥१०॥एतच्चसदनंसर्वंत्वदागमनतोमुने त्वदंघ्रिजलसंसेकाद्दूरियंपावनीकृता॥११॥
त्वत्पादसेवनात्तप्ताः पितरःसागतयः सुराः अतःपरंभविष्यंतिकृत्याणानिचभूरिशः॥१२॥
मापिस्नेहवशादेवत्वयाधात्रागतंमुने अन्यथाशिवभक्तस्यतवात्रागमनंकुतः॥१३॥
वदमोक्षप्रदानधर्मान्चराणांनाविशेषतः पद्मंश्रवणेनापिपापनाशोभविष्यति
॥१४॥शिवउवाच इत्युक्तास्तस्थितोराजातदानीनेवतासंताः पंचलक्षमितादेवि गौतमंद्र
ष्टुमागतः॥१५॥रुद्राक्षैर्मालाभरणान्भस्मोद्धूलितविग्रहान् त्रिपुंड्रचंद्ररेखांकांस्तान्
ददर्शसगौतमः॥१६॥गौतमःशांभवान्दृष्ट्वापुत्रानतिविस्मितः अघधन्योहमस्मीतिव
वंदेसकृतांजलिः॥१७॥दृष्ट्वाहिभूरिभाग्येनशांभवान्बहवोमया शांभवेवेक्षणाज्जाता
धन्यमघतनंदिनं॥१८॥प्रणतंतंमुनिंदृष्ट्वास्वपुत्रेष्वतनोन्नपः कंपमानस्तमुस्थायवचनं

शिवं॥१९॥राजोवाच स्वामिन्नेतेतुमत्पुत्राः शिष्यत्राप्यास्त्ववध्रुवंएनादृशेबुधाणातिस्त्व
यिकार्यानस्त्वर्चया॥२०॥गौतमः ब्राह्मणाः क्षत्रियावैश्याश्शूद्रावान्येपिवान्नरशांभवायदितै
सर्वेपूजनीयः प्रयत्नतः॥२१॥दुर्लभंशंकरस्यैवशांकरस्यापिदर्शनंशांकराः शंकरस्यैवप्रि
याः पारिषदाःखलु॥२२॥अर्चनीयाः प्रयत्नेनचंडालोपिशिवार्चकः किमुतान्येद्विजाणा
घाः शिवाराधनतत्पराः॥२३॥चंडालोप्युत्तमोविप्रादशैवाच्छिवपूजकः शिवार्चनपरा
देन्यः कोवाश्रेयोभविष्यति॥२५॥अशैवोधीतवेदोपिद्विजोनियमयातनां अल्पजोपिशि
वाचारोनद्विजोसेवयातनां॥२५॥शिवाचाररतःशूद्रोप्यसौतमइतिश्रुतः शिवाचारविहीन
स्तुब्रह्मणोप्यधमाधमः॥२६॥शैवाः प्रपातंतः पूज्याः सर्वदासर्वदेहिभिः प्रीतोभवतिगौरीशः
शैवानामेवपूजया॥२७॥अयंतुपरमोधर्मः शैवानांपूजनंनृप शिवपूजैवशैवानां पूजा
नंनात्रसंशयः॥२८॥वर्णानांपरमोधर्मः शांकरस्यार्चनंपरं नातस्मादपरंनस्मादपरोध

मोक्षाणांनांपरमोन्नपा॥२९॥द्विजानांतुविशेषेणशिवस्यैवार्चनंनृप धर्मस्तत्रनसंदेहःस
संसत्यंवदाम्यहं॥३०॥सर्वधर्मोत्तमोधर्मः शंकरस्यैवपूजनं सत्यमेतत्सत्यमेतदितिजाबा
लवादिनः॥३१॥धर्मार्थकाममोक्षास्तुनविनाशंकरार्चनं धर्मार्थाः शिवेनैवदापंतेना
त्रसंशयः॥३२॥यत्फलंप्राप्यतेराजन्महादेवस्यपूजया तत्फलंनैवसंप्राप्यमश्वमेधार्बुदै
रपि॥३३॥यत्फलंप्राप्यतेराजन्महादेवस्यपूजया तत्फलंनैवसंप्राप्यंवाजपेयार्बुदै
रपि॥३४॥यत्फलंप्राप्यतेरान्महादेवस्यपूजया तत्फलंनैवसंप्राप्यमतिरात्रार्बुदैरपि
॥३५॥यत्फलंप्राप्यतेराजन्महादेवस्यपूजया तत्फलंनैवसंप्राप्यमग्निष्टोमार्बुदैरपि॥
३६॥यत्फलंप्राप्यतेराजन्महादेवस्यपूजया तत्फलंनैवसंप्राप्यंराजसूयार्बुदैरपि॥३७॥
स्वर्गएवहिसंप्राप्यःसांगोयागार्बुदैरपि शिवार्चनेनासंप्राप्याधर्मार्थाइतिश्रुतिः
॥३८॥शिवार्चनसदृशः कोवाधर्मोभविष्यति यतः शिवार्चनंश्रौतंसर्वाभीष्टप्रदाय

कं॥३९॥शिवार्चनेनयत्प्राप्यनान्यर्मतःसत्यमेतत्सत्यमेतदितिजाबालवादिनः॥४०॥शि
वपूजाप्रभावस्तुशिवेनज्ञापतेनृप तदन्येरस्मदाद्यैस्तुज्ञापतेनाल्पबुद्धिभिः॥४१॥शिवा
र्चनप्रभावस्तुवेदैश्चबहुधाश्रुतः वेदैरपिनविज्ञातस्तत्प्रभावोनराधिप॥४२॥देवैरपिन
विज्ञातंशंकरार्चनजंफलं तदन्यैरस्मादाद्यैस्तुकथंज्ञेयंनराधिप॥४३॥पुरादेवाःसगंध
र्वाऋषयश्चमुमुक्षवः हिमवद्गिरिमाश्रित्यास्थितास्तेत्वबभूवुः॥४४॥तदाविघ्नस्तु
त्वासोनंमत्वापोब्रह्मवादिनः राजन्प्रणाम्यपप्रच्छुर्विनयान्नतकंधराः॥४५॥ऋषयऊचुः च
र्मार्थकाममोक्षाणांमधियोहंमनीश्वराः मत्रःपरतरोनास्तीत्यब्रवीन्मोहतोऽकःकर्ताकश्च
तत्प्रदः एतत्सर्वंविशेषेणवदमाधवसादरं॥४६॥विघ्नः धर्मार्थकाममोक्षाणांहरिः॥४७॥
इतितद्वचनंश्रुत्वाबभाषेवचनंविधिः धर्मार्थकाममोक्षाणांहंकर्तेतिमद्व्रते॥४८॥इति
इतितद्वचनंश्रुत्वातमुचुर्मुनिपुंगवाः विघ्नंचमोहितंदृष्ट्वाश्रीमहादेवमायया॥४९॥विधे

Indira Gandhi National
Centre for the Arts

विधेविधत्तेऽवदत्यन्यत्वयान्यत्समुदीर्यते एवंसतिकथंहेयंतत्वमस्माभिरिहरौः॥५०॥सर्वैकवाक्य
तायत्नतत्वविनिश्चयः नान्यत्रसर्वथाब्रह्मन्तत्तत्वस्यनिर्णयः॥५१॥वाक्यमेतादृगुद्धार्यप्रतिपाद
कमीदृशं तत्वनिर्णायकंमुनाकथंतद्वदाधुना॥५२॥इतितद्वचनंश्रुत्वाब्रह्मोवाचसनातनः ब
भाषेवचनंभस्मशिवमायाविमोहितः॥५३॥ब्रह्मोवाच मन्मायामोहितोविष्णुस्तथावदतिसत्व
रंअतएवहितद्वाक्यंमप्रमाणंनसंशयः॥५४॥सहाहंसर्वलोकानांपालकश्चनसंशयःसहा
रकश्चलोकानांसत्यमेवोच्यतेमया॥५५॥नास्तिमत्सदृशोदेवस्तातः पूज्योहमन्वहं धर्मा
र्थकाममोक्षाणांप्रदातात्वाहमेवहि॥५६॥इतितद्वचनंश्रुत्वामुनयोविस्मयंगताः प्रमाणत्वेन
तेवेदानेवततःपरं॥५७॥ततोवेदाःसमागत्यसर्वेमुनिधराःस्थिताः संतोषंपरमंप्रापुर्वे
दानदृष्ट्वामुनीश्वराः॥५८॥नत्वावेदास्ततःसर्वेमुनयोब्रह्मवादिनः कोवापूज्यतमोदेवस्तंव
दंत्वितिसादरं॥५९॥प्रज्यात्यपावकंसम्यक्ऋग्वेदः प्रथमंततः सद्यंभूजसमुद्भूतत्वा

माहनपोत्तमा॥६०॥ऋग्वेदउवाचसोमस्त्रिनेत्रोजानातामतीनांदिवःपथिब्राश्चतथानिलाग्नेः
॥६१॥सर्वेद्रयोरश्चिमरुद्गणानांसोमस्त्रिनेत्रोजनितोतविष्णोः॥६२॥तस्मात्सविष्णोर्जनितामहेशाः
सर्वप्रयत्नैःसततंभवाब्दिःसेव्यःससोमःसचमुक्तिदातासएवमोक्षाधिपतिश्चसत्यं॥६३॥तस्मान्म
हेशादपरंनजानेमुक्त्यर्थिसेव्यंसुरवंदवंद्यं तस्मान्महेशंशरणंव्रजध्वंसत्यंपुनःसत्यमिदंत्रिसत्यं
॥६४॥स्वर्गादिफलप्रदाताम्हेश्वरान्यस्तुनसर्वथैव तस्मान्महेशंशरणं व्रजध्वंसत्यंपुनःसत्य
मिदंत्रिसत्यं॥६५॥आसंसारसमुद्रमग्नानसर्वथातेशिवभक्तिभाजः तस्मात०॥६६॥मोक्षप्रदःको
पिनशंकरान्यः सर्वोत्तमःशंकरएवसत्यं तस्मात०॥६७॥यः केवलंशंकरमेवनित्यंसमर्चयिष्यतिनि
रंसधन्यः तस्मात०॥६८॥देवेषुसर्वेष्वपिदेवपूज्योदेवोमहादेवइतिप्रसिद्धः तस्मात०॥६९॥भजंति
देवेशमनन्यभाजोमुक्त्यर्थमेकंशिवमेवसंतं तस्मात०॥७०॥नशंकरान्योमुनिमोक्षहेतुर्नशंकरान्यः
सुरमोक्षहेतुः तस्मात०॥७१॥नशंकरान्यःकरुणानिधानोनशंकरान्योखिलवेदवेद्यः तस्मात०॥७२॥

Indira Gandhi National Centre for the Arts

येपजपंत्यन्वहमंबिकेशंतेगर्भभाजोनभवंतिमर्त्याः तस्मात०॥७३॥येषामन्यंचरमंसारारं
तेषांशिवेभक्तिरुदेतिनित्यं तस्मा०॥७४॥यन्मायया मोहितोयन्मायया विभ्रमरय
चमोहितः तमेवभस्मांकितसर्वगात्राभजध्वमघघ्नमतित्रिनेत्रं॥७५॥संसारपाशोघदिना
शहेतुंगुणोघसेतुंमुनिमुक्तिहेतुं श्रीपार्वतीनाथमनन्यभाजोभजध्वमघघ्नमतित्रिनेत्रं॥७६॥
अमेयमाद्यंतविहीनमेकंनिरंजनंनिष्कलमादिदेवं श्रीपार्वतीनाथ०॥७७॥महेश्वरंसाम
नाथंवेदांतवेद्यंत्रिदशैकवंद्यं श्रीपार्वता०॥७८॥विश्वाधिकंविश्वविभूतिहेतुंश्री
[illegible] रुद्रमन्याप्रतिमंसरेशं श्रीपार्वता०॥७९॥यसादपन्नार्त्र[illegible]
लभ्योमोक्षःसमस्तैरपिदुर्लभोपि श्रीपार्वतीनाथ०॥८०॥यन्नामसंकीर्तनमात्रयत्नादसंतिरोधा
विधिविघ्नवंघाः तस्मान्महेशादधिकोनदेवः सत्यंपुनःसत्यमिदंत्रिसत्यं॥८१॥भजंतिमोहेनरो
वान्यमन्येसदामहापातकसंगदुष्टाःभजंतिधन्याःशिवमेकमीशंशिवंभवंतोपिभजंतुविप्राः॥

॥८२॥विश्वाधिकः शंकरएवसत्यंसत्यंपुनःसत्यमिदंत्रिसत्यं अत्रायमेवञ्चलनोहिसा
क्षीमयाद्विज्ञानान्मुच्यतेच॥८३॥विश्वधिकंरुद्रमुपेद्रवंवयंभजामःसततंवरेण्यं रुद्रस्य
विश्वाधिकतांवदंतिसर्वेपिवेदाःसततंद्विजेंद्राः उक्तार्थसत्यार्थममुंपहानलंहस्तोधरिंध्यानिसरा
पोत्रअत्राग्निदिव्येनमंत्रमर्थंरुद्राधिकत्वंखलुसाधयामि॥८५॥नवाग्निदिव्यादधिकंहिकि[illegible]
यंघस्तितत्सत्यवाणिदिव्यंरुद्राधिकत्वंप्रतिपादकत्वमप्यन्यथास्यात्कथमत्रविप्राः[illegible]
ब्रवीमिध्रुवंमघसत्यंसत्यंब्रवीमिध्रुवंमघसत्यं रुद्राधिकत्वंप्रतिपादयामिदेवोनरुद्रादधिकोस्ति
कोपि॥८७॥रुद्रस्यपुत्रः सहरिःसपुत्रास्पितुः कथंस्यादधिकः सपुत्रः पितुः कथंस्यादधिकः च
पुत्रपुत्रः पुतुः सेवकएवसत्य॥८८॥सोमस्त्रिनेत्रोजनितोतविष्णोरित्युक्तमादावधानपर्वतदेवस
त्यंहितदेवसत्यंतदेवसत्यंतदेवसत्यंहितदेवसत्यं॥८९॥ब्रह्मेंद्रचंद्रार्कयमानिलाद्याः श्रीपार्वतीना
थकभक्तभक्ताः सत्यंपुनः सत्यमिदंत्रिसत्यंसत्यंपुनः सत्यमिदंत्रिसत्यं॥९०॥पन्नुवेदउवाच अ

Indira Gandhi National Centre for the Arts

णोरणीयान्महतो महीयानात्मागुहायांनिहितोऽस्यजंतोः तोः तमक्रतुंपश्यतिवीत
शोकोधातुःप्रसादान्महिमानमीशं॥९१॥क्रतुसंपरंब्रह्मपुरुषंकृष्णपिंगलंऊर्ध्वरेतंविरूपा
क्षंविश्वरूपंवदाम्यहं॥९२॥विश्वाधिकोरुद्रएवसमहाऋषिरुपधात् सएवसर्वदेवात्मासए
वम्प्रसत्तमः॥९३॥हिरण्यबाहुमीशानंहिरण्यपतिमव्ययं भस्मध्वाललाटेभजध्वंवमध्व
जं॥९४॥अंबिकापतिमव्यक्तमुमापतिमनामयं भस्मध्वा०॥९५॥रुद्रंपशुपतिंस्थाणुं
माघंतरहितंशिवं भस्मध्वा०॥९६॥अनंतमव्रतीकारमपराद्धंतेनसं भस्मध्वा०॥९७॥
आनंदमयमीशानमद्वैतंनिष्कलंप्रभुं भस्मध्वा०॥९८॥निर्गुणांनिर्मलंशुद्धंनिरवद्यंनि
रंजनं भस्मध्वा०॥९९॥शांतंप्रसन्नवदनमुमास्लिष्टविग्रहं भस्मध्वा०॥१००॥अभ
यप्रदमीशानंसर्वाशास्पंसुराधिपं भस्म०॥१॥सोमरुद्रांतान्नमश्चमरुतांरांगमीश्वरं भ
स्म०॥२॥उग्रंभीमंभवंशर्वंभक्तसर्वंभक्तसर्वप्रदंहरं भस्म०॥३॥महेशंशंकरंशंभुंशर

णागतवत्सलं भस्म०॥४॥भगवंतमुमाकांतमनंतमयराजितं भस्म०॥५॥विश्वेश्वरंमहादे
वंत्रिपंचकंतंशिवं भस्म०॥६॥त्रिपुरांतकमाराध्यमाराधकवरप्रदं भस्म०॥७॥त्रिकाला
ग्निकालंसाकारंनिराकारंसमंगलं॥८॥भस्म कालाग्निरुद्रंकामारिकालकूटविषादनं भस्म०
॥९॥नीलकंठंभस्मगुंठंसर्वेश्वरमकल्मषं भस्म०॥१०॥सदाशिवंशिवाकारंश्रीमहादेवमा
धिकं भस्म०॥११॥ईशानंसर्वविद्यानांसर्वविद्याप्रदंसदा भस्म०॥१२॥ईश्वरंसर्वभूतानांब्रह्मणः
धिपतिमक्षयं भस्म०॥१३॥ब्रह्मणोधिपतिंदेवंपरंब्रह्मसदाशिवं भस्म०॥१४॥विश्वतश्च
क्षुषंदेवंविश्वतोमुखमव्ययं भस्म०॥१५॥विश्वतोबाहुमव्यक्तंविश्वतःपादमक्षरं भस्म०॥
१६॥समस्तदेहंउमाशास्पंसोमंसोमार्द्धधरं भस्मध्वाललाटेभजध्वंवमध्वंज॥१७॥
भजध्वंश्रीमहादेवंचतुर्वर्गफलंप्रदं महादेवंपरंमंत्रंमाभजध्वंमुनीश्वराः॥१८॥महा
देवंविहायान्यंमंत्रंयोर्चयिष्यतिसविहोयाम्यतंमरवोरेतः पिबंतिसर्वथा॥१९॥नास्ति

Indira Gandhi National
Centre for the Arts

पूज्यतमोदेवः शिवान्यः सर्वथाद्विजाः सत्यमेतत्सत्यमेतत्सत्यमेतन्नसंशय॥२०॥शि
वात्पूज्यतमादन्योनास्तिपूज्यतमोध्रुवं सत्यमे०॥२१॥शिवएवाखिलाराध्यःशिवएवविलेप्य
ःसत्यमे॥२२॥शिवेरावामराधीशाःशिवोदेवशिवामाताःसत्तमे॥२३॥शिवःसर्वोत्तमोनान्यविष्णु
ब्रह्मादिवंदितः सत्यमे०॥२४॥देवेषुनाधिकःकोपिशिवाद्देवोत्तमोत्तमात् सत्यमे०॥२५॥शि
वस्यभृत्याःसर्वेपिविष्णुब्रह्मादयःसुराःसत्यमे०॥२६॥सुरान्यःश्रीमहादेवादधिकोक्तीतियो
वदेत् सचंडालःसत्यमेतत्समहापातकाश्रयः॥२७॥यश्चंडालोमपयश्चाजारश्चभविष्यति
सशिवादधिकोदेवस्तिष्ठतीतिवदिष्यति॥२८॥विश्वाधिकोरुद्रएवेत्युक्तमादौमयाद्विजाः
सदुक्तंतथ्येवेतिदिव्यंचकरवाण्यहं॥२९॥अग्निदिव्यादरंदिव्यंनास्त्येवेतिविनिश्चितं नतो
ग्निदिव्यमथेवकरिष्यामुक्तसिद्धये॥३०॥विश्वाधिकोरुद्रएवेत्युक्तोक्तैरवसिद्धये तत्यतेत
कटाहंवाप्रवेक्ष्यामिनसंशयः॥३१॥विश्वाधिकोरुद्रएवसत्यमेतन्मुनीश्वराःसत्यमेतत्सु

नःसत्यमुद्धृत्यभुजमुच्यते॥३२॥हरिंहरंतंश्रीरुद्रंविश्वस्येशानमव्ययं भजध्वंमुनयोनिरं
तरान्यामरंजनं॥३३॥योन्याराधनसंसक्तः शंकरंनार्चयिष्यति नतस्मादधिकःपापीसचंडालो
नसंशयः॥३४॥जाग्रतिश्रीमहादेवेधर्मार्थफलदातरि विहायान्यंनमरकः समर्चयितुमिच्छति
॥३५॥कृतानियेनपापानि विविधानिपुरासदा तेनत्रिलोचनादन्यः पूज्यतेकश्चनामरः॥३६॥नित्यं
त्रिलोचनादन्यंसुरंयः पूजयिष्यति सलोचनोपिविप्रेंद्राः सविलोचनएवहि॥३७॥दुर्बुद्धयः
पूजयिष्यंतिशिवान्यममरंद्विजाःसुधियः पूजयिष्यंतिशिवंकेवलमव्ययं॥३८॥शिवान्यंपूजयि
ष्यंतिशिवमायाविमोहिताः शिवमायाविनिर्मुक्ताः शिवमेवार्चयंतिहि॥३९॥शिवान्यंपूजयिष्यंति
येतेवैशिवचिंतकाःसत्यमेतत्पुनः सत्यमुद्धृत्यभुजमुच्यते॥४०॥कृतेपातकिनंदुष्टंनशिवान्यस्य
पूजकःसत्यमेतत्पुनःसत्यमुद्धृत्यभुजमुच्यते॥४१॥शिवान्यमशिवंज्ञात्वातंशिवंयोर्चयिष्यति त
स्याशिवंमहादिग्धंमिहामुत्रापिसर्वथा॥४२॥शिवार्चकाःप्राप्नुवंतिशिवंचैवद्विजोत्तमाः अशिव
वंप्राप्नुवंत्यन्येत्वशिवाराधकाः सदा॥४३॥इतिमत्वाभवांस्तूर्णमभयानीरमंप्रभुं भगवंतम

Indira Gandhi National
Centre for the Arts

वारांतिं भजध्वमभयप्रदं॥४४॥सामवेदः नमोहमायरुद्रायमोहमायनमोनमः मांईहमापश्युङ्का
पंधन्वनेचनमोनमः॥४५॥नमोनमस्तापस्तापसापतापसेशापवेनमः नयोनमोविशोलायश्रीपु
नर्वसेनमः॥४६॥योज्ययोर्म्यापसौम्यायशांम्यायपरमास्त्रने नमः शिवायपरायसुपरायनमोनमः॥४७॥
महापारायपार्यायपारदायनमोनमः सुन्वतेपारावंदायपुरुषायनमोनमः॥४८॥नमः सुपुरुषायप
यंश्रीमहापुरुषायच नमोन्तायान्नपतयेराकाक्षायपामिताक्षिणे॥४९॥नमोवयन्नदायापिरुद्रायापा
मितवर्चसे नमस्तिरस्देभ्यः स्थिरायस्थिरधन्वने॥५०॥नमःप्रतिपादायापिनमः पटरिणेसदा नम
स्त्रिपवकायापिनमस्तस्मैकपर्दिने॥५१॥नमोव्रात्नाधिपतयेश्रीविष्णुपतयेनमः नमोखिलाधिपतयेवि
रूपाक्षायमन्यवे॥५२॥एकएवमहारुद्रःसर्वदेवोत्तमोत्तमः नतस्मादधिकः कोपिसत्यमेवोच्यतेमया॥५३
मयस्मादधिकोदेवोदेवदेवान्महेश्वरात् सएवसर्वदासेव्यःश्रीरुद्रोविश्वशासकः॥५४॥श्रीरुद्रादधि
कः कोवाभविष्यस्यधिकः सुरः विष्णुवासुराः सर्वेशंकरस्यैवकिंकराः॥५५॥ईद्रोपेंद्रब्रह्मतयःसर्वेशं

करकिंकराः तदन्यःशंकरःसोयंशंकरोदेवतोत्तमः॥५६॥शिवमेवाधिकंमन्येदेवेदेवोत्तमंप्रभुं
देवोत्तमान्महादेवात्कोपिनास्त्यधिकः सुरः॥५७॥देवोत्तमोमहादेवसर्वदेवनमस्कृतः सत्यमेतत्पुनः
सत्यंसत्यमेतन्नसंशयः॥५८॥शिवः कल्याणनिलयः सर्वदेवशिखामणिः सत्यमेतत्॥५९॥शिवप्र
भुः श्रीमान्विष्णुब्रह्मादिपूजितः सत्यमेतत्०॥६०॥विष्णुब्रह्मादिजनकः शिवएवसुरोत्तमः सत्य
मेतत्०॥६१॥विष्णुनेत्रार्चितारक्तदिव्याश्रीचरणः शिवः सत्यमेतत्०॥६२॥नशिवादधिकोदेवः श्रु
तिः श्रोतव्यएववा सत्यमेतत्॥६३॥शिवान्यस्त्वशिवस्तस्मादशिवोनाधिकः शिवात् सत्यमेतत्
॥६४॥शिवान्योप्यधिकोक्तीतिजावजल्पतिवादिध्याति सत्यमेतत्०॥६५॥देवोत्तमोमहादेवः
सर्वदेवोत्तमोत्तमः सत्यमेतत्०॥६६॥सर्ववेदोक्तसर्वेधः शिवएवद्विजोत्तमा सत्यमेतत्०॥६७॥
स्वर्गापवर्गदोविप्राः शिवएवेमन्महे० सत्यमेतत्०॥६८॥शिवएवसदासेव्योभुक्तिमुक्तिफलप्रदः
भिः सत्यमेतत्०॥६९॥सृष्टिस्थितिविनाशानांशिवएवहिबकारणं सत्य०॥७०॥बहवोवि

Indira Gandhi National Centre for the Arts

ह्मऋषवः पूर्वंलीलयायेननाशिताः तेनसोमेनकस्मैसंः कस्मादधिकोथवा॥७१॥बहवो
विधयः पूर्वंयेनदेवेननाशिता० तेन०॥७२॥बहवोहरयः पूर्वंयेनदेवेननाशिताः तेन०॥७३॥
बहवोनवः पूर्वंयेनदेवेननाशिताः तेन०॥७४॥बहवोवायवः पूर्वंयेनदेवेननाशिताः तेन०
॥७५॥बहवोध्वंगनयः पूर्वंयेनदेवेननाशिताः तेन०॥७६॥बहवोपिमापूर्वंयेनदेवेनना
शिताः तेनः॥७७॥बहवोभुजगाः पूर्वंयेनदेवेननाशिता तेम०॥७८॥बहवोगिरयः
पूर्वंयेनदेवेननाशिताः तेन०॥७९॥बहवः सागराः पूर्वंयेनदेवेननाशिताः तेनसोम.
स्कल्पः कस्मादधिकोथवा॥८०॥यदाज्ञाग्राहकोविष्णुर्विधिरीदृश्वसर्वदा तस्मात्सदा
शिवादन्यः कः पूज्योहोभविष्यति॥८१॥यस्मैमयानमस्काराःकृताः पूर्वंमयापराः सएव
सर्वदेवेशः सत्यंसत्यंनसंशयः॥८२॥सविष्णुब्रह्मरुद्राधीराःसविघ्नादिपितामहः सएवपूज्यः
सर्वैर्वासविघ्नादिपितायतः॥८३॥शिवएवाखिलाराध्यः सत्यंसत्यंमुनीश्वराः सत्यंसत्यं

पुनःसत्यमुद्धृत्यभुजमुच्यते॥८४॥अग्निदिव्यंकटिव्यामिमदुक्तार्थस्यसिद्धये सत्यं
सत्यंपुनःसत्यमुद्धृत्यभुजमुच्यते॥८५॥अथर्वणाः ॐकारःप्रणवोज्ञेयः सर्वव्यापीसएव
वहि सर्वव्यातियोज्ञेयः सोनंतइतिमन्महे॥८६॥योनंतइतिविज्ञेयःसर्वस्यात्तारमिति
मन्यते यत्तारमितिविज्ञेयंतत्सूक्ष्मइतिगीयते॥८७॥यत्सूक्ष्मइतिविज्ञेयंतच्छुक्ल
मितिमन्यतां यच्छुक्लमितिविज्ञेयंतद्विचैतन्यमेवहि॥८८॥यदेचैतन्यंतदेवैकंपरं
ब्रह्मेतिमन्यतां सएकःसर्वमूलात्मासएकोरुद्रउच्यते॥८९॥सईशानःसभग
वान्समहेश्वरउच्यते समहादेवएवेशःसमहान्विष्णुरुदितः॥९०॥द्वितीयोनयतोरुद्रात्ततएकः
सउच्यते ब्रह्मविष्ण्वादिकान्लोकान्ससृजतिसंहरतिच॥९१॥स्वयंनित्योविभुश्चैकःसए
कोरुद्रउच्यते रुद्रंस्त्रियंवकोनान्योरुद्रइत्यभिधीयते॥९२॥सर्वाञ्छोकानीशानोमिरीशतेयो
ढशक्तिभिःसर्वंव्यापत्रिनयनस्तस्मादीशानउच्यते॥९३॥यःसर्वान्सभावानीक्षतेसज्ञानम

Indira Gandhi National
Centre for the Arts

शेषतः स्वविरीक्षयतेयोगंतस्मात्समर्गवान् शिवः ॥ ९४ ॥ यः सर्वलोकान्संभक्षः संभक्षयतिसं
ततंसृजत्यधिसंवातितस्मात्सहि महेश्वरः ॥ ९५ ॥ सयोभवान् परित्यज्यज्ञानयोगेसगोचरे त्रैश्च
र्यंमहतिस्वछेमहादेवोमहीयते ॥ ९६ ॥ शिवोयंविश्वतश्चक्षुशिवोयंविश्वतोमुखः शिवोर्यवि
श्वतोबाहुर्विश्वतस्यान्महेश्वरः ॥ ९७ ॥ रुद्रोयमग्नावुदकेचौषधीषुवनस्पतिष्वपि रुद्रोयंसर्वभूतेषु
भवनेषुविवर्त्तते ॥ ९८ ॥ उपास्योयमुपास्योयंरुद्र एवानिशंशुधैः सयंपुनः सयंमुहुरभ्यंजमु
च्यते ॥ ९९ ॥ मुनयः शिवएवैकोध्येयोनित्यंशिवंकरः सर्वमन्यत्परित्यज्यध्यायमानाःशिवंनचा २०० ॥
यःसर्वैश्वर्यसंपन्नः शर्वःसर्वेश्वरोहिसः अतःसर्वंपरित्यज्यपूजयंतुमहेश्वरं ॥ १ ॥ सशिवः ॥
सर्वदुःखेभ्यः संतारयतितारकः ततःसर्वंपरित्यज्यपूजयंतुमहेश्वरं ॥ २ ॥ सर्वोपास्यःसर्व
ज्ञःसर्वेषामीश्वरःशिवः ततःसर्व० ॥ ३ ॥ सःसर्वात्मामहादेवःसृजत्यवतिहंतिचततः सर्वः ॥
४ ॥ विष्णुःस्वनेत्रपद्मेनपूजयामासशंकरं ततः सर्व० ॥ ५ ॥ ब्रह्मेंद्रमुखाः सर्वेपूजयंति

महेश्वरं ततः सर्व० ॥ ६ ॥ स्वतंत्रः स्वतंत्रात्माशिवोमोक्षप्रदायकः ततः ॥ ७ ॥ सर्वेषामपिसंपूज्यः
शिवोदेवशिखामणिः ततः ॥ ८ ॥ सर्वदेवोत्तमात्सोवादन्यः पूज्योनसर्वथा तत० ॥ ९ ॥ श्रीरुद्र एव
संपूज्यः परित्यज्यान्यदन्यह सत्यंसत्यंपुनः सत्यंपुनः सत्यमुद्धृत्यभुजमुच्यते ॥ १० ॥ श्रीरुद्र एव
संपूज्यः इत्युक्तंस्वार्थसिद्धये प्रज्वलत्तमंवहिंहस्ताभ्यांसुवहाम्यहं ॥ ११ ॥ श्रीरुद्र एवसंपूज्योमु
मुक्षुभिरहर्निशं मुक्षवोमनसावाचाकर्मणाश्चातियत्नतः ॥ १२ ॥ श्रीरुद्र एवसंपूज्यइत्येवंनवदंति
ये तेसर्वेजानजाड्येयाः सत्यमेवोच्यतेमया ॥ १३ ॥ पूजयध्वंमहादेवंमाधवेंद्रादिपूजितं तदन्योक्ष
दोनास्तिसत्यंसत्यंनसंशयः ॥ १४ ॥ गौतमऊचुः इतिमन्निधरेवेदैरुक्तानिवचनानिते श्रुत्वासेतोष
मापन्नामुनयः शौनकादयः ॥ १५ ॥ तदानीमभवद्राजन्नशरीरवाक् तामेवचाचवक्ष्यामि
शृणुपापविनाशनीं ॥ १६ ॥ अशरीरवाक् मुनयः सत्यमेवोक्तंवेदैः सर्वैरपिध्रुवं शिवान्योनाधिकः
कोपिसत्यंसत्यंनसंशयः ॥ १७ ॥ शिवादधिकोनास्तिशिवेनसदृशोथवा सत्यंसत्यंपुनः सत्यमुद्धृत्य

Indira Gandhi National
Centre for the Arts

मुजमुच्यते॥१८॥सर्वोत्तमोमहादेवः सर्वदेवशिरोमणिः सत्यमेतन्मुनः सत्यंसत्यमेतन्मु
नीश्वराः॥१९॥सर्वैः पूज्योमहादेवस्तस्यपूजैनोविद्यते तस्मात्पूज्योमहादेवः सर्वेषामपिस
र्वदा॥२०॥तत्पादपूजनाद्विप्रमुक्तिर्मुक्तिप्रापकर्मदंतमेवदेवदेवंदेवेशंपूजयध्वंसदाशि
वं॥२१॥भजध्वंशिवज्ञानायमनोवाक्कायकर्मभिः लभध्वंदुर्लभंदेवंरक्षरक्षवदोदाद्वि
जाः॥२२॥निधनेत्यादिभिर्मंत्रैः पूजयध्वंमहेश्वरं परित्यज्यान्यदेवानामर्चनंबुद्धिपूर्व
कं॥२३॥अग्निरित्यादिभिर्मंत्रैर्विभज्यांगानिभस्मना भजध्वमप्रमादेनवृषभध्वज
मव्ययं॥२४॥शिवेभवेतियत्नेनपूजयध्वंमुनीश्वराः अन्यथानरकावासोभविष्यतिन
संशयः॥२५॥नयमस्पृक्पापविप्रास्ततोन्वहमुमापतिं पूजयध्वंतियत्नेनबिल्वपत्रादि
भिःसदा॥२६॥शिवमायापरिक्रांताभविष्यंतियदाजनाः तदाशिवान्यदेवानांकरिष्यं

तिहिपूजनं॥२७॥शिवमायापरिक्रांतानयावत्तावदन्वहं पूजयध्वंप्रयत्नेनशिव
मेवसुराधिपं॥२८॥शिवान्यदेवानाराध्यनराः संसारभाजनाः भ्रमाभ्रमान्नसंसारात्प्र
च्यवंतिदुर्भगाः॥२९॥संसारतरणोपायः शंकरस्यैवपूजनं नान्यस्मादपरंविप्राःस
यंसर्वंनसंशयः॥३०॥यःशंकरंदेवदेवंनाभ्यर्चयतिसर्वदा सदुर्भगइतिविज्ञेयः सत्यंमु
नीश्वराः॥३१॥भगवंतमुमाकांतंभगवंतोभजंतिताः भवंतोपिभजंत्वीशमनिशंशिवशंक
रं॥३२॥यन्मोपयामोहितोयंविष्णुब्रह्मापिपद्मिनीः तमेवदेवदेवेशंभजध्वंवृषभध्वजं
॥३३॥प्राप्नुवंतियदादुःखंब्रह्मविष्ण्वादयःसुराःतदाभवंतितेसर्वेशिवमायाविमोहिताः॥३४॥
नयेभवंतिविप्रेंद्राःशिवमायाविमोहिताः तेसर्वदासुखंप्राप्यसंतिसंसारिनश्चयं॥३५॥अर्थगृहेधन
मस्तिनपश्यंतियथातथा नपश्यंतिशिवंमूढाः शिवमायाविमोहिताः॥३६॥जरामृत्युंवर्तमानंनपश्यं
तियथातथा नप०॥३७॥समुद्रस्थंनपश्यंतिश्रेष्ठंतीरंयथातथा नप०॥३८॥तोयंवर्तंनपश्यंतिभा

Indira Gandhi National
Centre for the Arts

नुमंतंयथातथानपु०॥३८॥ऊर्ध्वमध्यगतंक्षीरंनपश्यंतियथातथा नपु०॥३९॥मुकुटंस्वोत्तमां
गस्थंनपश्यंतियथातथा नपु०॥४०॥सर्वव्यापीसर्वरूपःशिवः सर्वत्रतिष्ठति तथापितन्नपश्यंति
शिवमयाविमोहिताः॥४१॥शिवान्यान्पूजयंत्यज्ञाः शिवमयाविमोहिताःसंसारेयातयेतान्शिवा
मयादुरत्यया॥४२॥पूज्योहमित्यंविद्मुः शिवमायाविमोहितः वदंत्यज्ञोनजानातिशिवंस्वोत्पत्ति
कारणं॥४३॥ब्रह्माप्येवंनजानातिशिवंस्वोत्पत्तिकारणं यथाविद्मुक्तयाब्रह्माशिवमायाविमोहि
तः॥४४॥शिवमायामोहितानांविद्मुर्वादीनांदुरात्मनां स्वेष्वेवपूज्यताबुद्धिर्जायतेनिरयप्रदा॥४५॥
जायतिश्रीमहादेवेनिःपूज्यतमेद्विजाः यः पूज्यमन्यंमन्यतेसचंडालएवहि॥४६॥नित्यः पू
ज्यतमोदेवः श्रीमहादेवहि तस्मात्पूज्यतमोनान्योदेवोधन्येऽवाद्विजाः॥४७॥महेशावंचितंतेपू
जनीयोमुनीविभिःसस्यमेतत्समेतदुद्धृत्यभुजमुच्यते॥४८॥महेशान्नापरोदेवः सेव्योमुक्त्यो
र्थिभिर्द्विजाः महेशादपरः कोवामुक्तिदानाभविष्यति॥५०॥गौतमः एवमानंददाराजन्श्रुता

तैरशरीरवाक् संतोषंपरमप्रापुर्मुनयस्ततः पस्तेततः परं॥५१॥शिवमायाविनिर्मुक्तोविद्मु
श्चसदनंतरं ऋषीन्देवान्सुरस्कृत्यबभाषेचेतनंतदा॥५२॥विद्मुरुवाच शिवमायामोहितेनविद्मुनैव
मयापुरा पूज्योहं मुक्तिदानाचेत्युक्तमज्ञाननोद्विजाः॥५३॥उन्मत्तवत्प्रलपितंमयापूर्वं मुनीश्वराः
तद्विस्मरंतुमुनयः क्षमध्वंसत्तमाधितं॥५४॥नस्ताश्चसन्निपातेनप्रलपंतियथेच्छया तथा
प्रलापोपकृतोमोहितेनोमायया॥५५॥यदामाहेश्वरीमायामोहयिष्यतिमोतदा मयाप्रलापःकि
यतेनान्यथामुनिपुंगवाः॥५६॥यंयंमाहेश्वरीमायामोहयिष्यतिमोहिनी तंतंमत्तंविजानीथाःप्र
लपंतंपथेऽवया॥५७॥देवदेवोत्तमःसांबोमुक्त्यर्थिभिरहर्निशं पूजनीयः प्रयत्नेनसत्संसत्संनस
रायः॥५८॥जनकोममगौरीशोभवानीजननीमम ततस्तौपितरौनित्योममपूज्यतमौशिवौ॥५९॥
जनकः सर्वदेवानांजनयामासशिवा ततः शिवोददौमत्यंविद्मुंमुनिपुंगवाः॥६०॥सुदर्श
नाभिधंचक्रंवैकुंठंचददौशिवः लक्ष्मीमपिददौमत्यंनित्यंमानंदवर्द्धनी॥६१॥मयामन्नेत्रपद्मे

Indira Gandhi National
Centre for the Arts

नपूजितेशिवपादुके शिवापादुकपोरेवु पूजनंक्रियतेमया॥६२॥महतामममाग्येनमहादेवः
कृपानिधिः मुक्तिदोमकृतापूजास्वीकरोतिप्रतिक्षणं॥६३॥ममाराध्यतमोदेवः शिवएवमुनी
श्वराः ततएवमयानित्यंशिवएवहिपूज्यते॥६४॥शिवएवममाराध्यशिवएवधनंमम शिव
ममस्वामीशिवएवप्रभुमम॥६५॥शिवएवहिनिक्षेपः शिवएवहिजीवनं शिवएवहिकल्पाणं
शिवएवहिभूषणं॥६६॥शिवएवममाशास्पः शिवएवहिजीवनं शिवएवममाभूर्त्यः शिवए
वममसेवदः॥६७॥शृणोम्यहंशिवकथाः शिवमेवार्चयाम्यहं पश्यामिशिवमेवाहं शिवमेववदा
म्यहं॥६८॥यमाऊः श्रीमहादेवंदेवासमहमीश्वरं पूजयाम्यतियत्नेनप्रणामामिचसर्वदा॥
६९॥यमाऊः पार्वतीनाथंदेवासमहमीश्वरं पूजयाम्यतियत्नेनप्रणामामिचसर्वदा॥७०॥
यमाऊः श्रीविरूपाक्षंहमीश्वरं पूज०॥७१॥यमाऊर्जगतामीशंवेदासमहमीश्वरं पूज०
॥७२॥यमाऊः परमेशा० नंवेदासमहमीवेदाममीश्वरं पूज०॥७३॥यमाऊःरोभ्रमनघंवेदास

महमीश्वयमाऊश्चंद्रशिरसंचेदासमहमीश्वरं पूज०॥७४॥यमाऊस्तारकंब्रह्मवेदासमहमीश्वरं
पूज०॥७६॥यमाऊः सर्वकर्तारंवेदासमहमीश्वरं पूज०॥७७॥यमाऊर्निष्प्रतिद्वंद्वंवेदासमहमीश्व
रं पूज०॥७८॥यमाऊर्यज्ञफलदंवेदासमहमीश्वरं पूज०॥७९॥यमाऊमोक्षदातारंवेदासमहमी
श्वरं पूज०॥८०॥यमाऊर्यज्ञानदातारंवेदासमहमीश्वरं पूज०॥८१॥यमाऊः शांतिदातारंवेदासमह
मीश्वरं पूज०॥८१॥यमाऊः श्रीमहेशानंवेदासमहमीश्वरं पूज०॥८३॥यमाऊः रोंकारंनित्यंवेदास
महमीश्वरं पूज०॥८४॥यमाऊः शिवमद्वैतंवेदासमहमीश्वरं॥पूज०॥८७॥यमाऊर्निगुणंशांतं
वेदासमहमीश्वरं पूज०॥८६॥यमाऊर्निश्चिंपशुद्वंवेदासमहमीश्वरं पूज०॥८७॥यमाऊर्नि
द्वंद्वंनित्यंवेदासमहमीश्वरं पूज०॥८८॥यमाऊस्त्रिमनघंवेदासमहमीश्वरं प्र०॥८९॥यमाऊर्मृ
त्युंहतारंवेदासमहमीश्वरं पूज०॥९०॥चोडुर्यशिवमद्वैतंनमजसनिशंतुये तेसर्वेपिडरासा

Indira Gandhi National Centre for the Arts

नः ससंससंनसंशयः॥९॥पुनःपुनर्विचार्येदमुच्यतेसादरंमायाशिवएवान्वहं पूज्योब्रह्म॥
धैर्विधानतः॥९२॥गौतमऊवाच ईतिविष्णुवचः श्रुत्वातेसर्वेमुनयोनष्संतोषपरंप्राघुस्तदाल
क्ष्यनाइवं॥९३॥ब्रह्मोवाच शिवमायामोहितेनब्रह्मणोवंपुरामया पूज्योहमुक्तिदाताचेत्युक्तंमयान
तोद्विजा॥९४॥ब्रह्मशांभवीमायामोहयत्यखिलंजगत् जगन्मध्यगतंकिंमानमोहयतिकिंद्वि
जाः॥९५॥सर्वेपिमोहिताः पूर्वममराः शिवमायया तन्मायया मोहितास्तेविनष्टाश्चामरास्तदा मो
हयत्यमरान्सर्वान्महादेवः स्वमायया स्वमायया मोहितांस्तान् विनाशयतिसत्वरं॥९७॥सुरान्वि
नाशयित्वे सुरानन्यान्सृजत्युतः शिवमोहिताःक्रविनश्यंत्येवंसर्वथा॥९८॥शिवमायाविमुक्तो
जातस्तावद्महाद्विजाः नोचेद्विनाशोभवितामायात्रानसंशयः॥९९॥यदाहमोहितोजातःश्री
महादेवमायया तदैवमोहितोविष्णुः श्रीमहादेवमायया॥३००॥कोवाविष्णुरहंवोवानंदिकै
शोपिशाकरःकदाचिदभवत्पूर्वंशिवमायाविमोहिताः॥१॥ब्रह्माडमध्येयावंतोविष्णुब्र

स्नादयः सुराः तावंतोपिसुराविप्राः शिवमायाविमोहिताः॥२॥शिवमायामोहितेनयद्यत्र
लपितंमया तत्सर्वंमुनिश्रेष्ठामनोवाक्कायकर्मभिः॥३॥शिवएवसदापूज्योमुमुक्षु
भिरनेकधा सत्यंसत्यंपुनः सत्यमुद्धृत्यभुजमुच्यते॥४॥शिवमायाविमुक्तोनसमो
वोच्यतेमया पूज्यःसर्वप्रयत्नेनशिवएवमुमुक्षुभिः॥५॥शिवान्यः कोत्रिदेवेषु स
पूज्योमुक्तिकांक्षिभिः यतः यतः शिवान्येसर्वेपिजीवाएवेतिनिश्चयः॥६॥शिवःपुराय
तमेवेदपूज्यतेमुक्तिकांक्षिभिः गतपुराणैः पापरुपैः शिवान्यः पूज्यतेजनैः॥७॥द्वि
जाधन्यास्तएवेतिविज्ञेयाःपुराणसंश्रयाः पूजयंतिमहादेवंयेनन्यंसारणाः सदा॥८॥मन्य
तेशिवमद्वैतंचतुर्थंब्रह्मवादिः सएवपरमात्मातुविजिज्ञास्योमुमुक्षुभिः॥९॥सर्वव्यापी
सर्वरुपः परमात्मासदाशिवः श्रुतिभिःपरमात्मातः शिवएवेतिगीयते॥१०॥चतुर्जालि
ब्रह्मकोशमूर्ध्वंनीचपश्यति तमतीत्यस्थितः शुद्धः परमात्माशिवः स्मृतः॥११॥य

Indira Gandhi National
Centre for the Arts

माङ्कः शंकरंवेदाः सर्वदाः सर्वदेवशिखामणिंसएवसर्वदापूजोमुमुक्षुभिरनेकधा॥१३॥यमा
ङ्कमोक्षदंवेदासर्वदेवशिखामणिं सएवसर्वदापूजोमुमुक्षुभिरनेकधा॥१४॥यमाङ्कनिर्गुणं
वेदाः सर्वदेवशिखामणिः सएव०॥१५॥यमाङ्कःशाश्वतंवेदाः सर्वदेवशिखामणिंसएव०॥१६॥
यमाङ्करक्षरंवेदाः सर्वदेवशिखामणिंसएव०॥१७॥यमाङ्करक्षरंयंवेदाः सर्वदेवशिखामणिं
णिं सएव० यमाङ्कर्व्यापकंवेदाः सर्वदेवशिखामणिंसएव०॥१९॥यमाङ्कःपरमंदेवाः सर्व
देवशिखामणिं सएव०॥२०॥यमाङ्कःसर्वदंवेदाःसर्वदेवशिखामणिंसएवः॥२१॥यमाङ्कः
सर्वगंवेदाःसर्वदेवशिखामणिं सएव०॥२४॥यमाङ्कविघ्नजनकंवेदादेवशिखामणिं सः
एव०॥२५॥यमाङ्कर्वेदजनकंवेवशिखामणिं सएव०॥२७॥यमाङ्कलोकहंतारंवेदादेवशिखा
मणिं सएवः॥२८॥यमाङ्कविघ्नहंतारंवेदादेवशिखामणिंसएवशिखामणिं सएव०॥
२९॥यमाङ्करंबिकानाथंवेदादेवशिखामणिं॥३१॥यमाङ्कःस्कंदजनकं वेदारंवेदादेवशि

खामणिं सएव०॥३२॥यमाङ्कर्ब्रह्मपरमंवेदादेवशिखामणिं॥सएव०॥३३॥यमाङ्कः परमो
दारंवेदादेवशिखामणिं सएव०॥३४॥यमाङ्कज्ञानमानंदंवेदादेवशिखामणिं सएव०॥३५॥य
मामरादिपुरुषंवेदादेवशिखामणिं सएव०॥३६॥यमाङ्कपंचपुरुषंवेदादेवशिखामणिं
सएव०॥३७॥यमाङ्कर्गगनाकारंवेदादेवशिखामणिं सएव०॥३८॥यमाङ्कश्रीमहाभर्गवे
दादेवशिखामणिं सएव०॥३९॥यमाङ्कः ब्रह्मगाकारं वेदादेवशिखामणिं सएवं०॥४०॥य
माङ्कः प्रणवाकारंवेदादेवशिखामणिं सएव०॥४१॥यमाङ्कः शिवमंकंवेदादेवशिवखामणिं
सएव०॥४२॥शिवाभिधंपुरब्रह्मसेवयैवंप्रयात्ततः नासेवयैवंविप्रेंद्रामुक्तिर्भवतिना
न्यथा॥४३॥पार्वतीसहितोनित्यंध्यातव्यः श्रीमहेश्वरः पूजनीयोलिंगरूपीशिवलिंगी
महेश्वरः॥४४॥मोक्षोनास्त्येवविप्रेंद्राशिवलिंगार्चनंविनातस्मात्प्रयत्नतः कार्यशिव
लिंगार्चनंबुधैः॥४५॥मुक्तिः प्राप्याद्विजश्रेष्ठाः शिवस्यैवार्चनात्ततः शिवपूजाप्रव

Indira Gandhi National
Centre for the Arts

लेनकर्त्तव्यामुक्तिंकांक्षिभिः॥४६॥योनित्यंश्रीमहादेवंनाभ्यर्चयतिमूढधीः समुत्कानर
कंघोरंचंडालोपिभविष्यते॥४७॥सर्वदेवोत्तमोध्येयः शिवएवेतियोवदेत् सविप्रः सर्वदावंद्योवि
प्रवर्यसमुद्भवः॥४८॥महादेवः सर्वरूपीसर्वव्यापीतियोवदेत् सवि०॥४९॥महादेवार्चनेनैव
मुक्तिः प्राप्तेतियोवदेत् सवि०॥५०॥महादेवोज्ञानरूपीज्ञानदश्चेतियोवदेत् सवि०॥५१॥म
हादेवः परंब्रह्मपरमात्मेतियोवदेत् सवि०॥५२॥मुक्त्यर्थिभिः शिवान्योपिसंपूज्यइतियोवदेत्
संजारजइतिज्ञेयोजन्मन्मांतरेद्विजैः॥५३॥शिवादप्यधिकोन्योस्तिसंपूज्यश्चेतियोवदेत् संजा०
॥५४॥यथाशिवस्तथाविष्णुस्तोतव्यावितियोवदेत् संजारजइतिज्ञेयोजन्मजन्मांतरेद्विजैः॥
५६॥देवोत्तमोमहादेवः कथंस्यादितियोवदेत् स०॥५५॥महादेवमहारुद्रशंकरेतिनयोव
देत् स०॥६०॥शिवविश्वेशसर्वात्मन्महेशेतिनयोवदेत् स०॥६१॥उमाकांतविरूपाक्षसर्वज्ञे
तिनयोवदेत् स०॥६२॥देवानासार्वभौमेतिगौरीशेतिनयोवदेत् स०॥६३॥उमारमणवि

श्वात्मन्नमरेशेतियोवदेत् सध्यइतिविज्ञेयः सत्यंसत्यंद्विजोत्तमाः॥६४॥विदारितन्नसिं
हेतिमहादेवेतियोवदेत् स०॥६५॥विरूपाक्षामराधीशकपर्दिन्नितियोवदेत् सध्य०॥६६॥वि
ष्णुतातमहारुद्रगौरीनाथेतियोवदेत् सध०॥६७॥विष्णुपूजितपादाकुंचंद्रचूडेतियोवदेत् सध०
॥६८॥श्रीनीलकंठकामारेपरमेशेतियोवदेत् सध०॥६९॥परात्परतरश्रीमन्विश्वनाथेतियो
वदेत् सध०॥७०॥यस्त्रिकालंमहादेवंपूजयिष्यतिसादरं सपूज्यः सर्वदादेवैः कृत्योवेदैश्च
सर्वदा॥७१॥योनन्यशरणोनित्यंशिवमेवार्चयिष्यति स०॥७२॥नित्यमभ्यर्चकोयः शि
वाराधकोभवत् स०॥७३॥शिवान्यान्परिहायैवयः शिवंस्तौतिसर्वदा स०॥७४॥भस्मत्रिपुंड्ररु
द्राक्षैर्भूषितोयः शिवार्चकः सपूज्यः सदादेवैः कृत्योवेदैश्चसादरं॥७५॥शंकरंमुक्तिदंत्यक्त्वा
योन्यमभ्यर्चयिष्यति समुखस्थंपयस्त्यक्त्वाकरोतः पिबतिसादरं॥७६॥शिवान्यमरंभक्त्यायः पू
जयतिसततं ससंसारीजन्मजन्मन्यनिकृंतितयोनिजः॥७७॥नेयस्यपार्वतीकांतेभक्तिर

